कादम्बरीकथा

३०३

श्री

क्ला· ५ पाठको पा· हुराम-चंद्रशर्मे लाइहर

१

श्रीगणेशायनमः। रजोजुषेजन्मनिसत्ववृत्तयेस्थितौप्रजानांप्रलयेतमःस्पृशे· अजायसर्गस्थितिनाशहेतवेत्रयीमयायत्रिगुणात्मने
नमः।१।जयंतिबाणासुरमौलिलालितादशास्यचूडामणिचक्रचुंबिनः। सुरासुराधीशशिखांतशायिनोभवच्छिदस्त्र्यंबकपादपांसवः।
२।जयत्युपेंद्रः सचकाररूरतोविभिन्नपापः सलिलंबलक्ष्या· दृशैवकोपारुणयारिपोरुरः स्वयंभयाद्भिन्नमिवास्रपाटलं·३।नमामिभर्वो
श्चरणांबुजद्वयंसशेखरैर्मौखरिभिः कृतार्चनं· समस्तसामंतकिरीटवेदिकाविटंकपीठोल्लुठितारुणांगुलि·४।अकारणाविष्कृतवैरदारु
णाद्सज्जनात्कस्यभयंनजायते· विषंमहाहेरिवयस्यदुर्वचः सुदुःसहंसन्निहितंसदामुखे·५।कटुक्वणंतोमलदायकाःखलास्तुदंत्यलंबंध
नशृंखलाइव· मनस्तुसाधुध्वनिभिःपदेपदेहरंतिसंतोमणिनूपुराइव·६।सुभाषितंहारिविशत्यधोगलान्नदुर्जनस्यार्करिपोरिवामृतं·तदेव
धत्तेहृदयेनसज्जनोहरिर्महारत्नमिवातिनिर्मलं·७।स्फुरत्कलालापविलासकोमलाकरोतिरागंहृतकौतुकाधिकं·रसेनशय्यांस्वयमभ्युपाग

=शय्यात्स्मेशाहृदुफेइतिविश्वः।१

शिवः

१

दीपकोपमेउलंकारश्लेषैः=९   श्लेषोलंकारः॥ स्वभावजातिरपि॥

ताकयाजनस्याभिनवावधूरिव प्रहरंतिकंनोत्वलश्रीपको [redacted] पमैर्नवैः परार्थैकरूपपादिताः कृपाः॥ निरंतरश्लेषघनाः सुजातयो महास्त्रजश्चंपककु
ड्मलैरिव॥९॥ बभूव वात्स्यायनवंशसंभवो द्विजो जगद्गीतगुणोग्रणीः सतां॥ अनेकगुप्तार्चितपादपंकजः कुबेरनामांश इव स्वयंभुवः॥१०॥ उवास
यस्य श्रुतिशांतकल्मषे सदा पुरोडाशपवित्रिताधरे॥ सरस्वती सोमकषायितोदरे समस्तशास्त्रस्मृतिबंधुरे मुखे॥११॥ जगुर्गृहेभ्यस्तसम
मस्तवाङ्मयैः ससारिकैः पंजरवर्त्तिभिः शुकैः॥ निगृह्यमाणा बटवः पदे पदे यजूंषि सामानि च यस्य शंकिताः॥१२॥ हिरण्यगर्भो भुवनांड
कादिव [redacted] क्षपाकरः क्षीरमहार्णवादिव॥ अभूत्सुपर्णो विनतोदरादिव द्विजन्मनामर्थपतिः पतिस्ततः॥१३॥ विव
स्वतो यस्य विसारिवाङ्मयं दिने दिने शिष्यगणा नवा नवाः॥ उषस्सु लग्नाः श्रवणेऽधिकां श्रियं प्रचक्रिरे चंद्रनपल्लवा इव॥१४॥ विधानसंपा
दितदानशोभितैः स्फुरन्महावीरसनाथमूर्त्तिभिः॥ मखैरसंख्यैरयजंत्सुरालयं सुखेन यो यूपकरैर्गजैरिव॥१५॥ स चित्रभानुं तनयं महा

का.पू.
२

त्मनां सुतोत्तमानां श्रुतिशास्त्रशालिनाम्। अवाप मध्ये स्फटिकोपलामलं क्रमेण कैलासमिव क्षमाभृताम्॥१६॥ महात्मनो यस्य सुदूरनिर्गताः कलं
कमुक्तेंदुकलामलत्विषः। द्विषन्मनः प्राविविशुः कृतांतरा गुणान्नृसिंहस्य नखांकुरा इव॥१७॥ दिशामलीकालकभंगतां गतस्त्रयीवधूकर्णतमा
लपल्लवः। चकार यस्याध्वरधूमसंचयो मलीमसः शुक्लतरं निजं यशः॥१८॥ सरस्वतीपाणिसरोजसंपुटप्रसुप्तहंसश्रमशीकरांभसः। यशोंशुशु
क्लीकृतसप्तविष्टपात्ततः सुतो बाण इति व्यजायत॥१९॥ द्विजेन तेनाक्षतकंठकौंठ्यया महामनोमोहमलीमसांधया। अलब्धवैदग्ध्यविलासमुग्ध
याधिया निबद्धेयमतिद्वयी कथा॥२०॥ आसीदशेषनरपतिशिरःसमभ्यर्चितशासनः पाकशासन इवापरश्चतुरुदधिमालामेखलाया भुवो भर्ता प्रता
पानुरागावनतसमस्तसामंतचक्रश्चक्रवर्त्तिलक्षणोपेतश्चक्रधर इव करकमलोपलक्ष्यमाणशंखचक्रलांछनो हर इव भगीरथपथप्रवृत्तो
रविरिव प्रतिदिवसोपजायमानोदयो मेरुरिव सकलभुवनोपजीव्यमानपादच्छायो दिग्गज इवानवरतप्रवृत्तदानार्द्रीकृतकरः कर्ता महाश्चर्याणा शिवः
माहर्त्ता क्रतूनामादर्शः सर्वशास्त्राणामुत्पत्तिः कलानां कुलभवनं गुणानामागमः काव्यामृतरसानामुदयशैलो मित्रमण्डलस्योत्पातकेतुरहितज २

+ जितमकरध्वजो गुरुरिवाप्रतिहतशक्तिः कमलयोनिरिव विमानीकृतराजहंसमंडलो जलधिरिव लक्ष्मीप्रसूतिर्गंगाप्रवाह इव

नस्यप्रवर्त्तयिता गोप्ता धीवंधानामाश्रयो रसिकानां प्रत्यादेशो धनुष्मतां धौरेयः साहसिकानामग्रणीर्विदग्धानां वैनतेय इव विनतानंदजननो वै
न्य इव चापकोटिसमुत्सारितसकलारातिकुलाचलो राजा शूद्रको नाम नाम्नैव यो निर्भिन्नारातिहृदयो विश्चिंतनारसिंहरूपाडंबरमेकविक्र
माक्रांतसकलभुवनतलो विक्रमत्रयायासितं जहासेव वासुदेवमतिचिरकाललग्नमतिक्रांतकुनृपतिसहस्रसंपर्ककलंकमिव क्षालयंती
यस्य विमलकृपाणधाराजले चिरमुवास राजलक्ष्मीः। यस्य च मनसि धर्मेण कोपेन यमेन प्रसादे धनदेन प्रतापे वह्निना भुजे भुवा दृशि श्रिया वाचि स
रस्वत्या मुखे शशिना बले मरुता प्रज्ञायां सुरगुरुणा रूपे मनसिजेन तेजसि सवित्रा च वसता सर्वदेवमयस्य प्रकटितविश्वरूपाकृतेरनु
करोति भगवतो नारायणस्य। यस्य च मदकलकरिकुंभपीठपाट नमाचरतो लग्नस्थूलमुक्ताफलेन दृढमुष्टिनिपीडनान्निश्चोतधारा
जलबिंदुदंतुरेणेव कृपाणेनाकृष्यमाणा सुभटोरःकपाटविघटितकवचसहस्रांधकारमध्यवर्त्तिनी करिकरटतट गलितमदजलासा
रदुर्दिनास्वभिसारिकेव समरनिशासु समीपमससहसाजगाम राजलक्ष्मीः। यस्य च हृदयस्थितानपि पतीन्दिधक्षुरिव प्रतापानलो वियोगि
नीनामपि रिपुसुंदरीणामनलजनितदाहो दिवानिशं जज्वाल यस्मिंश्च राजनि जितजगति परिपालयति महीं चित्रकर्मसु वर्णसंकराः रते पु

=अपांसमूहध्वनिः।४

का॰पू॰

२ केशग्रहाः काव्येषु घनबंधाः शास्त्रेषु चिंताः स्वप्नेषु विप्रलंभाः छत्रेषु कनकदंडाः ध्वजेषु प्रकंपाः गीतेषु रागविलसितानि करिषु मदविकाराः चापेषु
गुणच्छेदाः गवाक्षेषु जालमार्गाः शशिकृपाणकवचेषु कलंकाः रतिकलहेषु दूतसंप्रेषणानि शार्यक्षेषु शून्यगृहाः न प्रजानामासन्। यस्य च पर
3 लोकाद्भयमंतःपुरिकाकुंतलेषु भंगो नूपुरेषु मुखरता विवाहेषु करग्रहणमनवरतमखाग्निधूमेनाश्रुपातः तुरगेषु कशाभिघातो मकरध्वजे चा =समुद्रे।२
पध्वनिरभूत्। तस्य च राज्ञः कलिकालभयपुंजीभूतकृतयुगानुकारिणी त्रिभुवनप्रसवभूमिरिव विस्तीर्णा मज्जन्मालवविलासिनीकुचतटास्फा
लनजर्जरितोर्मिमालया जलावगाहनायातजयकुंजरकुंभसिंदूरसंध्यायमानसलिलयोन्मदकलहंसकुलकोलाहलमुखरितकूलया
वेत्रवत्या परिगता विदिशाभिधाना नगरी राजधान्यासीत्। स तस्यामवजिताशेषभुवनमंडलतया विगतराज्यचिंताभारः निर्वृतो द्वीपांतरागता
नेकनृपतिमौलिमालालालितचरणयुगलो वलयमिव लीलया भुजेन भुवनभारमुद्वहन्नमरगुरुमपि प्रज्ञयोपहसद्भिरनेककुलक्रमाग
तैरसकृदालोचितनीतिशास्त्रनिर्मलमनोभिरलुब्धैः स्निग्धैः प्रबुद्धैश्चामात्यैः परिवृतः समानवयोविद्यालंकारैरनेकमूर्धाभिषिक्तपार्थि

शिवः

२

वकुलोद्गतैरखिलकलाकलापालोचनाकठोरमतिभिरतिप्रगल्भैःकालविद्भिःप्रभावानुरक्तहृदयैरग्राम्यपरिहासकुशलैरिंगिताकारवेदिभिःकाव्यनाटका
ख्यानकालेख्यव्याख्यानादिक्रियानिपुणैरतिकठिनपीवरस्कंधोरुबाहुभिरसकृदवदलितसमररिपुगजघटापीठबंधैःकेसरिकिशोरकैरिववि
क्रमैकरसैरपिविनयव्यवहारिभिरात्मनःप्रतिबिंबैरिवराजपुत्रैःसमंरममाणःप्रथमेवयसिसुखमतिचिरमुवास॰तस्यचातिविजिगीषु
तयामहासत्त्वतयाचतृणमिवलघुरत्तिस्त्रैणमाकलयतःप्रथमेवयसिवर्त्तमानस्यापिरूपवतोपिसंतानार्थिभिरमात्यैरपेक्षितस्यापिसु
रतसुखस्योपरिद्वेषइवासीत्॰सत्यपिस्वरूपविलासोपहसितरतिविभ्रमेलावण्यवतिविनयवत्यन्वयवतिहृदयहारिणिचावरोधजनेस
कदाचिदनवरतरणन्मायमानरत्नवलयोघर्घरिकास्फालनप्रकंपकरणरणायमानमणिकर्णपूरःस्वयमारब्धमृदंगवाद्यःसंगी
तकप्रसंगेन कदाचिदविरलविमुक्तशरासारशून्यीकृतकाननोमृगयाव्यापारेणकदाचिदावद्धविदग्धमंडलःकाव्यप्रबंधरचने
नकदाचिच्छास्त्रालापेनकदाचिदाख्यानाख्यायिकेतिहासपुराणाकर्णनेनकदाचिदालेख्यविनोदेनकदाचिद्वीणयाकदाचिद्दर्श

चरण

 नागतमुनिजनसूक्ष्मकथयाकदाचिदक्षरच्युतकमात्राच्युतकविंदुमतीगूढचतुर्थपादप्रहेलिकाप्रदानादिभिर्वनितासुखसंभोगपराङ्मुखः सुहृत्परि

वृतो दिवसमनयत् यथैव च दिवसमेवमारब्धविविधक्रीडापरिहासचतुरैः सुहृद्भिरुपेतो निशामनैषीत् एकदा तु नातिदूरोदिते नवनलिनदल

.५ संपुटभिदि किंचिदुन्मुक्तपाटलिम्नि भगवति सहस्रमरीचिमालिनि राजानमास्थानमंडपगतमंगनाजनविरुद्धेन वामपार्श्वावलंबिना कौ

क्षेयकेण संनिहितविषधरेव चंदनलता भीषणरमणीयाकृतिरविरलचंदनानुलेपनधवलितस्तनतटोन्मज्जदैरावतकुंभमंडलेव मंदा

किनी चूडामणिप्रतिबिंबछलेन राजाज्ञेव मूर्तिमती राजभिः शिरोभिरुह्यमाना शरदिव कलहंसधवलांबरा जामदग्न्यपरशुधारेव वशीकृतस

सु॰ कलराजमंडला विंध्यवनभूमिरिव वेत्रलतावती राज्याधिदेवतेव विग्रहिणी प्रतीहारी समुपसृत्य क्षितितलनिहितजानुकरकमला सवि

नयमब्रवीत् देव द्वारि स्थिता सुरलोकमारोहतस्त्रिशंकोरिव कुपितशतमखहुंकारनिपातिता राजलक्ष्मीरिव दक्षिणापथादागता चं

डालकन्यका पंजरस्थं शुकमादाय देवं विज्ञापयति सकलभुवनतलरत्नानामुदधिरिवैकभाजनं देवो विहंगमश्चायमाश्चर्यभूतो निखि

लभुवनतलरत्न[illegible]मितिदेवपादमूलमादायागताहमिच्छामिदेवदर्शनसुखमनुभवितुमित्येतदाकर्ण्यदेवःप्रमाणमित्युक्त्वाविरराम·उपजात
कुतूहलस्तुराजासमीपवर्तिनांराज्ञांमुखान्यालोक्यकोदोषःप्रवेश्यतामित्यादिदेश·अथप्रतीहारीनरपतिवचनानंतरमुत्थायतांमातंग
कुमारींप्रावेशयत्·प्रविश्यचसानरपतिसहस्रमध्यवर्तिनमसुरनिर्भयपुंजितकुलशैलमध्यगतमिवकनकशिखरिणमनेकरत्नाभरणकि
रणजालकांतरितावयवमिंद्रायुधसहस्रसंछादिताष्टदिग्भागमिवजलधरसमयदिवसमवलंबितस्थूलमुक्ताकलापस्यकनक
गंगा ५ शृंखलानियमितमणिदंडिकाचतुष्टयस्यगगनसिंधुफेनपटलपांडुरस्यनातिमहतोदुकूलवितानस्याधस्तादिंदुकांतमणिप
र्यंकिकानिषण्णमुद्धूयमानकनकदंडचामरकलापमुन्मयूखैर्मुखकांतिविजयपराजयप्रणतेनशशिनेवस्फाटिकपादपीठेविन्य
स्तवामपादमिंद्रनीलमणिकुट्टिमप्रभासंपर्कश्यामायमानैःप्रणतरिपुनिश्वासमलिनीकृतैरिवचरणनखमयूखजालकैरुप
शोभमानमासनोच्छ्रितपद्मरागकिरणपाटलीकृतेनाचिरमर्दितमधुकैटभरुधिरारुणेनहरिणेवोरुयुगलेनविराजमान

मसृणफेनधवलेगोरोचनालिखितहंसमिथुनसनाथपर्यंतेचामरपवनप्रनर्त्तितांशुकेदुकूलेवसानमतिसुरभिचंदनानुलेपन[redacted]
धवलितोरःस्थलमुपरिविन्यस्तकुंकुमस्थासकमंतरांतरानिपतित[redacted]बालातपछेदमिवकैलासशिखरशिलमपरशशिशंकयान
क्षत्रमालयेवहारलतयाकृतमुखपरिवेषमतिचपलराजलक्ष्मीबंधनिगडकटकशंकामुपजनयतेंद्रनीलकेयूरयुगलेनमलयज
रसगंधलुब्धेनभुजंगद्वयेनेववेष्टितबाहुशिखरमीषदालंबिकर्णोत्पलमुन्नतघोणमुत्फुल्लपुंडरीकलोचनममलकलधौतपट्टाय
मानमष्टमीचंद्रकलाकारमशेषभुवनराज्याभिषेकसलिलपूतमूर्णसनाथंललाटदेशमुद्वहंतमामोदितमालतीकुसुमशेखरमुष
सिशिखरपर्यस्ततारकापुंजमिवपश्चिमाचलमाभरणप्रभापिशंगितांगयालग्नहरहुताशामिवमकरध्वजमासन्नवर्त्तिनीभिःस
र्वतःसेवासंगताभिरखिलदिग्वधूभिर्वारविलासिनीभिःपरिवृतममलमणिकुट्टिमसंक्रांतसकलदेहप्रतिबिंबतयापतिप्रेमग्ग
वसुंधरहृदयेनेवोह्यमानमशेषजनभोग्यतामुपनीतयाप्यसाधारणयाराजलक्ष्म्यासमालिंगितमपरिमितपरिवारजनमप्येक

=साधनं सेना ।१ =अविद्यमानो देहो यस्य तेन करो यस्य ।३= =असनाः पीतशालाः सलक्षणः आसनं धनुः प्रियालः ।=१

तीयमनंतगजतुरगसाधनमपि एकाकिनमेकदेशस्थितमपि व्याप्तभुवनमंडलमासनगतमपि धनुषि निषण्णमुत्सादिताशेषद्विषदिं
धनमपि ज्वलत्प्रतापानलमायतलोचनमपि सूक्ष्मदर्शनं महादोषमपि सकलगुणाधिष्ठानं कुपतिमपि कलत्रवल्लभमविरतप्रवृत्तदा
नमप्यमदमतिशुद्धस्वभावमपि कृष्णचरितमकरमपि कर [illegible] तलस्थितसकलभुवनतलं राजानमद्राक्षीत् आलोक्य च सा दूरस्थै
व प्रचलितरत्नवलयेन रक्तकुवलयदलकोमलेन पाणिना जर्जरितमुखभागां वेणुलतामादाय नरपतिप्रबोधनार्थं सकृत्सभाकु
=तालः वेणुकताडनं ।४ ट्टिममाजघान । येन सकलमेव तद्राजकमेकपदे वनकरियूथमिव तालशब्देन तेन वेणुलताध्वनिना युगपदावलितवदनमवनिपा
लमुखादाकृष्य चक्षुस्तदभिमुखमासीत् । अवनिपतिस्तु दूरादालोकयेत्यभिधाय प्रतीहार्या निर्दिश्यमानां तां वयःपरिणामपांडुर
शिरसा रक्तराजीवेक्षणापांगेनानवरतकृतव्यायामतया यौवनापगमेप्यशिथिलशरीरसंधिना सत्यपि मातंगत्वे नातिनृशंसाकृति
नानुगृहीतार्यवेषेण धवलवाससा पुरुषेणाधिष्ठितां आकुलाकुलकाकपक्षधारिणा कनकशलाकानिर्मितमप्यंतर्गतशुकप्रभाश्यामा
पुरोभागा ।

6

यमानंमरकतमयमिवपंजरमुद्वहताचंडालदारकेणानुगम्यमानामसुरगृहीतामृतापहरणकृतकपटपटुविलासिनीवेषस्यश्यामतयाभगवतोहरे
रिवानुकुर्वतींसंचारिणीमिवेंद्रनीलमणिपुत्रिकामागुल्फावलंबिनानीलकंचुकेनावछन्नशरीरामुपरिरक्तांशुकरचितावगुंठनांनीलोत्पलस्थ
लीमिवनिपतितसंध्यातपामेककर्णावसक्तदंतपत्रप्रभाधवलितकपोलमंडलामुद्यदिंदुकिरणछुरितमुखीमिवविभावरीमाकपिलगोरोचना
रचिततिलकतृतीयलोचनामीशानरचितानुरचितकिरातवेषामिवभवानीमुरस्थलनिवाससंक्रांतनारायणदेहप्रभाश्यामलितामिवश्रियं
कुपितहरहुताशनदह्यमानमदनधूममलिनीकृतामिवरतिमुन्मदहलिहलाकर्षणभयप्रपलायितामिवयमुनामतिबहलपिंडालक्त
करसरागपल्लवितपादपंकजामचिरमृदितमहिषासुररुधिररक्तचरणामिवकात्यायिनीमालोहितांगुलिप्रभापाटलितनखमयूखामति
कठिनमणिकुट्टिमस्पर्शमसहमानांक्षितितलेपल्लवभंगानिवनिधायसंचरंतीमापिंजरेणोत्सर्पिणानूपुरमणीनांप्रभाजालेनरंजि
तशरीरतयापावकेनेवभगवतारूपपक्षपातिनाप्रजापतिमप्रमाणीकुर्वताजातिसंशोधनार्थमालिंगितदेहामनंगवारणशिरोनक्षत्रमाला ।

=अक्षतकृभिरूपसंपन्नां·५=अकुलीनां·पृथिव्यामलीनां·रजःसंबंधाभावात्·४=

यमानेनरोमराजीलताजालकेनमेखलादाम्नापरिवृतजघनस्थलामतिस्थूलमुक्ताफलघटितेन[illegible]हारेणगंगा
स्रोतसेवकालिंदीशंकयाकृतकंठग्रहांशरदमिवविकसितपुंडरीकलोचनांप्रावृषमिवघनकेशजा[illegible]यमेखलामि
वचंदनपल्लवावतंसांनक्षत्रमालामिवश्रवणाभरणभूषितांश्रियमिवहस्तस्थितकमलशोभांमूर्छामिवमनो
हरांअरण्यभूमिमिवाक्षतरूपसंपन्नांदिव्ययोषितमिवाकुलीनांनिद्रामिवलोचनग्राहिणींअरण्यकमलिनीमिवमातं
गकुलदूषितामभूर्त्तामिवस्पर्शवर्जितामालेख्यगतामिवदर्शनमात्रफलांमधुमासकुसुमसमृद्धिमिवविजातिम
नंगकुसुमचापलेखामिवमुष्टिग्राह्यमध्यांयक्षाधिपलक्ष्मीमिवालकोद्भासिनीमविरूढयौवनामतिशयरू
पाकृतिमनिमिषलोचनोददर्शसमुपजातविस्मयस्यचास्याभून्मनसिमहीपतेः·अहोविधातुरस्थानेरूपनिष्पा
दनप्रयत्नस्तथाहि·यदिनामेयमात्मरूपोपहसिताशेषरूपसंपदुत्पादिताकिमर्थमपगतस्पर्शसंभोगसुखेकृतं·

लेजन्म·मन्येचमातंगजातिस्पर्शदोषभयादस्पर्शतेयमुत्पादिताप्रजापतिनान्यथाकथमियमक्लिष्टतालावण्यस्य·नहिकर
तलस्पर्शकलुषितानामवयवानामीदृशीभवतिकांतिःसर्वथाधिग्विधातारमसदृशसंयोगकारिणमतिमनोहराकृतिरपि
क्रूरजातितयापेनेयमसुरश्रीरिवसततनिंदितसुरतारमणीयाप्युद्वेजयंतीत्येवमादिचिंतयंतमेवराजानमीषदवग
लितकर्णपल्लवावतंसाप्रगल्भवनितेवकन्यकाप्रणनाम·कृतप्रणामायांचतस्यांमणिकुट्टिमोपविष्टायांसपु
रुषस्तंविहंगममादायपंजरगतमेवकिंचिदुपसृत्यराज्ञेन्यवेदयदब्रवीच्च·देवविदितसर्वशास्त्रार्थोराजनी
तिप्रयोगकुशलःपुराणेतिहासकथालापनिपुणोवेदितागीतश्रुतीनांकाव्यनाटकाख्यायिकाख्यानकप्रभृतीना
मपरिमितानांसुभाषितानामध्येतास्वयंकर्त्ताचपरिहासालापपेशलोवीणावेणुमुरजप्रभृतीनांवाद्यविशेषाणामसम
ःश्रोतानृत्तप्रयोगदर्शननिपुणश्चित्रकर्मणिप्रवीणोद्यूतव्यापारेप्रगल्भःप्रणयकलहकुपितकामिनीप्रसादनोपायचतु

रोगगजतुरगपुरुषस्त्रीलक्षणाभिज्ञःसकलभूतलरत्नभूतोयंवैशंपायनोनामशुकःसर्वरत्नानांचोदधिरिवदेवोभाजनमितिकृत्वैनमादायास्म
त्स्वामिदुहितादेवपादमूलमायातातदयमात्मीयःक्रियतामित्युक्त्वानरपतेःपुरोनिधायपंजरमसावपससारःअपसृतेचतस्मिन्सविहंगरा
जोराजाभिमुखोभूत्वासमुन्नमय्यदक्षिणंचरणमतिस्पष्टवर्णस्वरसंस्कारयागिराकृतजयशब्दोराजानमुद्दिश्यार्यामिमांपपाठ·स्तनयु
गमश्रुस्नातंसमीपतरवर्त्तिहृदयशोकाग्नेःचरतिविमुक्ताहारंव्रतमिवभवतोरिपुस्त्रीणां·राजातुतांश्रुत्वासंजातविस्मयःसहर्षमा
सन्नवर्त्तिनमतिमहार्हेहेमासनोपविष्टममरगुरुमिवाशेषनीतिपारगमतिवयसमग्रजन्मानमखिलेमांत्रिमंडलप्रधानममात्यंकु
मारपालितनामानमब्रवीत्·श्रुतामवद्भिरस्यविहंगमस्यस्पष्टतावर्णोच्चारणेस्वरेच·मधुरता·प्रथमंतावदिदमेवमहदाश्चर्यमसंकीर्ण
वर्णप्रविभागामभिव्यक्तमात्रानुस्वारसंस्कारसंयोगांविशेषसंयुक्तांयदयमतिपरिस्फुटाक्षरांगिरमुदीरयति·तत्रपुनरपरमभिमत
विषयेतिरश्चोपिमनुजस्येवसंस्कार[redacted]वतोबुद्धिपूर्वाप्रवृत्तिस्तथाह्यनेनसमुत्क्षिप्तदक्षिणचरणेनोच्चार्यजयशब्दमियमार्यामामुद्दिश्यातिपरि

पुरुषप्रयत्नेनवा॰

८ क्षरंगीता॰प्रायेणहिपक्षिणःपशवश्चभयाहारमैथुननिद्रासंज्ञामात्रवेदिनोभवंति॰इदंतुमहच्चित्रमित्युक्तवतिनृपतुजि कुमारपालितः किंचित्स्मितवद
नोनृपमवादीत्॰देवकिमत्रचित्रमेतेहिशुकसारिकाप्रभृतयोविहंगविशेषायथाश्रुतांवाचमुच्चारयंतीत्यधिगतमेवदेवेन॰तत्राप्यन्यजन्मोपात्तसं
रा॰ स्कारानुबंधेनवासंस्कारातिशयदुपजायतइतिनातिचित्रं॰अन्यदेतेषामपिपुरा पुरुषाणामिवातिपरिस्फुटाभिधानावागासीदग्निशापात्त्वपरि
४ स्फुटालापताशुकानामुपजाताकरिणांचजिह्वापरिवृत्तिरित्येवमुच्चारयत्येवतस्मिन्नशि शिरकिरणमंबरतलस्यमध्यमारूढमावेदय
न्नाडिकाछेदप्रहतपटुपटहनादानुसारीमध्याह्नशंखध्वनिरुदतिष्ठत्॰तमाकर्ण्यसमासन्नस्नानसमयोविसर्जितराजलोकःक्षितिपति
रास्थानमंडपादुत्तस्थौ॰अथचलतिमहीपतावन्योन्यमतिरभससंचलनचालितांगदपत्रभंगमकरकोटिपाटितांशुकपटानामाक्षेपदोला
यमानकंठदाम्नामंससस्थलोल्लासितकुंकुमपटवासधूलिपिंजरितदिशामालोलमालतीकुसुमशेखरोत्सरद्दलिकदंबकानामर्द्धविभि
ःकर्णोत्पलैश्चुंब्यमान गंडस्थलानांगमनप्रणामलालसानामहमहमिकयावक्षःस्थलप्रेंखोलितहाररत्नानामुत्तिष्ठतामासीदतिमह

स्कंधदेशानसक्ति[redacted]चामराणां

न्संभ्रमोमरणिपतीनां·धूतश्वेतचामरनिःपतंतीनांचामरग्राहिणीनांकमलमधुपानमत्तजरत्कलहंसनादजर्जरेणपदेपदेरणितमणीनांनूपु
राणांनिनादेनवारविलासिनीजनस्यसंचरतोजघनस्थलास्फालनरसितरत्नमालिकानांमेखलानांमनोहारिणाझंकारेणनूपुररवा
कृष्टानांचधवलितास्थानमंडपसोपानफलकानांभवनदीर्घिकाकलहंसानांकोलाहलेनरसनारसितोत्सुकानांचतारतरविरा
विणामुल्लिख्यमानकांस्यकेंकारदीर्घेणगृहसारसानांकूजितेनसरभसप्रचलितसामंतशतचरणतलाभिहतस्य
चास्थानमंडपस्यनिर्घातनिर्घोषगंभीरेणकंपयतेववसुमतींध्वनिनाप्रतीहाराणांचपुरःससंभ्रमसमुत्सारितजनानांदंडि
नांसमारब्धहेलमुच्चैरुच्चारयतामालोकमनालोकयतेतितरितरदीर्घेणभवनप्रासादकुंजेषूच्चरितप्रतिशब्दतयादीर्घतर
तामुपगतेनालोकशब्देनराज्ञांचससंभ्रमावर्जितमौलिलोलचूडामणीनांप्रणमताममलमणिशलाकारंजितरागैः किरीटको
टिभिरुल्लिख्यमानस्यमणिकुट्टिमस्यनिःस्वनेनप्रणामपर्यस्तानामतिकठिनमणिकुट्टिमनिपतितरणरणायितानांचमणि

कर्णामृताणांनिनादेनमंगलपाठकानांचपुरोयायिनांजयजीवेतिमधुरवचनानुयातेनपठतांदिगंतव्यापिनाकलकलेनप्र
चलितजनचरणाघातसंक्षोभितयारूपरागकुसुमप्रकरसुमलतांचमधुलिहां[illegible]कुलेनसंक्षोभादतित्वरितपदंप्रवृत्तैरवनिप
तिभिःकेयूरकोटिताडितानांक्वणितमुखरवररत्नदाम्नांचमणिस्तंभानांरणितेनसर्वतःक्षुभितमिवतदास्थानमभवत्‌अथविस
र्जितराजलोकोविश्रम्यतामितिस्वयमेवाभिधायतांचांडालकन्यकांवैशंपायनःप्रवेश्यतामभ्यंतरमितितांबूलकरंकवाहिनी
कतिपयाप्तराजपुत्रपरिवृतोनरपतिरभ्यंतरंप्रविवेश।अपनीताशेषाभरणश्चदिवसकरइवविगलितकिरणजालः
चंद्रतारकाशून्यइवगगनाभोगःसमुपाहृतसमुचितव्यायामोपकरणांव्यायामभूमिमयासीत्‌।तस्यांचसमानव
योभिःसहराजपुत्रैःकृतमधुरव्यायामःश्रमवशादुन्मिषंतीभिःकपोलयोरीषद्दलितसितसिंधुवारकुसुममंजरीविभ्र
माभिरुरसिनिर्दयश्रमच्छिन्नहारविगलितमुक्ताफलप्रकरानुकारिणीभिर्ललाटपट्टकेऽष्टमीचंद्रशकलतलोल्लसत्स्वेदनाबिं शिवः

दुविडंबिनीभिःस्वेदजलकणिकासंततिभिरलंक्रियमाणकपोलभित्तिरितस्ततःस्नानोपकरणसंपादनसत्वरेणपुरःप्रधावतापरिजनेनतत्कालंविर
लजनेपिराजकुलेसमुत्सारणाधिकारमुचितमाचरद्भिर्दंडिभिरुपदिश्यमानमार्गोविततसितवितानामनेकचारणगणविबध्यमानमंड
लांगंधोदकपूर्णकनकमयद्रोणीसनाथमध्यामुपस्थापितस्फाटिकस्नानपीठमेकांतनिहितैरतिसुरभिगंधसलिलपूर्णैःपरिमला
वकृष्टमधुकरकुलांधकारितमुखैरातपभयान्नीलकर्पटावगुंठितमुखैरिवस्नानकलशैरुपशोभितांस्नानभूमिमगच्छत्।अवती
र्णस्यचजलद्रोणींवारविलासिनीकरसमाहृतसुगंधामलकोपलिप्तशिरसोराज्ञःसमंतात्समुपतस्थुरंभःकनिविडनिबद्धस्त
नपरिकरादूरसमुत्सारितवलयबाहुलताःसमुत्क्षिप्तकर्णाभरणाःकर्णोत्संगोत्सारितालकागृहीतजलकलशाःस्नानार्थम
मभिषेकदेवताइववारयोषितस्ताभिश्चसमुन्नतकुचकुंभमंडलाभिर्वारिमध्यप्रविष्टःकरिणीभिरिववनकरीपरिवृत
स्तत्क्षणंराजारराज।जलद्रोणीसलिलादुत्थायचस्नानपीठममलस्फटिकधवलंवरुणइवराजहंसमारुरोह।ततस्ताःकाश्चिन्म

कादं॰
१०
10

रकतकलशप्रभाभासमानानलिन्यइववसंतश्रियःपत्रपुटैःकाश्चिद्रजतकलशहस्तारजन्यइवपूर्णचंद्रमंडलविनिर्गतेनज्योत्स्नाप्रवाहेण
काश्चित्कलशोत्क्षेपश्रमस्वेदार्द्रशरीराजलदेवताइवस्फाटिकैःकलशैस्तीर्थजलेनकाश्चिन्मलयसरितइवचंदनरसमिश्रेणसलिलेनका
श्चिदुत्क्षिप्तकलशपार्श्वविन्यस्तकरपल्लवाःप्रकीर्यमाणनखमयूखजालकाःप्रसृतांगुलि [redacted] विवरविनिर्गतजलधाराःसलिलयंत्र
देवताइवकाश्चिज्ज्ञाश्रमपनेतुमाक्षिप्तबालातपेन दिवसश्रियइवकनककलशहस्ताःकुंकुमजलेनवारांगनाःक्रमेणराजानम
भिषिषिचुः।अनंतरमुत्पादितस्फोटयन्निवश्रुतिपथमनेकप्रहतपटुपटहझल्लरीमृदंगवेणुवीणागीतनिनादानुगम्यमानोबंदिवृंद
कोलाहलाकुलोभुवनविवरव्यापीस्नानशंखानामापूर्यमाणानांमुखरोध्वनिः।एवंचक्रमेणनिवर्तिताभिषेकोविषधरनिर्मोकपरिल
घुनीधवलेपरिधायधौतवाससीशरदंबरैकदेशइवजलक्षालनविमलतनुतरतिधवलजलधरच्छेदश्शुचिनादुकूलपट्टपल्लवेन
तुहिनगिरिरिवगगनसरित्स्रोतसारूढशिरोवेष्टनःसंपादितपितृजलक्रियोमंत्रपूतेनतोयांजलिनादिवसकरमभिप्रणम्यदेवगृह

शिवः
१०

रलि१

मृगमदपंकपरिचितपशुपतिपूजश्च निष्क्रम्य देवगृहान्निर्वर्तिताग्निकार्यो विलेपनभूमौ झंकारिभिः कदंबकैरनुबध्यमानपरिमलेन मृगमदकर्पूर
कुंकुमवाससुरभिणा चंदनेनानुलिप्तसर्वांगो विरचितामोदिमालतीकुसुमशेखरः कृतांबरपरिवर्तो रत्नकर्णपूरमात्रालंकरणः समुचित
भोजनैः सह नृपतिभिराहारमभिमतरसास्वादजातप्रीतिरवनिपो निर्वर्तयामास। परिपीतधूमवर्तिरुपस्पृश्य च गृहीततांबूल धूम२
स्तस्मात्प्रमृष्टमणिकुट्टिमात्प्रदेशादुत्थाय नातिदूरवर्तिन्या ससंभ्रमप्रधावितया प्रतीहार्या प्रसारितं बाहुमवलंब्यानवरतवेत्रल
ताग्रहणप्रसंगादतिजरठकिसलयानुकारिकरतलं करेणाभ्यंतरसंचारसमुचितेन परिजनेनानुगम्यमानो धवलांशुक
जवनिकापरिगतपर्यंततया स्फटिकमणिमयभित्तिबंधमिवोपलक्ष्यमाणमतिसुरभि मृगनाभिपरिमलेनामोदिना चंदनवा
रिणासिक्तशिशिरमणिकुट्टिमं विरलविप्रकीर्णेन विमलमणिकुट्टिमगगनतलतारागणेनेव कुसुमोपहारेण निरंतरनिचि
तमुत्कीर्णशालभंजिकानिवहेन सन्निहितगृहदेवतेनेव गंधसलिलक्षालितेन कलधौतमयेन स्तंभसंचयेन विराजमानमति

बहलागरुधूपपरिमलमखिलविगलितजलंनिवस्यधवलजलधरशकलानुकारिणिकुसुमामोदवासितप्रच्छदपटेनपटोपधा
नाध्यासितशिरोभागेनमणिमयप्रतिपादुकाप्रतिष्ठितपादेनपार्श्वस्थरत्नपादपीठेनतुहिनगिरिशिलातलसदृशेनशयनेनसनाथी
कृतवेदिकंकुसुमास्थानमंडपमयासीत्।तत्रचशयनतलनिषण्णःक्षितितलोपविष्टयाशनैःशनैरुत्संगनिहितासिलतयाखड्गवा
हिन्यानवनलिनदलकोमलेनकरसंपुटेनसंवाह्यमानचरणःक्षणकालोचितदर्शनैरवनिपतिभिरमात्यैर्मित्रैश्चसहता
स्ताःकथाःकुर्वन्मुहूर्त्तमिवास्तांचक्रे।ततोनातिदूरवर्तिनीमंतःपुराद्वैशंपायनमादायागच्छेतिसमुपजातवृत्तांतश्रवणकुतूहलोरा
जाप्रतीहारीमादिदेश।साक्षितितलनिहितजानुकरतलायथाज्ञापयतिदेवइतिभिधायाज्ञांयथादिष्टमकरोत्।अथमुहूर्त्ता
द्वैशंपायनःप्रतीहार्यागृहीतपंजरःकनकवेत्रलतावलंबिनाकिंचिदवनतपूर्वकायेनासितकंचुकावच्छन्नवपुषाजरयाधव
लितमौलिनागद्गदस्वरेणमंदमंदसंचारिणाविहंगजातिप्रीत्याजरत्कलहंसेनेवकंचुकिनानुगम्यमानोराजांतिकमाजगाम।सि

तितल[illegible]निदितकरतलस्तुकंचुकीराजानंमभ्यापयत्।देवदेव्योविज्ञापयंति।देवादेशाद्वैशंपायनःस्नातःकृताहारश्चदेवपादमूलंप्रतीहा
र्यानीतइत्यभिधायगतेचतस्मिन्राजावैशंपायनमपृच्छत्।कच्चिदभिमतमास्वादितमभ्यंतरेभवताकिंचिदशनजातमिति।सप्रत्युवाच।दे
वकिंवानास्वादितंआमत्तकोकिलालोचनछविर्नीलपाटलःकषायमधुरःप्रकाममापीतोजंबूफलरसोहरिनखरभिन्नमत्तमातंगकुंभमु
क्तारक्तार्द्रमुक्ताफलछवीनिखंडितानिदाडिमबीजानिनलिनीदलहरितानिद्राक्षाफलस्वादूनिचदलितानियथेछयाप्राचीनामलकीफलानिकिंवाप्र
लपितेनबहुनासर्वमेवदेवीभिःस्वयंकरतलोपनीयमानममृतायतइत्येवंवादिनोवचनमाक्षिप्यनरपतिरब्रवीत्।आस्तांतावत्सर्वमेवे
दमपनयतुनःकुतूहलमावेदयतुभवानादितःप्रभृतिकार्त्स्न्येनात्मनोजन्मकस्मिन्देशेभवान्कथंजातःकेनवानामकृतंकामाताकस्ते
पिताकथंवेदानामागमःकथंशास्त्राणांपरिचयःकुतःकलाःसमासादिताःकिंजन्मांतरानुस्मरणमुतवरप्रदानमथवाविहगवे
षधारीकश्चिच्छन्नंनिवससिक्ववापूर्वमुषितंकियद्वावयःकथंपंजरबंधःकथंचांडालहस्तगमनमिहवाकथमागमनमिति।वैशंपा

यनस्तुस्वयमुपजातकुतूहलेनसबहुमानमवनिपतिनापृष्टोमुहूर्त्तमिवध्यात्वासादरमब्रवीत्॥देवमहतीयंकथायदिकौतुकमाकर्ण्यतां
अस्तिपूर्वापरजलनिधिवेलावनलग्नामध्यदेशालंकारभूतामेखलेवभुवोवनकरिकुलमदजलसेकसंवर्द्धितैरतिविकचधवलकुसु
मनिकरमत्युच्चतयातारागणमिवशिखरदेशलग्नमुद्वहद्भिःपादपैरुपशोभितामदकलकुररकुलदश्यमानमरीचपल्लवाकरि
कलभकरमृदिततमालकिसलयामोदिनीमधुमदोपरक्तकेरलीकपोलकोमलच्छविनासंचरद्वनदेवताचरणालक्तकरसरंजि
तेनेवपल्लवप्रचयेनसंछादिताशुककुलदलितदाडिमीफलद्रवार्द्रीकृततलैरतिचपलकपिकुलकंपितकक्कोलच्युतपल्लवफल
*स्तरैरतिकठोरनालिकेरकेतकीक[illegible]रीरबकुलपरिगतप्रांतैस्तांबूलीलतावनद्धपूगखंडमंडितैर्लक्ष्मीवासभवनैरिवविराजितालता
मंडपैरुन्मदमातंगकपोलस्थलभ्रष्टवरणसलिलासिक्तेनेवनिरंतरमेलालतावनेनमदगंधिनांधकारितानखमुखलग्नेभकुंभ
मुक्ताफललुब्धैःशबरसेनापतिभिरभिहन्यमानकेसरिशताप्रेताधिपनगरीवसन्निहितमृत्युभीषणामहिषाधिष्ठिताचसमरोद्यतपता शिवः

सदा

*शबलैरनवरतनिपतितकुसुमरेणुपांसुलैःपथिकजनरचितलवंगपल्लवस्र*२

=नीलः कंठः स वैयाघ्रस्यास्यातो वाणः। असनो विजयसारस्तस्यास्यातः। १ = श्रीद्रुमो बिल्वः। पक्षे श्रीद्रुमः कल्पवृक्षः। वारुणी इव वारुणी। दिगिशुर्कि स्तत्र संभाविनी। २ =

= कर्णीसुतो मूलदेवः स्तेयशास्त्रप्रवर्तकः। तस्यानो तस्य सखायौ तौ विपुलाचलसंज्ञकौ। शशाश्चमं...

...रनगरे सिद्धलक्ष्मणाख्यं = १

किनीवबाणासनारोपितशिलीमुखाविविक्तसिंहनादाच कात्यायिनीवप्रचलितरक्तजीवणारक्तचंदनालंकृताच कर्णीसुतकथेवसं
निहितविपुलाचलाशशोपगताच कल्यांतप्रदोषसंध्येवप्रनृत्तनीलकंठपल्लवारुणाच अमृतमथनवेलेवश्रीद्रुमोपशोभितावारुणीप
रिगताच शरदिवघनश्यामलानेकपलाशकुशालंकृताच चंद्रमूर्तिरिवसततमृक्षसार्थानुगताहरिणाध्यासिता [illegible] चराज्यस्थितिरि
वचमरमृगवालव्यजनोपशोभितासमदगजघटापरिपालिताच गिरितनयेवस्थाणुसंगतामृगपतिसेविताच जानकीवप्रसूत
कुशलवानिशाचरपरिगृहीताच कामिनीवचंदनमृगमदपरिमलवाहिनीरुचिरागुरुतिलकभूषिताच सोत्कंठेवविविधप
ल्लवानिलवीजितासमस्ताच बालग्रीवेवव्याघ्रनखपंक्तिमंडितागंडकाभरणाच पानभूमिरिवप्रकटितमधुकोशकशताकीर्ण
विविधकुसुमाचक्वचित्प्रलयवेलेवमहावराहदंष्ट्रासमुत्खातधरणिमंडलाक्वचिद्दशमुखनगरीवचटुलवानरवृंदभज्य
मानतुंगशालाकुलाक्वचिद्विरचिरनिर्वृत्तविवाहभूमिरिवहरितकुशसमित्कुसुमशमीपलाशशोभिताक्वचिदुद्दृप्तमृगपतिनाद

=गंडकाइत्यस्यादिरेखवारणयैकृताभरणविशेषाः पिरेस्मुताः सप्तशोपलाश्च। ३

ध्रु

ष्वाक

का॰पू॰
१२
13

गीतिभिरिव कंटकिता क्वचिन्मत्तेव कोकिलकुलप्रलापिनी क्वचिदुन्मत्तेव वायुवेगकृततालशब्दा क्वचिद्विधवेवोन्मुक्ततालपत्रा क्वचित्सम
रभूमिरिव शरशतनिचिता क्वचिदमरपतितनुरिव नेत्रसहस्रसंकुला क्वचिन्नारायणमूर्तिरिव तमालनीला क्वचित्पार्थरथपता
केव वानराक्रांता क्वचिद्भूपतिद्वारभूमिरिव वेत्रलताशतदुःप्रवेशा क्वचिद्विराटनगरीव कीचकशतावृता क्वचिदंबरश्रीरि
व व्याधानुगम्यमानतरलतारकमृगा क्वचिद्गृहीतव्रतेव दर्भचीरजटावल्कलधारिणी अपरिमितबहलपत्रसंचयापि सप्त
पर्णोपशोभिता क्रूरसत्वापि मुनिजनसेविता पुष्पवत्यपि पवित्रा विंध्याटवी नाम तस्यां च दंडकारण्यांतःपाति सकलभुवनख्या
तमुत्पत्तिक्षेत्रमिव भगवतो धर्मस्य सुरपतिप्रार्थनापीतसकलसागरसलिलस्य मेरुमत्सरादंबरतलप्रसारितविक
टशिरःसहस्रेण दिवसकररथगमनपथमपनेतुमुद्यतेनाविगणितसकलसुरसमूहवचसा विंध्यगिरिणाप्यनुल्लंघि
ताज्ञस्य जठरानलजीर्णवातापिदानवस्य सुरासुरमुकुटमकरपत्रभंगकोटिचुंबितचरणरजसो दक्षिणाशामुखविशेष

शिवः
१३

कस्यमुरल्लोकारेकहुंकारनिपातितनहुषमकदिनप्रभावस्यभगवतोमहामुनेरगस्त्यस्य भार्ययालोपामुद्रया स्वयमुपरचितालवालकै
:करपुटसलिलसेकसंवर्द्धितैः सुतनिर्विशेषैरुपशोभितंपादपैस्तत्पुत्रेणचगृहीतव्रतेनाषाढिनापवित्रभस्मविरचितत्रिपुंड्रकाभ
रणेनकुशचीरवाससामौंजमेखलाकलितमध्येनगृहीतपर्णपुटेनप्रतुटजमटतातिसांहरुच्चुल्लासापवित्रीकृतमतिप्रभूतेध्मा
हरणाद्धपस्येध्मवाहइतिपितादितीयंनामचकार। दिशिदिशिशुकहरितैश्चकदलीवनैःश्यामलीकृतपरिसरं सरिताचकल
शयोनिपरिपीतसागरमार्गानुगतयेवबद्धवे [illegible] णिकयाकावेर्यापरिगतमाश्रमपदमासीत्। यत्रचदशरथवचनमनुपालय
न्नुत्सृष्टराज्योदशवदनलक्ष्मीविभ्रमविरामोरामोमहामुनिमगस्त्यमनुचरन्सहसीतयालक्ष्मणोपरचितरुचिरपर्णशालःपंच
वट्यांकंचित्कालंसुखमुवास। चिरशून्येऽप्यापियत्रशाखानिलीननिभृतपांडुकपोतपंक्तयोलग्नतापसाग्निहोत्रधूमराजयइवलक्ष्यं
तेतरवः। बलिकर्मकुसुमान्युद्धरंत्याःसीतायाःकरतलादिवसंक्रांतोयत्ररागःस्फुरतिलताकिसलयेषु। यत्रचपीतोज्झितंजलनिधिजल

मिवमुनिनानिखिलमाश्रमोपांतवर्त्तिषु विभक्तं महाह्रदेषु॰ यत्र च दशरथसुतनिशितशरनिकरनिपातनिहतरजनिचरबलबहलरुधिर
सिक्तमूलमद्यापि तद्रागाविद्धनिर्गतपलाशमिवाभाति नवकिसलयमरण्यं॰ अधुनापि यत्र जलधरसमयेषु गंभीरमभिनवजलधरनिव
दनिनादमाकर्ण्य भगवतो रामस्य त्रिभुवनविवरव्यापिनश्चापघोषस्य स्मरंतो न गृह्णंति सस्यकवलमजस्रमश्रुजलप्लुलित
दीनदृष्टयो वीक्ष्य शून्या दशदिशो जराजर्जरितविषाणकोट्यो जानकीसंवर्द्धिता जीर्णमृगाः॰ यस्मिन्ननवरतमृगयानिहतशेषवन
हरिणप्रोत्साहित इव कृतसीताविप्रलंभः कनकमृगो राघवमतिदूरं जहार॰ यत्र च मैथिलीवियोगदुःखदुःखितौ दशवदनवि
नाशपिशुनौ चंद्रसूर्याविव कबंधग्रस्तौ समं रामलक्ष्मणौ त्रिभुवनभयं चक्रतुः॰ असाय तश्च यस्मिन् दशरथसुतनिपातितो यो
जनबाहोर्वाकुरगस्य प्रसादनागतनहुषाजगरकायशंकामकरोदृषिजनस्य॰ जनकतनया च भर्त्रा विरहविनोदनार्थमुटजाभ्यं
तरालिखिताय त्राग्रामनिवासदर्शनोत्सुका पुनरिव धरणितलाद्युत्ता संतीवनचरैरद्याप्यालोक्यते॰ तस्यैवंविधस्य संप्रसाणिभकटोप

लस्समालापूर्वकं तस्यागस्त्याश्रमस्य नातिदूरे जलनिधिपानप्रकुपितवरुणोत्साहितेनागस्त्यमत्सरात्तदाश्रमसमीपवर्त्यपर इव वेध
सा महाजलनिधिरुत्पादित इव प्रलयकालविघटिताष्टदिग्विभागसंधिबंधं गगनतलमिव भुवि निपतितमादिवराहसमुद्धृतधरामंडल
स्थानमिव सलिलपूरितमनवरतमज्जदुन्मदशबरकामिनीकुचकलशलुलितजलं मुकुलकुमुदकुवलयकह्लारमुन्निद्रारविंदमधु
बिंदुनिस्यंदबद्धचंद्रकमलिकुलपटलांधकारितसौगंधिकमारसित समदसारसमंबुरुहमधुपानमत्तकलहंसकामिनीकृतको
लाहलमनेकजलचरपतंगशतसंचलनचलितवाचालवीचिमालमनिलोल्लासितकल्लोलशिखरसीकरासारव्यस्तदुर्दिनमशंकिताव
तीर्णाभिरंभःक्रीडारसगिलीभिः स्नानसमये वनदेवताभिः केशकुसुमैः सुरभीकृतमेकदेशावतीर्णमुनिजनापूर्यमाणकमंडलुकलज
लध्वनिमनोहरमुन्मिषदुत्पलवनमध्यचारिभिः सवर्णतया रसितानुमेयैः कादंबककदंबकैरासेवितमभिषेकावतीर्णपुलिंदराजसुंदरी
कुचचंदनधूलिधवलिततरंगमुपांतजातकेतकीरजःपटलबद्धकूलपुलिनमासन्नाश्रमागततापसक्षालितार्द्रवल्कलकषायपाटलतट

जलमुपतटविटपिपल्लवानिलवीजितमविरलतमालवीथिकांधकारिताभिर्वालिनिर्वासितेन च संचरता प्रतिदिनमृष्यमूकवासिना सुग्रीवेण
वलुप्तफलपरिलघुलताभिरुद्वासितापसानां देवतार्चनोपयुक्तकुसुमाभिरुत्सन्नजलचरपतंगपक्षपुटविगलितजलबिंदुसेकसुकु
मारकिसलयाभिर्लतामंडपतलस्थितशिवलिंगमंडलारब्धतांडवाभिरनेककुसुमपरिमलवाहिनीभिर्वनदेवताभिः श्वासवासिताभिरिव
वनराजिभिरुपरुद्धतीरमपरसागराशंकिभिः सलिलमादातुमवतीर्णैर्जलधरैरिव बहलपंकमलिनैर्वनकरिभिरनवरतमापी
यमानमगाधमनंतमप्रतिममपांनिधानं पंपाभिधानं पद्मसरः। यत्र च विकचकुवलयप्रभाश्यामायमानपक्षपुटान्यद्यापि मूर्च्छन्निम
ग्नमशापम्लानीव मध्यचारिणामालोक्यंते चक्रनाम्नां मिथुनानि। तस्यैवंविधस्य पंपासरसः पश्चिमे तीरे राघवशरप्रहारजर्जरि
तजीर्णतालतरुखंडस्य च समीपे दिग्गजकरकुंडलाकारेणाजगरेण सततमावेष्टितमूलतया वहन्नालवाल स्कं
गस्कंधावलंबिभिरनिलवेल्लितैरहिनिर्मो कैर्बद्धोत्तरीय इव दिक्चक्रवालपरिमाणमिव ग्रहीतुं भुवनांतरालविप्रकीर्णैर्नशा

खासंचयेन प्रलयकालताण्डवप्रसारितभुजसहस्रमुत्पतितशशिकलाशेखरमिव विडम्बयितुमुद्यतः पुरा
णतया पतनभयादिव पवनस्कन्धलग्नो निखिलशरीरव्यापिनीभि[…]दूरोन्नताभिर्जीर्णतया शिराभिरिव
परिगतो व्रततिभिर्जरातिलककवचे[…]भिरिव कण्टकैराचरितैर्नुरिव स्ततः परिपीतसागरसलिलैर्गगनागतैः तउ
पु४ पत्ररथैरिवाशाखान्तरैर्निलीयमानैः सततमधुमधुरासेर[…]ीकृतपल्लवैर्जलधरपटलैरुपद्दष्टशिखरदेशस्तुङ्गतया
नन्दनवनश्रियमिवावलोकयितुमभ्युद्यतः समीपवर्तिनामुपरिसंचरतामम्बरतलगमनखेदायासितानां रविरथतु
रङ्गमाणां स्कन्धप्रस्रुतैः फेनपटलैः संदेहिततूलराशिभिर्धवलीकृतशिखरशाखो वनगजकपोलकण्डूयनला
ग्नमदमलिनेन निलीनमत्तमधुकरमालेन लोहशृङ्खलाबन्धमिश्रुलेनेव कल्पस्थायिना मूलेनसमुपेतः
कोटरान्यन्तरनिविष्टैः स्फुरद्भिः सजीवमधुकरपटलैर्दुर्योधन इवोपलक्षितशकुनिपक्षपातो नलिननाभ इव वनमा

का·प्र·
१८
16.

लोपगतेन नवजलधरव्यूह इव नभसि दर्शितोन्नतिरखिलभुवनतलावलोकनप्रासाद इव वनदेवतानामधिपति
रिव दण्डकारण्यस्य नायक इव सर्ववनस्पतीनां सखेव विन्ध्यस्य शाखाबाहुभिरुपगूह्येव विन्ध्याटवीमवस्थि
तो महाञ्जीर्णः शाल्मलीवृक्षः॥ तत्र च शाखाग्रेषु कोटरोदरेषु पल्लवान्तरेषु स्कन्धसन्धिषु जीर्णवल्कलविवरेषु महा
वकाशतया विस्रब्धविरचितकुलायसहस्राणि दुरारोहतया विगतविनाशभयानि नानादेशसमागतानि शुकशकुनिकुला
नि प्रतिवसन्ति स्म॥ यैः परिणामविरलदलसंहतिरपि स वनस्पतिरविरलदलनिचयश्यामल इवोपलक्ष्यते दिवानिशं निलीनैः॥ ल
ते च तस्मिन्वनस्पतावतिवाह्यानिकाह्य रजनीमात्मनीडेषु प्रतिदिनमुत्थायोत्थायाहारान्वेषणाय नभसि विरचितप
ङ्क्तयो मदकलहलधरहलमुखाक्षेपविप्रकीर्णबहुस्रोतसमम्बरतले कलिन्दकन्यामिव दर्शयन्तः सुरगजोन्मूलित टिप:
विगलदाकाशगङ्गाकमलिनीशङ्कामुपजनयन्तो दिवसकररथतुरगप्रभानुलिप्तमिव गगनतलमुपपादयन्तः १८
नी

संचारिणीमिव मरकतस्थलीं विडम्बयन्तः शैवलपल्लवावलीमिवाम्बरसरित्प्रसारयन्तो गगनविततैः पक्षपुटैः क
दलीदलैरिव दिनकरकरनिकरपरिखेदितान्याशामुखानि वीजयन्तो वियति विसारिणीं शष्पवीथीमिव रचय
२८३ न्तोऽमरायुधमिवान्तरिक्षमादधाना विचरन्ति शुकशकुनयः॥ कृताहाराश्च पुनः प्रतिनिवृत्ताः सात्मकुलायावस्थि
तेभ्यः शावकेभ्यो विविधफलरसान् कलममञ्जरीविकारांश्चापहृतहरिणरुधिरानुरक्तशार्दूलनखकोटिपाटले
न चञ्चुपुटेन दत्त्वा दत्त्वाऽधरीकृतसर्वस्नेहेनासाधारणेन गुरुणापत्यप्रेम्णा तस्मिन्नेव क्रोडान्तर्निहिततनयाः
क्षपाः क्षपयन्ति स्म॥ एकस्मिंश्च जीर्णकोटरे जायया सह निवसतः पश्चिमे वयसि वर्तमानस्य कथमपि पितुर
हमेवैको विधिवशात्सूनुरभवमतिप्रबलतया प्रवर्तितया ममैव जायमानस्य प्रसववेदनया जननी मे लोकां
कान्तरमगमत्॥ अभिमतजायाविनाशशोकदुःखितोऽपि खलु तातः सुतस्नेहादतिनिरुद्धप्रसरमपि शोकवेगम

का·प्र: काकीमसंवर्द्धनपरस्याश्रमवताऽतिपरिणतवयाश्चकुशाचीरानुकारिणीमलावशिष्टजीर्णपिञ्जरजालजर्जरा
७ मवसन्नांसदेशशिथिलमुपगतोत्पतनसंस्कारोपसंततिमुद्वहन्नुपारूढकम्पतयाचतंनापकारिणीमङ्ग
लग्नांजरामिवधुन्वन्नकाण्ठेशेफालिकाकुसुमनालपिञ्जरेणकलममञ्जरीदलनमसृणेनक्षीणाग्रपात्रलेखे
17 नकुण्ठिताग्रकोटिनाचञ्चुपुटेनपरनीडनिपतिताभ्यः शालिवल्लरीभ्यस्तण्डुलकणानादायादायतरुमूलनिपाति
तानिचशुककुलावदलितानिफलशकलानिसमाहृत्यपरिभ्रमितुमशक्तोमह्यमदात्प्रतिदिवसमात्मनाच
मद्युपभुक्तशेषमशनमकरोत्एकदातुप्रभातसंध्यारागलोहितेगगनतलकमलिनीमधुरक्तपक्षपुटेवृद्धहंसइवम
न्दा किनीपुलिनादपरजलनिधितटमवतरतिचन्द्रमसिपरिणतरङ्कुरोमपाण्डुनिव्रजतिविशालतामाशाचक्रवाले शुकः
गजरुधिररक्तहरिसटालोमलोहिनीभिरातप्तलाक्षिकतन्तुपाटलाभिरायामिनीभिरिवशिशिरकिरणदीधि
तिभिः पद्मरागरत्नशलाकासन्मार्जनीभिरिवसमुत्सार्यमाणेगगनकुट्टिमप्रकीर्णतारागणेसंध्यामुपा ७

भिर

सितकुसुमतराशबलम्बिनिमानससरस्तीरनिवासरतिसमर्षिमएडलेतटगतविंध्यपिंडलिमुंदैविप
कीर्णमहाजकरप्रेरणविगलितहुतुगणमिवमुक्ताफलनिकरमुद्वहतिधवलितनमुलिनतटमुदन्वतिप्र
वितरमुमामधुरजवाणिलिविस्तीर्णनिलायसानजातजडिम्निविबुद्धशिखिकुलेविजस्तमासाकेसरिणिकरि
णीप्रबोध्यमानसमदकरिणिसर्वेशंकजातप्रमातेस्वपानोज्जलजडकेसरंकुसुमनिकरमुद्यागारिशिखर
स्थितंस्विनारामिवोद्भितपल्लवाञ्जलिभिःसमुत्सृजति तुन्नेश्लतमशीम्मधूसरासुवनदेवताप्रासा
दानांतरुणांशाखरेषुपारावतमालायमानासुधर्मपताकासिवसमुन्मिषत्नीशुनपोवनाग्निधूमले
खासुअवश्यायसीकरिणिलुलितकमलवनेरतखिन्नशवरसीमन्तिनीस्वेदकणापहारिणिवनमहिष
१८ रोमन्थविंदुवाहिनिचलितपल्लवेलतालास्योपदेशव्यसनिनिर्विघाटमानकमलखण्डमधुकरसारवदि
लिकुसुमामोदतर्पितालिमालेनिशावसानजातडिम्निमन्दमन्दसंचारिणिप्रवातिप्राभातिकेमातरिश्व

का॰सू॰ निकमलप्रबोधमङ्गलपाठकानामिभाण्डडिण्डिमानां मधुलिहां कुमुदोदरेषु घनघनमानदलपुटनि
१८ बद्धपक्षसंहतानामनुबद्धसुहृत्कोरेषु भ्रमात्सु शिशिरमारुताहतमुक्तजलजनिरसाश्लिष्टपक्ष्ममालमिव
16 सरोषनिद्राजिह्मतारं वहत्सून्मीलयत्सु शनैः शनैरूषरक्षारपांसुधूसरक्रोडरोमराजिषु वनमहिषेषु स्तनतः
संचरत्सु वनचरेषु पृथुजृम्भमाणश्रोत्रहारि पम्पासरःकलहंसकोलाहले समुल्लसति नर्तितमयूरखण्डिनि
मनोहरे वनगजकर्णतालशब्दे क्रमेण चेमं गगनमार्गमवतरन्त्याः द्रुमकेसरवारणस्याप शूलचामरकला
पद्मापल्लवमारोहणमञ्जिष्ठारागलोहितकिरणजाले शनैः शनैरुदिते भगवति सवितरि तरपमकासरः पर्य
न्ततरुशिखरसंचारिण्यधातितनिशिशिरसेरसमकरजन्मानि हृतनीरेषु नरपिकपीवरेषु नमसि
पतति बालातपे सरप्सु जाने प्रत्युषसि तिनचिरादिवादिवसाष्टमभागभाजि स्पष्टमास्तिमन्तास्वतिमत्ते च प्रवातेषु पतत्रिणः
नानादिगन्तरालिशुककुलेषु कुलायानि लीनानामनन्तरशावसमाप्यपि निःशब्दतया स्थितरव्यवर्धनसंतोषस्थनीडावस्थितस्तेषु श्रिवः
वतानेमपि च शोशावादसंजातबलसमुत्कम्पमानपक्षपुटे तातसमीपवर्तिनि कोटरगतेऽस्मिन्सहैव तस्मिन्महावने संत्रासित १८
सकलवनचरः सरम्भसमुत्थितस्तन्मतत्रिपुटशाकुः समन्ततो भीतकरिपोतचमत्कारपीवरः प्रचलिततलतातुलितमत्तालिकु

पर्य

तस्मिन्

लक्षणेतमांसलःपरिश्रमदुद्धोलवनवराहरवघर्घरोगिरिगुहासुप्तप्रबुद्धसिंहनादोपबृंहितःकम्पयन्निव
तरून्गम्भीरतयावतार्यमाणगङ्गाप्रवाहकलकलेमहलोऽभीतवनदेवताकर्णितोमृगयाकोलाहलधु
निरुदचरत्‌आकर्ण्यतमहमश्रुतपूर्वंसमुपजातवेपथुरर्भकतयाजर्जरितकर्णविवरोभयाव्याकुलःसमी
पवर्तिनःपितुःप्रतीकारबुध्याजराशिथिलपक्षपुटान्तरमविशम्ःअनन्तरंचसरभसमितोगजयूथ
पतिलुलितकमलिनीपरिमलक्रोडकुलदल्यमानभद्रमुस्तारसामोदइतःकरिकलभभज्यमानसल्लकी
कषायगन्धइतोनिपतितशुष्कपत्रमर्मरध्वनिरितोवनमहिषविषाणकोटिकुलिशभिद्यमानवल्मीकधूलि
रितोमृगकदम्बकमितोवनगजकुलमितोवराहयूथमितोवनमहिषवृन्दमितःशिखण्डिमण्डलविरुत
मितःकपिञ्जलकुलकलकूजितमितःकुररकुलक्वणितमितोमृगपतिनखभिद्यमानकुम्भकुञ्जररासितमि
यमार्द्रपङ्कमलिनावराहपद्धतिरियमतिनवशष्पकवलरसश्यामलाहरिणरोमन्थफेनसंहतिरियमुन्मद
गन्धगजगण्डकण्डूयनपरिमलालीनमुखरमधुकरतरुरेषानिपतितरुधिरविन्दुसिक्तशुष्कपत्रपाटलारु
रुपदवीएताहिरदचेरणमर्दितविटपिपल्लवपटलमेतत्खड्गकुलक्रीडितमेषनखकोटिविनासितनाविकटपत्रले
खारुधिरपटलःकारिमौक्तिकदलदन्तुरोमृगपतिमार्गःएषाप्रत्यग्रप्रसूतवनमृगीगर्भरुधिरलोहिनीभूमिरियमव

का.पू. वीचेलिकानुकारिणी पक्षपुटस्वच्छायपतेश्वदजलमालिनां चारवीथीच मरीचिपङ्क्तिरिवमनुगस्त्य
१९ नामुत्तुङ्गमत्तगकरीवणां सुलभातपरितनरम्यास्थानामिवनस्थली तरुशिखरमारूढानामालोका
17 नस्त्रिगवमाकर्षयितामयथंशब्दो गत्सतां धनुरवहितैस्सयीपतां विरुद्धयन्तां वानरस्तुच्योत्त्येसमपिपरितो शो
नगयासाकस्यमहतोजनसमूहतरुणहनान्तरितविग्रहस्य भ्रामितकाननैकोलाहलमश्रणवम्
॥ अथ नातिचिरादेवातुलेपनाग्रामद्युरूधानधीरगगारिरिवविजृम्भितशतिनादभीरेसुशारमा
उत्तानाकेसरिसिंहनिनादैर्नसत्रस्तसूधनुत्तानामेकाकिनासेचरतामनवरतकरास्फोट[illegible]श्रेण
जलधरारासनानां गजयूथपतीनां कर्णतालजितेनसरभससमारम्भेयाविलुप्ताव्यमानानवपत्रानामा
लोलकाननरनरलनरतारतानामसराकानांचपयरुणाकुजितेननिहितकूपपतीनांशिखितिगिनामनु
गतकलभानाचस्थित्वास्थितानामाकृष्यकललसुकृतीपल्लवानांविनृत्तेतःपारिश्रमनानांपति
विनाशशोकदीर्घेणकारिणीनांचीत्कृतेनकतिपयदिवसप्रसूतानांचरवडिधेनुकानांत्रासपरिश्रमेव शिवः
पोतान्वेषिणीनामुन्मुलकरठमतिकरुणमारसन्तीनामाक्रन्दितेननरुशिरवरसमुत्पतितानामाकु १९

लाकुलचारिणां च पत्त्ररथानां कोलाहलेन रूपानुसारप्रधावितानां च मृगयूथानां युगपदतिरभ
सपादपाताभिहताया भुवः कम्पमिव जनयता चरणशब्देन कर्णाकृष्टजन्मना च मदकलकु
ररकामिनीकरुणकूजितकलेन शरनिकरवर्षिणां धनुषां निनादेन पवनाहतिक्वणितधारारांसी
नूमसीनां च कारिणो महिषस्कन्धपीवरस्य पातितानां रणितेन शुनां च तरसं विमुक्तघुर्घुरध्वनी भ
नां वनान्तरव्यापिना ध्वानेन सर्वतः प्रचलितमिव तदरण्यमभवत्। [stain] अचिराच्च प्रशान्ते तस्मिन्म
गयाकलकलेनिर्हृष्टमूकजलधरवृन्दानुकारिणि मन्थनावसानोपशान्तवारिणि सागर इव स्तिमि
ततामुपगते कानने मन्दीभूतभयोऽहमुपजातकुतूहलः पितुरुत्सङ्गादीषदिव निष्क्रम्य कोटरस्थ एव शिरो
धरां प्रसार्य संत्रासतरलतारकः शैशवात्किमिदमिति समुपजातविस्मयो दिदृक्षुरासमेव दिशं चक्षुः प्राहि
णवम् [stain] अभिमुखमापतत्तस्मात्काननान्तरादर्जुनभुजोद्दण्डसहस्रविप्रकीर्णामिव नर्मदाप्रवाहमनिलवशावलि
तमिव तमालकाननमेकीभूतमिव कालरात्रीणां यामसंघातमञ्जनशिलास्तम्भसञ्चारमिव क्षिति[illegible]
लितमन्धकारपुञ्जमिव रविकिरणाकुलितमन्तकपरिवारमिव परिभ्रमन्तमवदारितरसातलोज्जनमिव दानवलोक

का॰ पू॰
२०
20

मशुभकर्मसमूहमिवैकत्र समागतमशेषदण्डकारण्यवासिमुनिजनशापसामर्थ्यमिव संचरन्तमनवरतशर
निकरवर्षिरामनिहतखरदूषणबलनिवहमिव पिशाचतामुपगतं कलिकालबन्धुवर्गमिव संगतमवगाहमानस्थि
तमिव वनमहिषयूथमचलशिखरस्थसिंहकराकृष्टपतन्नजीशीमिव कालमेघपटलमखिलरूपविनाशाय धू
मकेतुजालमिव समुद्गतमन्धकारितकाननमनेकसहस्रसंख्यमतिभयजननमुत्पातवेतालवृन्दमिव शबर
सैन्यमद्राक्षम्मध्येस्यातिमहतः शाबरसैन्यस्य प्रथमे वयसि वर्त्तमानमतिकर्कशत्वादायसमयमिवानिर्मि
तमेकलव्यमिव जन्मान्तरगतमुद्भिद्यमानश्मश्रुराजितया प्रथममदलेखया भिद्यमानगण्डभित्तिमिव गजयूथ
पतिं कुमारकमसितकुवलयश्यामेन देहप्रभाप्रवाहेण कालिन्दीजलेनेव पूरयन्तमरण्यमाकुटिलाग्रे
ण स्कन्धावलम्बिना कुन्तलभारेण केसरिणमिव वनगजमदमलिनीकृतेन केसरकलापेनोपेतमायतललाटमनति
तुङ्गघोरघोणमेककर्णाभरणतामुपनीतस्य भुजङ्गफणामणेरापाटलैरंशुभिरालोहितीकृतेन पर्णशयना
भ्यासालग्नपल्लवरागेणेव वामपार्श्वेन विराजमानमचिरमहतगजकपोलगृहीतेन सप्तच्छदपरिमलवाहिना शिव:
कृष्णागुरुपङ्केनेव सुरभिणा मदेन कृताङ्गरागमुपरितमरिमलान्धेन भ्रमता तमालपत्रानुकारिणा मधुकरकुलेन त
मालपल्लवेनेव निवारितातपमालीलकरेणपिल्लवव्याजेन भुजबलनिर्जितमयप्रभुतेरुसवयसा विन्ध्याटव्या करतां॥ २०

लेनापघ्न्यमानगण्डस्थलस्वेदलेखभापाटलयाहरिणकुलक्षयक्षपासंध्यायमानयाशोणितार्द्रयेव
दृष्ट्यारञ्जयन्नाशाविभागानाजानुलम्बेनन नगजेन्द्रकरप्रमाणेनभिवगृहीनिमित्तेन चण्डिकारुधिरदानार्थमि
सकृन्निशितशस्त्रोल्लेखव्रणविभ्रमितशिखरेणभुजयुगलेनोपशोभितमन्तरान्तरालग्नश्यानहरिणरुधिरबिन्दुनाति
२४ दूजलकाणकाचितैर्गुञ्जाफलविमिश्रैःकरिकुम्भमुक्ताफलैरिवरचिताभरणेनाविन्ध्यशिलातलविशालेनवक्षःस्थ
लेनोद्भासमानमविरतश्रमाभ्यासादुल्लिखितोदरमिभमदमलिनमालानस्तम्भयुगलमुपहसन्तमिवोरुदण्डद्वयेन
लाक्षालोहितकौशेयपरिधानमकारणेपिक्रूरतयाबहुत्रिपताकोग्रभ्रुकुटीकरालेनललाटफलकेनप्रबलभ
च्याराधितयामत्यार्यहोयमितिकात्यायन्याभिमतेनेवाङ्कितमुपजातेनपरिचयैरनुगच्छद्भिःश्रमवशाद्
रविनिर्गताभिःस्वभावपाटलतयाशुकाभिरपिहरिणशोणितमिवक्षरन्तीभिर्जिह्वाभिरावेपमानखदावि
वृतमुखतयास्पष्टदृष्टदन्तांशुदन्तान्तरालग्नकेसरसटानिवसकृद्भागाद्गृहीतैःस्थूलवराटकमालिकापरिक्षि
क तगलैर्महावराहदंष्ट्राप्रहारजर्जरैरल्पकायैरपिमहाप्राणैःकलिताभ्युपजातकेसरैरिवकेसरिकिशोरकैःश्वभिर्वधूवि
धूयानदक्षैरनेकवर्णैःश्वभिरतिप्रमाणैःएणाभिश्चकेसरिणांभग्नमपहानयाचूनाथमागताभिःसिंहीभिरि
वकौलेयककुटुम्बिनीभिरनुगम्यमानंकोपावगृहीतचमरबालगजदन्तसारैःकैश्चिदविद्रुपणेवबहुमधु
टैःकैश्चिज्जनपतिभिश्चगजकुम्भमुक्ताफलानिकरसनाथपाणिभिःकैश्चिद्धातुधानैरिवगृहीतपिशिता

४१.४

का.पू. हारैः कैश्चित्समयैरिव केसरिकृत्तिधारिभिः कैश्चित्क्षपणकैरिव मयूरपिच्छधारिभिः कैश्चिच्छिशुभिरिव काकप
२१ क्षधरैः कैश्चित्कृष्णचरितमिव दर्शिताकिंसमुत्खातविरवनगजदन्तैः कैश्चिज्जलदागमदिवसैरिव जलधरश्याम
च्छायामलिनैरलकजालैः शबरसैन्यैः परिवृतमरण्यमिव सखड्गधेनुकमभिनवजलधरमिव मयूरपिच्छ
चित्रचापधारिणं बकराक्षसमिव गृहीतैकचक्रमरुणानुजमिवोद्धृतानेकमहानागद नभीममिव
शिखण्डिशत्रुं निदाघदिवसमिव सन्तताभिमुखमृगतृष्णं विद्याधरमिव मानसवेगोपशोभमिव योज
नगन्धातनुमारिणं घटोत्कचमिव भीमरूपधारिणमचलराजकन्यकाकेशपाशमिव नीलकण्ठच
न्द्रकाभरणं हिरण्याक्षदानवमिव महावराहदंष्ट्राविभिन्नवक्षःस्थलमतिरागिणामिव कृतबहुबाणपरिग्रहं
पिशिताशनमिव राक्तलुब्धकं गीतमिव निषादानुगतमम्बिकात्रिशूलमिव महिषरुधिरार्द्रकायमभिनवयौव
नमपि क्षपितबहुवयसं संहृतसारमेयसंग्रहमपि फलमूलाशनं कृष्णमप्यप्रसन्नदर्शनं स्वच्छन्दचारमपि दुर्गैकश
रणं क्षितिपतेरनुवर्तिनमपि राजसेवानभिज्ञमपत्यमिव विन्ध्यस्यांशावतारमिव कृतान्तस्य सहोदरमिव पाप
स्य सारमिव कलिकालस्य भीषणमपि महासत्त्वतया गम्भीरमिवोपलक्ष्यमाणमनभिभवनीयाकृतिं मात शिवः
ङ्गकनामानं शबरसेनापतिमपश्यम् अभिधानं तु पश्चादस्याहमश्रौषम् आसीच्च मे मनसि अहो मोहप्राय २१
मेतेषां जीवितं साधुजनगर्हितं च चरितम् तथा हि पुरुषपिशितोपहारो धर्मबुद्धिः आहारः साधुजननिन्दितो म

धुमांसादिः श्रमो मृगया शास्त्रं शिवारुतममुपदेष्टारः सदसतां कौशिकाः प्रज्ञा शकुनिज्ञानम्
परिचिताः श्वापदा राज्यं शून्याटवीषु आपानकमुत्सवो मित्राणि क्रूरकर्मसाधनानि धनूंषि सहा
या विषदिग्धमुखा भुजङ्गा इव सायकाः गीतमुत्साहकारि मुग्धमृगाणाम् कलत्राणि बन्दिगृहीता
परयोषितः क्रूरात्मभिः शार्दूलैः सह संवासः पशुरुधिरेण देवतार्चनम् मांसेन बलिकर्म चौर्ये
ण जीवनम् भूषणानि भुजङ्गमणयः यस्मिन्नेव कानने निवसन्ति तदेवोत्खातमूलमशेषतः
कुर्वन्ति इति चिन्तयत्येव मयि शबरसेनापतिश्चाटवीपरिभ्रमणसमुद्भवं श्रममपनिनीषु
रागत्य तस्यैव शाल्मलितरोरधश्छायायामवतारितकोदण्डस्त्वरितपरिजनोपनीते
पल्लवासने समुपाविशत् । अन्यतरस्तु शबरयुवा ससम्भ्रममवतीर्य तस्मात्करयुगलक्षोभि
ताम्भसः सरसो वैडूर्यद्रवानुकारि प्रलयदिवसकरकिरणोपतापादम्बरैकदेशमिव विलीन

का॰पू॰ मिन्दुमण्डलान्निव प्रस्यन्दितं द्रुतमिव मुक्ताफलनिकरमत्यच्छं तयास्पर्शानुमेयं हिमज
२२ डं मरविन्दकोशरजःकषायमम्भः कमलिनीदलपुटेनाप्यानाश्वधौतपङ्कं निर्मलितं
[redacted]
णालिकाः समुपाहरत॥ आपीतसलिलश्च सेनापतिस्तां मृणालिकाः शशिकलाइव
सैंहिकेयः क्रमेणादशत्॥ अपगतश्रमश्चोत्थाय परिपीताम्भसा सकलेन तेन शबरसे
न्येनानुगम्यमानः शनैः [redacted] शिवः
शनैरभिमतां दिगन्तरमयासीत्॥ एकतमस्तु जरद्रवरस्तस्मात्तुलिनद्दहन्दादना २२

स्वादितहरितालपिशुनः पिशिताशनदूतानिविकृतदर्शनः पिशितार्थी तस्मिन्नेव तरुतले मुहूर्तमिव व्यलंबत। अंतरिते च शबरसेनापतौ
वन्निर सजीर्णशबरः पिँधास्मा क मायं पिकरुधिरबिंदुपाटलया कपिलभ्रूलतापरिवेषभीषणया दृष्ट्यागलयन्निव शुककुलकुलायस्थानानिरीक्षे
नद्ववविहगामिषास्वादलालसः सुचिरमारुरुक्षुस्तं वनस्पतिमामूलादपश्यत्। उत्क्रांतमिव तस्मिन्क्षणेन तातालोकनभीतानां शुककुला
नामसुभिः। किमिव हि दुष्करमकरुणानां। यतः स तमनेकतालतुंगमभ्रंगमशिखरमपिसोपानैरिवायत्नेनैव पादपमारुह्य तानतुपजा
तोत्पतनशक्तीन्कांश्चिदल्पदिवसजातान्गर्भछविपाटलाञ्शाल्मलीकुसुमशंकामुपजनयतः। कांश्चिदुद्भिद्यमानपक्षतया नलिनसंव
र्त्तिकानुकारिणः। कांश्चिदर्कफलसदृशान्कांश्चिल्लोहितायमानचंचुकोटीनीषद्विघटितदलपुटपाटलमुखानां कमलमुकुलानां श्रि
यमुद्वहतः। कांश्चिदनवरतशिरःकंपव्याजेन निवारयत इव प्रतीकारासमर्थानेकैकतया फलानीव तस्य वनस्पतेः शाखांतरेभ्यः को
टरांतरेभ्यश्च शुकशावकानग्रहीदपगतासूंश्च कृत्वा क्षितावपातयत्। तातस्तु महांतम[illegible]कांडइवप्राणहरमप्रतीकारमुपप्लवमु

पनमालोकविद्रुणतरोपजातवेपथुर्मरणभयादुद्भ्रांततरलतारकां विषादशून्यामश्रुजलप्लुतां दृशमितस्ततो दिक्षु विक्षिपन्नुच्छुष्कता
लुरात्मप्रतीकाराक्षमस्त्रासस्त्रस्तसंधिशिथिलेन पक्षपुटेनाछाद्य तत्कालोचितं प्रतीकारं मन्यमानः स्नेहपरवशो मां रक्षणाकुलः किंकर्त
ताविमूढः क्रोडविभागेन मामवष्टभ्य तस्थौ· असावपि पापः क्रमेण शाखांतरैः संचरमाणः कोटरद्वारमागत्य जीर्णसितभुजंगभीषणं प्र
सार्य विविधवनवराहवसागंधिकरतलमनवरतकोदंडगुणाकर्षणव्रणांकितप्रकोष्ठमंतकदंडानुकारिणं वामबाहुमतिनृशं
सो मुहुर्मुहुर्दत्तचंचुप्रहारमुत्कूजंतमाकृष्य तातमपगतासुमकरोत्· मां तु स्वल्पत्वाद्भयसंपिंडितांगत्वात्सावशेषत्वादायुषः क
थमपि तत्पक्षसंपुटांतरगतं नालक्षयत्· उपरतं च तमवनितले शिथिलशिरोधरमधोमुखमक्षिपत्· अहमपि तच्चरणांतरा
ले प्रवेशितशिरोधरो निभृतमंकनिलीनस्तेनैव सहापतं· अवशिष्टपुण्यतयानुपवनवशसंपुंजितस्य महतः शुष्कपत्रराशे
रुपरि पतितमात्मानमपश्यं मंगानि येन मे नावशीर्यंत· यावच्चासौ न तस्मात्तरुशिखरान्नावतरति तावदहमवशीर्णपर्णसवर्णवार

स्फुटोपलक्ष्यमाणमूर्त्तिःपितरस्तुपरंतमुत्क्रान्तजीवनंशंसइवप्राणपरित्यागयोग्येपिकालेबालतयाकालांतरस्नुवःस्नेहरसस्याऽनभि
ज्ञोजन्मसहभुवाभयेनैवकेवलमभिद्रूयमानःकिंचिदुपजाताभ्यांपक्षाभ्यामीषत्कृतगमनावष्टंभोलुठन्नितस्ततःकृतांतमुख
कुहरादिवविनिर्गतमात्मानंमन्यमानोनातिदूरवर्त्तिनःशबरसुंदरीकर्णपूररचनोपयुक्तपल्लवस्यसंकर्षणपटनीलयायमु
ययोपहसतइवगगनाधरच्छविमर्षैःकालिंदीजलच्छेदैरिवविरचितच्छदस्यवनकरिमदसलिलैरिवोपसिक्तकिसल
यस्यविंध्याटवीकेशपाशश्रियमुद्वहतोदिवाप्यंधकारितशाखांतरस्याप्रविष्टसूर्यकिरणमतिगहनमपरस्येवपितुरुत्सं
गमतिमहतस्तमालविटपिनोमूलदेशमविशं।अवतीर्यचसतेनसमयेनक्षितितलविप्रकीर्णान्संहृत्सतानस्मुकशि
मनेकलतापाशसंयतानावध्यपर्णपुटेऽतितरलितगमनःसेनापतिगतेनैववर्त्मनातामेवदिशमगच्छत्।कांतुलंव्यजी
विताशंप्रत्ययपितृमरणशोकशुष्कहृदयमतिदूरपाताद्यासितशरीरंसंत्रासजातासर्वांगोपतापिनीबलवतीपिपा

पासापरवशमकरोत्। अनयाचकालकलयासुदूरमतिक्रांतःसपापकृद्दिशिपरिकल्पयन्किंचिदुन्नमितकंधरःसभयचकितया
दृशादिशोविलोकयंस्तृणेपिचलतिपुनःप्रतिनिवृत्तइतितमेवपदेपदेपापकारिणमुत्प्रेक्षमाणोनिष्क्रम्यतस्मात्तमालतरुतलान्मू
लात्सलिलसमीपमुपसर्तुंप्रयत्नमकरवं। अजातपक्षतयाचनातिस्थिरचरणसंचारस्यमुहुर्मुहुर्मुखेनपततोमुहुरुत्क्षि
प्यपतंतमात्मानमेकयापक्षपाल्यासंधारयतःक्षितितलसंसर्पणश्रमातुरस्यानभ्यासवशादेकमपिदत्त्वापदमनवर
तमुन्मुखस्यस्थूलस्थूलंश्वसतोधूलिधूसरस्यसंसर्पतोममसमभवन्मनसिकष्टास्वप्यवस्थासुस्वजीवितनिरपेक्षा
नभवंतिखलुजगतिसर्वप्राणिनांप्रवृत्तयोनास्तिजीवितादन्यदभिमततरमिहजगतिजंतूनामेवमुपरतेपिसुगृहीतना
म्नितातेयमहमविकलेंद्रियःपुनरेवप्राणिमिधिङ्मामकरुणमतिनिष्ठुरमहोसोढपितृमरणशोकदारुणंयेनमया
जीव्यतेउपकृतमपिनापेक्षतेखलंहिखलुमेहृदयमहंहिलोकांतरगतायामंबायांनियम्यशोकावेगमाप्रसवदिवसात्

रिणतवयसापिसतातेनतैस्तैरुपायैःसंवर्धनक्लेशमतिमहांतमपिस्नेहवशादगणयतामनायत्तातेनपरिपालितस्यास्यसर्वमेकपदेविस्मृतमति
कृपणाःखल्वमीममप्राणाःयदुपकारिणमपितातमपाविकापिगच्छंतंनानुगच्छंतिसर्वथानकंखलीकरोतिजीविततृष्णायदीदृग
वस्थमपिमामयमायासयतिजलाभिलाषोमन्येचागणितपितृमरणशोकस्यनिर्घृणतैवकेवलमियंममसलिलपानबुद्धिर
घापिदूरएवसरस्तीरंतथाहिजलदेवतानूपुररवानुकारिदूरेशापिकलहंसविरुतमनेनस्फुटानिदृश्यंतेसारससरसि
तानिअयंचविप्रकर्षादाशामुखविसर्पणविरलःसंचरतिनलिनीखंडपरिमलोदिवसस्यचेयमतिकष्टादशावर्त्ततेरविकिरं
बरतलमध्यवर्तीस्फुरंतमातपमनवरतमनलधूलिनिकरमिवविकिरतिकरैरधिकामुपजनयतितृषमातपस्पर्शः
संततपांसुपरुषदुर्गमाश्चनिरतिप्रबलपिपासावसन्नानिगंतुमल्पमपिअद्यमेनालमंगकान्यप्रभुरस्म्यात्मनःसीदति
मेहृदयमंधकारतामुपयातिचक्षुरपिनामखलोविधिरनिच्छतोपिमेमरणमद्योपपादयेदित्येवंचिंतयत्येवमयितस्मा

सरसोनातिदूरवर्त्तिनितपोवनेजाबालिर्नाममहातपामुनिःप्रतिवसतिस्मतत्तनयश्चहारीतनामातापसकुमारकःसनत्कु
मारइवसर्वविद्यावदातचेताःसवयोभिरपरैस्तपोधनकुमारकैरनुगम्यमानस्तेनैवपथाद्वितीयइवभगवान्विभावसुर
तितेजस्वितयादुर्निरीक्ष्यप्रवर्त्तिरूपघटोदिवसकरमंडलादिवोत्कीर्णस्तडिद्भिरिवरचितावयवस्तप्तकनकद्रवेणेवबहि
रुपलिप्तमूर्त्तिरापिशंगावदाततयादेहप्रभयास्फुरंत्यासबालातपमिवदिवसंसदावानलमिववनमुपदर्शयन्नुत्तप्त
लोहलोहितानामनेकतीर्थाभिषेकपवित्रानामंसस्थलावलंबिनीनांजटानांनिकरेणोपेतःस्तंभितशिखाकलापःखांड
वयनदिधक्षयाकृतकपटवटुवेषइवभगवान्पावकस्तपोवनदेवतानुकारिणाधर्मशासनकटकेनेवस्फाटिकेनाक्षवल
येनदक्षिणश्रवणावलंबिनाविराजमानःसकलविषयोपभोगनिरत्यर्थमुपपादितेनललाटपट्टकेत्रिसलेनेवभस्मत्रिपुं
ड्रकेणालंकृतोगगनगमनोन्मुखस्वपताकानुकारिणास्वर्गमार्गमिवदर्शयतासततमुद्ग्रीवेणस्फटिकमणिकमंडलुनाध्या

नृपुराकृ

सितवामकरतलेनः स्कंधदेशावलंबिना कृष्णाजिनेन नीलपांडुभासा तपस्त[illegible]ष्मा निपीतेनांतर्निःपतता धूमपटलेनेव परीतमूर्ति
रभिनवबिससूत्रनिर्मितेनेव परिलघुतया पवनलोलेनानिर्मांसविरलपार्श्वपंजरमिव गणं[illegible]यौवनांसावलंबिना यज्ञोपवीतेनोद्भा
समानो देवतार्चनार्थमाहृतवनलताकुसुमपरिपूर्णपर्णपुटसनाथशिखरेण आषाढेन[illegible]न्यापतनस्रव्यांतरपालिर्विषाणशि
खरोत्खाताभुद्धृतात्स्नानमृदमुपजातपरिचयेन नीवारमुष्टिसंवर्धितेन कुशकुसुमलतोपास्यमानलोलदृष्टिना तपोवनमृगेणा
नुयातो विटप इव कोमलवल्कलावृतशरीरो गिरिरिव समेखलो राहुरिवासकृत्स्वादितसोमः पद्मनिकर इव दिवसकरमरीचि
पो नदीतट[illegible]तरुरिव सततजलक्षालनविरलजटः करिकलभ इव विकचकुमुददलशकलसितदशनः द्रौणिरिव कृपानुगतो नक्ष
त्रराशिरिव चित्रमृगकृत्तिकाश्लेषोपशोभितो घर्मकालदिवस इव क्षपितबहुदोषो जलधरसमय इव प्रशमितरजःप्रसरो वरुण इव
कृतोदवासो हरिरिवापनीतनरकभयः प्रदोषारंभ इव संध्यापिंगलतारकः प्रभातकाल इव बालातपकपिलो रथ इव वृद्धनियमि

ताक्ष्यं च कः स्नुराजेवा निग्रहमंत्रसाधनस्नपितविग्रहो जलनिधिरिव करालशंखमंडलावर्जगज्जोर्भगीरथइव दृष्टगंगावतारो मधु
करइवासकस्तुभतनुघुर वनवासो वनचरोपि कृतमहालयमवेश असंयतोपि मोक्षार्थी सामप्रयोगपरोपि सततावलंबितदंडः
सुप्तोपि प्रबुद्धः सन्निहितनेत्रद्वयोपि परित्यक्तवामलोचनः तदेवंकमलसरसि स्नानुरूपागमत्। प्रायेणाकारणमित्राण्यतिकरु
णार्द्राणि च सतां खलु भवंति सतां चेतांसि। यतः स मां तदवस्थमालोक्य समुपजातदयः समीपवर्त्तिनमृषिकुमारकमन्यतममब्रवी
त्। अयं प्रथममपि शुकशिशुरसंजातपक्षपुटएव तरुशिखरादस्मात्परिच्युतः श्येनमुखपरिभ्रष्टेन वानेन भवितव्यं तथाह्यतिद
वीयस्तया प्रपातस्याल्पशेषजीवितोयमामीलितलोचनो मुहुर्मुहुर्मुखेन पतति मुहुर्मुहुरुच्छ्वसिति मुहुर्मुहुश्चंचुपुटं
र्न विवृणोति न शक्नोति शिरोधरां धारयितुं तदेहि यावदेवायमसुभिर्न विमुच्यते तावदेव ग्रहाण ममवतारय सलिलसमीपमित्य
भिधाय तेन मांसरसीरमनायय उपसृत्य च जलसमीपमेकदेशनिहितदंडकमंडलुरादाय स्वयं मां मुक्तप्रयत्नमुत्तानितमुखमंगु शिव॰

त्याकृतिचित्तसलिलबिंदूनपाययत्·अंभःक्षोभकृतसेकं च सद्युपजातप्राणमुपतटप्ररूढस्यनलिनीपलाशस्यजलशिशिरायांछाया
यांनिधायसमुचितमकरोत्स्नानविधिं·अभिषेकावसानेकप्राणायामपूतोजपन्पवित्राण्यघमर्षणानिप्रत्यग्रैरुत्फुल्लरक्तार
विंदैर्नलिनीपत्रपुटेनभगवतेसवित्रेदत्वार्घमुदतिष्ठत्·आगृहीतधौतवल्कलश्चसज्योत्स्नइवसंध्यातपःकरतलनिर्धूनन
विशदजटःकमंडलुमापूर्यशुचिनासरसोवारिणाप्रत्यग्रस्नानार्द्रजटेनसकलेनतेनमुनिकुमारककदंबेनानुगम्यमानोगृ
हीत्वामांतपोवनाभिमुखःशनैःशनैरगच्छत्·अनतिदूरमिवगत्वादिशिदिशिसलिलिहितकुसुमफलैस्तालतिलकतमाल
हिंतालबकुलबहुलैरेलालताकुलितनारिकेलीकलापैर्लोललोध्रलवलीलवंगपल्लवैरुल्लसितचूतरेणुपटलैरलि
कुलझंकारमुखरसहकारैरुन्मदकोकिलकुलकलालापकोलाहलिभिरुत्फुल्लकेतकरजःपुंजपिंजरैःपूगीलताडोलाधि
रूढवनदेवतैस्तारकावर्षमिव धर्मविनाशपिशुनंकुसुमनिकरमनिलचलितमनवरतमतिधवलमुत्सृजद्भिःसंसक्तपाद

का॰पू॰

२७

27

पैः काननैरुपगूढमचकितप्रचलितकलसारसगणरवलाभिरुत्फुल्लकमलिनीलोहिनीभिर्मारीचमायामृगावलूनरूढवीरुल्लताभि
र्हर्षशरधिचापकोटिक्षतकंदविषमिततलाभिर्दण्डकारण्यस्थलीभिरुपशोभितप्रांतमागृहीतसमित्कुशकुसुममृद्भिरध्ययनमुखर
रशिष्यानुगतैः सर्वतः प्रविशद्भिर्मुनिभिरम्भोघटकंठमुक्तछिन्नशिखंडिमंडलश्रूयमाणजलकलशपूरणध्वानमनवरतमाहु
तिप्रीतैश्चित्रभानुभिः सशरीरमेव मुनिजनममरलोकं निनीषुभिरुद्धूयमानधूमलेखाच्छलेनाबध्यमानस्वर्गमार्गगमनसोपा
नसेतुमिवोपलक्ष्यमाणमासन्नवर्तिनीभिस्तपोधनसंपर्कादिवापगतकालुष्याभिस्तरंगपरंपरासंक्रांतरविबिंबपंक्तिभिला
पसद्धर्शनागतसप्तर्षिमालाविगाह्यमानाभिरिवातिविकचकुमुदवनमृषिजनमुपासितुमवतीर्णग्रहगणमिव निशासु कुर्वं
तीभिर्दीर्घिकाभिः परिवृतमनिलावनमितशिखराभिः प्रणम्यमानमिव वनलताभिरनवरतमुक्तकुसुमैरभ्यर्च्यमानमिव पाद
पैराबद्धपल्लवांजलिभिरुपास्यमानमिव विटपैरुटजाजिरप्रकीर्णशुष्कश्यामाकमुपसंगृहीतामलकलवलीककर्कंधूकदली शिवः

२७

लकुचचूततालकदलमध्ययनमुखरबटुजनमनवरतश्रवणगृहीतवषट्कारवाचालशुककुलमनेकसारिकोद्घुष्यमाणसुब्रह्म
ण्यमरण्यकुक्कुटोपभुज्यमानवैश्वदेवबलिपिंडमासन्नवापीकलहंसपोतभुज्यमाननीवारबलिमेणीजिह्वापल्लवोपलिह्य
मानमुनिबालकमग्निकार्यार्द्धदग्धसमित्समिधायमानसमीपकुशकुसुममनुपलग्ननालिकेररसस्निग्धधौतशिलातलमवि
रलस्तृतवल्कलरसपाटलमुकुलितरक्तचंदनोपालिप्तादित्यमंडलकनिहितकरवीरकुसुममितस्ततो विक्षिप्तभस्मलेखा
कृतमुनिजनभोजनमग्निपरिहारं परिचितशाखामृगकराकृष्टनिष्कास्यमानप्रवेशमानजरद्धतापससमिन्कलाप
कार्द्रपक्वपतितैः सरस्वतीमुजलनाविगलितैः शंखवलयैरिवमृणालशकलैः कल्माषितमृषिजनार्थमेणके
विषाणशिखरोत्खन्यमानविविधकंदमूलमंबुपूर्णपुष्करपुटैर्वनकरिभिरापूर्यमाणविटपालवालकमृषिकुमारा
कृष्यमाणवनवराहदंष्ट्रांतराललग्नशालूकमुपजातपरिचयैः कलापिभिः पक्षपुटपवनसंधुक्ष्यमाणमुनिहोमहुताशन

मारब्धामृतचरुचारुगंधमैंगुदपक्वपुरोडाशपुण्यपरिमलामोदितमविच्छिन्नाज्यधाराहुतिहुतभुगंगारमुखरितमुपचर्यमाणाति
थिवर्गंपूज्यमानपितृदेवतमर्च्यमानहरिहरपितामहमुद्दिश्यमानश्राद्धकल्पमाख्यायमानयज्ञविद्यमालोच्यमानधर्मशास्त्रंवाच्यमान
विविधपुस्तकंविचार्यमाणसकलशास्त्रार्थमारभ्यमाणपर्णशालमुपलिप्यमानाजिरमुपमृज्यमानोटजाभ्यंतरमाबध्यमानध्या
नंसाध्यमानमंत्रमभ्यस्यमानयोगमुपक्रियमाणवनदेवताबलिंनिर्वर्त्यमानमौंजमेखलंक्षाल्यमानवल्कलमुपसंगृह्यमाणसमि
धमुपसंस्क्रियमाणकृष्णाजिनंगृह्यमाणगवेधुकंशोष्यमाणपुष्करबीजंग्रथ्यमानाक्षमालंन्यस्यमानवेत्रदंडंसंस्क्रियमाणपरिव्रा
जकमापूर्यमाणकमंडलुमदृष्टपूर्वंकलिकालस्यापरिचितमनृतस्याश्रुतपूर्वमनंगस्याजयोनिमिवत्रिभुवनवंदितमसुरारिमिव
प्रकटितनृहरिवराहरूपंसांख्यमिवकपिलाधिष्ठितंमधुरोपवनमिवबलावलीढदर्पितधेनुकंउदयनमिवानंदितवत्सकुलंकिंपुरु श्रिवः
षाधिराज्यमिवमुनिजनगृहीतकुशाभिषिच्यमानद्रुमंनिदाघसमयावसानमिवप्रत्यासन्नजलप्रपातंजलधरसमयमिव २८

वनगहनमध्यसुखसुप्तहरिरिवन्नसंततिमिव शिलाशकलप्रहारसंचूर्णितास्थिसंचयं खांडवविनाशोद्यतार्जुनमिव प्रारब्धाग्निकार्यं सुर
भिविलेपनधरमपि सततमाविर्भूतरुद्व्ययस्वनगंधमातंगककुलाध्यासितमपि पवित्रं उल्लसितधूमकेतुशतमपि प्रशांतोपद्रवं परिपूर्ण
द्विजपतिमंडलसनाथमपि सान्निहिततरुगहनांधकारं अतिरमणीयमपरमिव ब्रह्मलोकमाश्रमपश्यं यत्र च मलिनताधूमे
षु न चरितेषु मुखरागः शुकेषु न कोपेषु तीक्ष्णता कुशाग्रेषु न स्वभावेषु चंचलता कदलीदलेषु न मनःसु चक्षूरागः कोकिलेषु न पर २४
रकलत्रेषु कंठग्रहः कमंडलुषु न सुरतेषु मेखलाबंधो व्रतेषु नेर्ष्याकलहेषु स्तनस्पर्शो होमधेनुषु न कामिनीषु पक्षपातः कृक
वाकुषु न विद्यावादेषु भ्रांतिरनलप्रदक्षिणासु न शास्त्रार्थेषु वसुसंकीर्तनं दिव्यकथासु न तृष्णासु गणना रुद्राक्षवलयेषु
न शरीरेषु मुनिबालनाशः क्रतुदीक्षया न मृत्युना रामानुरागो रामायणेन न यौवनेन मुखभंगविकारो जरया न धनाभिमा
नेन यत्र च महाभारते शकुनिवधः पुराणे वायुप्रलपितं वयःपरिणामे द्विजपतनं उपवनचंदनेषु जाड्यं अग्नीनां भूतिमलिन

का॰पू॰ त्वमेणकानांगीतव्यसनंशिखंडिनांनृत्तपक्षपातःभुजंगानांभोगःकपीनांश्रीफलाभिलाषोव्यालानामधोगतिःतस्यचैवंविधस्य
२९ मध्यभागमलंकुर्वाणस्यालक्तकालोहितपल्लवस्यमुनिजनालंबितकृष्णाजिनजलकरकसनाथशाखस्यतापसकुमारि
29 काभिर्मूलभागदत्तपीतपिष्टपंचांगुलस्यहरिणशिशुभिरापीयमानालवालकसलिलस्यमुनिकुमारकाबद्धकुशचीरदाम्नोह
रितगोमयोपलेपनविविक्ततलस्यतत्क्षणकृतकुसुमोपहाररमणीयस्यनातिमहतःपरिमंडलतयाविस्तीर्णावकाशस्यर
क्ताशोकतरोरधश्छायायामुपविष्टैस्तुग्रतपोभिर्भुवनमिवसागरैःकनकगिरिमिवकुलपर्वतैःक्रतुमिववैतानवह्नि
भिःकल्पांतदिवसमिवरविभिःकालमिवकल्पैःसमंतादासेवितंमहर्षिभिःजरयाशापभियेवकंपितदेहयाप्रणयिन्येवविहि
तकेशग्रहयाकुरूपेववलितभ्रूभंगयामत्तयेवाकुलितगमनयाप्रसाधितयेवप्रकटिततिलकयाजरयाऽगृहीतव्रतमेवतस्य
धवलयाधवलीकृतविग्रहंआयामिनीभिःपलितपांडुराभिस्तपसाविजित्यमुनिजनमखिलंधर्मपताकाभिरिवोच्छ्रिताभि शिवः
२९

रमरलोकमारोढुं पुण्यरज्जुभिरिवोपसंगृहीताभिरतिजरसधवलपुण्यतरोः कुसुममंजरीभिरिवोज्ज्वलाभिर्जटाभिरुपशोभमानं
उपरचितभस्मत्रिपुंड्रकेण तिर्यक्प्रवृत्तत्रिपथगास्रोतसेव हिमगिरिशिलातलेन ललाटफलकेनोपेतमधोमुखचंद्रकला
काराभ्यामवलंबितवलिशिथिलाभ्यां भ्रूलताभ्यामवष्टभ्यमानदृष्टिमनवरतमंत्राक्षराभ्यासविवृताधरपुटतया निःपतद्भिरति
शुचिभिः ससंप्रसादैरिव स्वच्छेंद्रियवृत्तिभिरिव विद्याभिरिव करुणारसप्रवाहैरिव दशनमयूखैर्धवलितपुरोभागमुद्व
मद्गलगंगाप्रवाहमिव जह्नुमविरतसोमोद्गारसुगंधिभिः श्वासावकृष्टैर्भिर्निभद्भिरिव श्रवणपार्श्वस्थैः सदामुखभागसंनि
विष्टैः परिस्फुरद्भिरविरहितमतिकृशतयानिम्नतरगंडगर्त्तमुन्नततरहनुघोणमाकरालतारकमवशीर्यमाणविरलनय
नपक्ष्ममालमुज्जनदीर्घरोमरुद्धश्रवणविवरमानाभिलंबकूर्चकलापमाननमादधानमतिचपलानामिंद्रियाश्वानामंतःसंय
मनरज्जुभिरिवालताभिः कंठनाडीभिर्निरंतरसंबद्धकंधरमतनुत्वाद्विरलास्थिपंजरमंसावलंबिधवलयज्ञोपवीतमनिल

रतिभिः

३० वशाजनिततनुतरंगभंगमुत्प्लवमानममलमिव मंदाकिनीप्रवाहमकलुषमंगमुद्वहंतममलस्फटिकशकलघटितमक्षवलयमुज्ज्व
लस्थूलमुक्ताफलग्रथितं सरस्वतीहारमिव चलदंगुलिविवरगतमावर्त्तयंतमनवरतभ्रमिततारकाचक्रमपरमिव ध्रुवमुन्नमता
30 शिराजालकेन जरत्कल्पतरुमिव परिणतलतासंचयेन निरंतरानिचितममलेन चंद्रांशुभिरिवामृतफेनै शिवगुणसंतानतंतुभि
रिव निर्मितेन मानससरोजलक्षालितेन शुचिना वल्कलेन द्वितीयेनेव जराजालकेन संछादितमासन्नवर्त्तिना मंदाकिनीसलिल
पूर्णेन त्रिदंडोपविष्टेन स्फटिककमंडलुना विकचपुंडरीकराशिमिव राजहंसेनोपशोभमानमचलतां स्थैर्येण गांभीर्येण सागरता
तेजसा सवितुःप्र[illegible]शमेन तुषाररश्मिं निर्मलतयांबरतलस्य संविभागमिव कुर्वाणं वैनतेयमिव स्वभावोपात्तसकल
द्विजाधिपत्यं कमलासनमिवाश्रमगुरुं जरच्चंदनतरुमिव भुजंगनिर्मोकधवलजटाकुलं प्रशस्तवारणपतिमिव प्रलंबकर्णता
लं बृहस्पतिमिवाजन्मसंवर्द्धितकचं दिवसमिवोद्यदर्कबिंबभास्वरमुरुवंशप्रसूतं कालमिव क्षीणवर्षशतं तनुमिव प्रियसत्यव्रतमांबि श्रियः

३०

काकरतलमिवसुशाक्षयशरणनिपुणं। शिशिरसमयसूर्यमिवकृतोत्तरासंगं। वडवानलमिवसततपयोभक्षं। शून्यनगरमिवदीनाना
थविपन्नशरणं। पशुपतिमिवभस्मपांडुरोमाश्लिष्टशरीरं। तंभगवंतंआबालिमपश्यं। आलोक्यचाहमचिंतयं। अहोप्रभावस्तपसां। इ
यमस्यप्रशांतापिमूर्त्तिरुत्तप्तकनकावदातापरिस्फुरंतीसौदामनीवचक्षुषःप्रतिहंतितेजांसि। सततमुदासीनापिमहाप्रभावत
याभयमिवोपजनयति। प्रथमोपगत शुष्कनलकाशकुसुमनिपतितानलचडुलशक्तिनित्यमसहिष्णुतापसानांनतुतपसा
मपितेजः। प्रकृत्याभवति। किमुतसकलभुवनतलवंदितचरणानामनवरततपःक्षपितमलानांकरतलामलकवदखि
लंजगदालोकयतांदिव्येनचक्षुषाभगवतामेवंविधानामघक्षयकारिणं। पुण्यानिहिनामग्रहणान्यपिमहामुनीनां। किंपुनर्द
र्शनानि। धन्यमिदमाश्रमपदमयमधिपतिर्यत्र। अथवाभुवनतलमेवधन्यमनेनाधिष्ठितमवनितलकमलयोनिना। पुण्यभा
जःखल्वमीमुनयोयदहर्निशमेनमपरमिवनलिनासनमपगतान्यव्यापाराःमुखावलोकनहृष्टयःपुण्याःकथाःशृण्वंतः

निष्कल०

=गपरमुत्तुंगमस्मात्ः २=

का॰पू॰

समुपास्ते।सरस्वत्यपिधन्यायानुसततमतिप्रसन्नेकरुणाजलनिस्यंदिन्यगाधगांभीर्येरुचिरद्विजपरिवारमुखकमलसंप
३१ र्कमनुभवंतीनिवसतिहंसीवमानसे।चतुर्मुखमुखकमलवासनिर्वेदेःसुचिराद्द्वितीयमिदमपरमुचितमासादितंस्था
31 नं।एनमासाद्यशरत्कालमिवकलिजलदसमयकलुषिताःप्रसादमुपगताःपुनरपिजगतिसरितइवसर्वविद्याः।नियतमिह
सर्वात्मनाकृतावस्थितिनाभगवतापरिक्षतकलिकालविलसितेनधर्मेणनस्मर्यतेकृतयुगस्य।धरणीतलमनेनाधि
ष्ठितमालोकयन्वहतिनूनमिदानींसप्तर्षिमंडलनिवासाभिमानमंबरतलं।महोमहसस्येयंजरयायास्यप्रलंबरविरलनिक
रकुर्निशीक्ष्यरजनिकरकिरणपांडुरशिरोरुहजटाभारेफेनपुंजधवलागंगेवपशुपतेःक्षीराकृतिदिवशिखाकलापेविभावसो
र्निपतंतीनश्रीता।बहुलाज्यधूमपटलमलिनेऽस्यभगवतःप्रभावाक्रांतमिवरविकिरणजालमपिदूरतःपरिहरतितपोवनमे
तच्चपवनलोलशिखाकलापरचितांजलयइवात्रमंत्रपूतानिहवींषिप्रतिगृह्णंतिएतत्वीसाश्रुभुवणायःतरलितदुकूलवल्कलोपं शिवः ३१

चाश्रमलताकुसुमसुरभिपरिमलोमंदसंचारीसभांकाश्वासस्यसमीपमुपसर्पतिगंधवाहः।प्रायेणमहात्मनामपिदुरभिभवानिभवंतिते
जांसिसर्वतेजस्विनामयंचाग्रणीर्दिवसकृदिवाशातिजगदनेनाधिष्ठितंमहात्मनानिःकंपेवक्षितिरेतद्वंद्वंमोद्देषप्रवाहःकरुणा
रसस्यसंतरणसेतुःसंसार[redacted]सिंधोराधारःक्षमांभसांपरशुस्तृष्णालतागहनस्यसागरःसंतोषामृतरसस्यउपदेष्टासिद्धिमा
र्गस्यअस्तगिरिरसद्ग्रहस्यमूलमुपशमतरोर्नाभिःप्रज्ञाचक्रस्यस्थितिवंशोधर्मध्वजस्यतीर्थंसर्वविद्यावताराणांवडवानलो
लोभार्णवस्यनिकषोपलःशास्त्ररत्नानांदावानलोरागपल्लवस्यमहामंत्रःक्रोधभुजंगस्यदिवसकरोमोहांधकारस्यअर्ग
लाबंधोनरकद्वाराणांकुलभवनमाचाराणामायतनंमंगलानामभूमिर्मदविकाराणांदर्शकःसत्पथानामुत्पत्तिःसाधुता
यानेमिरुत्साहचक्रस्यआश्रयःसत्वस्यप्रतिपक्षःकलिकालस्यकोषस्तपसःसखासत्यस्यक्षेत्रमार्जवस्यप्रभवःपुण्य
संचयस्यादृष्टावकाशोमत्सरस्यारातिर्विपत्तेरस्थानंपरिभूतेरननुकूलोभिमानस्यासम्मतोदैन्यस्यानायत्तोरोषस्यावशो

विषयाणामननिभृतसुखानामस्य भगवतः प्रसादादेवोपशान्तवैरमपगतमत्सरं तपोवनमेतत्प्रभावो महात्मनामत्र हि शाश्वतिकमपहाय विरो
धमुपशान्तात्मानस्तिर्यंचोपि तपोवनवसतिसुखमनुभवन्ति। एतमविकचोत्पलवनरचनानुकारिणमुत्पतच्चारुचंद्रकशतं हरिणलोचन
द्युतिशबलमभिनवशाद्वलमिवावसति शिखिनः कलापमातपाहतो निःशंकमहिः। अयमुत्सृज्य मातरमजातकेसरैः केसरिशि
शुभिः सहोपजातपरिचयः क्षरत्क्षीरधारमापिबति कुरंगशावकः सिंहीस्तनं। एष मृणालकलापाशंकिभिः शशिकरधवलं
सटाभारमामीलितलोचनो बहु मन्यते द्विरदकलभकैराकृष्यमाणं मृगपतिः। इदमिह कपिकुलमपगतचापलमुपनयति मु
निकुमारकेभ्यः स्नातेभ्यः फलानि। एते च न निवारयंति मदांधा अपि गंडस्थलीभांजि मदजलपाननिश्चलानि मधुकरकुलानि
जातदयाः कर्णतालैः करिणः। किं बहुना तापसाग्निहोत्रधूमलेखाभिरुत्सर्पंतीभिरनिशमुपपादितकृष्णाजिनोत्तरासंगशोभा
ःफलमूलभृतो वल्कलिनो निश्चेतनास्तरवोपि सनियमा इव लक्ष्यंतेऽस्य भगवतः किं पुनः सचेतनाः प्राणिनः इत्येवं चिंतयन्नेव मां

तस्यामेवाशोकतरोरधश्छायायामेकदेशेस्थापयित्वासचपादावुपसंगृह्यकृताभिवादनःपितुरनतिसमीपवर्तिनिकुशासनेसमुपाविशत्‌।
आलोक्यतुमांतेसर्वएवमुनयःकुतोयमासादितःशुकशिशुरितितमासीनमपृच्छन्‌।असौतुतानब्रवीत्‌।अयंमयास्नानार्थमितोगतेनक
मलिनीतीरतरुनीडनिपतितःशुकशिशुरातपजनितक्लांतिस्तप्तपांसुपटलमध्यगतोऽस्तनिपतनविह्वलतनुरल्पावशेषायु
रासादितस्तपस्वी।दुरारोहतयातस्यवनस्पतेर्नशक्यतेस्वनीडमारोपयितुमितिजातदयेनानीतस्तद्यावदयमप्ररूढपक्षतिरस
मोंतरिक्षमुत्पतितुंतावदत्रैवकस्मिंश्चिदाश्रमतरुकोटरेमुनिकुमारकैरस्माभिश्चोपनीतेननीवारकणनिकरेणफलरसे
नचसंवर्ध्यमानोधारयतुजीवितमनाथपरिपालनंहिधर्मोऽस्मद्विधानामुद्भिन्नपक्षतिस्तुगगनचरणसमर्थोयास्यतियत्रा
स्मैरोचिष्यतेइहैववोपजातपरिचयःस्थास्यतीत्येवमादिकमस्मत्संबद्धमालापमाकर्ण्यकिंचिदुपजातकौतूहलोभगवान्जा
बालिरीषद्वलितकंधरःपुण्यजलैःप्रक्षालयन्निवमामतिप्रशांतयादृष्ट्यादृष्ट्वासुचिरमुपजातप्रत्यभिज्ञानइवपुनःपुनर्विलोक

स्वस्यैवाविनयस्यफलमनेनानुभूयतइत्यवोचत्‌।सहिभगवान्कालत्रयदर्शीतपःप्रभावाद्दिव्येनचक्षुषासर्वमेवकरतलगतमिवजगद
वलोकयतिवेत्तिजन्मांतराण्यतीतानिकथयत्यागामिनमप्यर्थमीक्षणगोचरगतानांचप्राणिनामायुषःप्रमाणमावेदयति।सर्वैवसा यतः
तापसपरिषच्छ्रुत्वाविदिततत्प्रभावाकीदृशोनेनाविनयःकृतःक्ववाकुतोजन्मांतरेकोयमासीदितिकौतूहलिन्यभवत्‌।उपनाधिल
वतीचतंभगवंतमावेदयप्रसीदभगवन्कीदृशस्याविनयस्यफलमनेनानुभूयतेकश्चायमासीज्जन्मांतरेविहगजातौचकथमस्य
संभवःकिमभिधानोवायमपनयतुनःकुतूहलमाश्चर्याणांहिसर्वेषांभगवान्प्रभवइत्येवमुपयाच्यमानस्तुतपोवनपरिषदामह
मुनिःप्रत्यवदत्‌।अतिमहदिदमाश्चर्यमाख्यातव्यमल्पशेषमहःप्रत्यासीदतिचनःस्नानसमयोभवतामप्यतिक्रामतिदेवार्चन
विधिवेलातदुत्तिष्ठंतुभवंतःसर्वएवतावदाचरंतुयथोचितंदिवसव्यापारमपराह्णसमयेभवतांपुनःकृतमूलफलाशनानांवि
स्रब्धोपविष्टानामादितःसर्वमावेदयिष्यामियोयंयच्चानेनकृतमिहचलोकेयथास्यसंभूतिरयंचतावदुपगतश्रमःक्रियतामाहारेण शिवः

=भवयादोभिन्नक्रमसोजःप्रसरस्तस्मादनंतरंमोज्यः॥२=

नियतमयमस्यात्मनोजन्मांतरेदत्तंस्वप्नोपलब्धमनिवद्यमितिकथयतिसर्वमेषभवतःस्मरिष्यतीत्यभिदधदेवोत्थायसहमुनिभिःस्नानादि
कमुचितंदिवसव्यापारमकरोत्‌:अनेनचसमयेनपरिणतोदिवसः॥स्नानोत्थितेनखलुनिजनेनार्घविधिमुपपादयतायःक्षितितलेद
त्तस्तमंबरतलगतःसाक्षादिवरक्तचंदनांगरागंविरुद्वहत्‌:ऊर्ध्वमुखैरर्कबिंबविनिहितदृष्टिभिरूष्मपैस्तपोधनैरिवपरि
पीयमानतेजःप्रसरे॥विरलातपोदिवसस्यनिमानमभजत्‌:उद्यत्सप्तर्षिसार्थस्पर्शपरिजिहीर्षयेवसंहृतपादःपारावतच
रणपाटलरागोरविरंबरतलादलंबत‌:आलोहितांशुजालंजलशयनगतस्यमधुभिदोविगलन्मधुधारमिवनाभिनलिनं
प्रतिमागतमपरार्णवेसूर्यबिंबमलक्ष्यत‌:विहायधरणितलमुच्चकमलिनीवनानिशकुनयइवदिवसावसानेतपोवनतरु
शिखरेषुपर्वताग्रेषुचरविकिरणाःस्थितिमकुर्वत‌:लग्नरक्तातपच्छेदामुनिभिरालंबितालोहितवल्कलाइवाश्रमतरवःक्षण
मदृश्यंत‌:अस्तमुपगतेचभगवतिसहस्रदीधितावपरार्णवतलादुल्लसंतीविद्रुमलतेवपाटलासंध्यासमदृश्यत [redacted]

त॰ यस्मिन्नाबध्यमानध्यानमेकदेशमनुलुभ्यमानहोमधेनुदुग्धधाराध्वनि [redacted] मनोहरमग्निहोत्रवेदीविकीर्यमाणहरितकुशमृ
षिकुमारिकाभिरितस्ततो विक्षिप्यमाणदिग्देवताबलिसिक्थमाश्रमपदमभवत्॰ क्वापि विहृत्य दिवसावसाने लोहिततारका तपो
वनधेनुरिव कपिला परिवर्त्तमाना संध्या मुनिभिरदृश्यत॰ अचिरप्रोषिते सवितरि शोकविधुरा कमलमुकुलकमंडलुधारिणी हं
सासितदुकूलपरिधाना मृणालधवलयज्ञोपवीता मधुकरमंडलाक्षवलयमुद्वहंती कमलिनी दिनपतिसमागमव्रतमिवाचर
त्॰ अपरसागरांभसि पतिते दिवसकरे पतनवेगोत्थितमंभःसीकरनिकरमिव तारागणमंबरमधारयत्॰ अचिराच्च सिद्धकन्य
काविक्षिप्तसंध्यार्चनकुसुमशबलमिव तारकितं वियदराजत्॰ क्षणेन चोन्मुखेन मुनिजनेनोर्द्ध्वविप्रकीर्णैः प्रणामांजलिसलिलैः क्षा
ल्यमान इवागलदखिलः संध्यारागः॰ क्षयमुपगतायां संध्यायां तद्विनाशदुःखिता कृष्णाजिनमिव विभावरी तिमिरोद्गममभिनवम
वहत्॰ अपहाय मुनिजनहृदयानि सर्वमन्यदंधकारतां तिमिरमनयत्॰ क्रमेण च रविरस्तमुपगत इत्युदंतमुपलभ्य जातवैराग्यो धौत
दुकूलवल्कलधवलांबरः सनातनपुरुषपर्यंतस्थितननुतिमिरतमालवनलेखं सप्तर्षिमंडलाध्युषितमरुंधतीसंचरणपवित्रमुप

हिताषाढमालक्ष्यमाणमूलमेकांतस्थितचारुतारकमगमम्मरलोकाश्रममिवगगनतलमवततार दिधितिरथतिष्ठत्·चंद्रमसमरुणेनतस्तारकाक
पालशकलालंकृतांबरतलात्र्यंबकोत्तमांगादिवगंगासागरानावतरयंतीहंसधवलाधरण्यामपरजलध्यो ज्योत्स्ना· हिमकरसरसिविकचपुंड ४२
रीकसितेचंद्रिकाजलपानलोभादिवतीरैर्निश्चलमूर्तिरहतपंकलग्नइवादृश्यतहरिणः। तिमिरजलधरसमयापगमानंतरम
भिनवसितसिंदुवारकुसुमपांडुरैरवगलैरगायंतहंसैरिवकुमुदसरःसिचंद्रपादैः। विगलितसकलोदयरागंरजनिकरबिं
बमंबरापगावगाहधौतसिंदूरमैरावतकुंभस्थलमिवतत्क्षणामलस्यत· शनैःशनैश्चहृतेदितेभगवतिहिमगतिसुतिसुधार्ध
लिपद्लेनेवधवलीकृतेचंद्रातपेनजगतिअवश्यायजल [redacted] बिंदुपतनमंथरगतिषुविघटमानकुमुदवनकषायपरिम
लेषुसमुपोढनिशाजरालसतारकैरन्योन्यघटितपक्षपुटैररव्थरोमंथमंथरमुखैस्सुखासीनैरश्रमन्मृगैरभिनंदितागम
नेषुप्रवात्सुनिशासुखसमीरणेषुऊर्ध्वयाममात्रावखंडितायांविभावर्यांहारीतःकृताहारंमामादायसंबंधीनैःसहमुनिभिरूपसत्यैवं

हातपोऽजाबालिरितितपोवनैकदेशेवेत्रासनोपविष्टमनतिदूरवर्त्तिनाजालपादनाम्नाशिष्येणदर्भपवित्रधवित्रपाणिनामंदमंदमुपवीज्यमानमपि
तरमवोचत्ः तातसकलेयमाश्चर्यश्रवणकुतूहलाकलितहृदयासमुपस्थितातापसपरिषदाबद्धमंडलाप्रतीक्षतेऽपनीतश्रमश्चकृ
तोयंपतत्रिपोतस्तदावेद्यतामनेनकृतमयस्मिन्जन्मनिकोवायमभूद्भविष्यतिवेति॰एवमुक्तस्तुमहामुनिरग्रतःस्थितंमामवलोक्य
तांश्चसर्वानेकाग्रान्श्रवणपरान्मुनीन्बुध्वाशनैरब्रवीत्ःश्रूयतांयदिकौतूहलंः अस्तिसकलत्रिभुवनललामभूताप्रसवभूमि
रिवकृतयुगस्यात्मनिवासोचिताभगवतामहाकालाभिधानेनभुवनत्रयसर्गस्थितिसंहारकारिणाप्रमथनाथेनापरेवपृथिवी
समुत्पादिताद्वितीयपृथिवीशंकयाचजलनिधिनेवरसातलगंभीरेणजलपरिखावलयेनपरिवृतापशुपतिनिवासप्रीत्याच
गगनपरिसरोल्लेखिशिखरमालेनकैलासगिरिणेवसुधासितेनप्राकारमंडलेनपरिगताप्रकटशंखशुक्तिमुक्ताप्रवालमरकत
मणिराशिभिश्चामीकरचूर्णवालुकानिकरनिचितैरायामिभिरगस्त्यपरिपीतसलिलैःसागरैरिवमहाविपणिपथैरुपशोभितासु

रासुरसिद्धगंधर्वविद्याधरोरगाध्यासिताभिश्चित्रशालाभिरविरतोत्सवप्रमदावलोकनकुतूहलादंबरतलावतीर्णाभिर्दिव्यविमानपंक्तिभि
रिवालंकृतामृतमथनोद्धृतदुग्धधवलितमंदरद्युतिभिः कनकमयामलकलशशिखरैरनिलदोलायितसितध्वजैरुपरिपतद्गंगैरिव तुषार
गिरिशिखरैरमरमंदिरैर्विराजितोत्संगादृश्यमानसुधावेदिकोपशोभितोदपानैरनवरतचलितजलघटीयंत्रसिच्यमानहरितोपवनांधकारैः
केतकीधूलिधूसरैरुपशल्यकैर्विभूषितामदमुखरमधुकरपटलांधकारितनिष्कुटा स्फुरदुपवनलतापरिमलसुरभिसमीरणा चलितसौ
भाग्यघंटैरालोहितांशुकपताकैः पारावतरक्तचामरैर्विद्रुममयैः प्रतिभवनमुच्छ्रितैर्मकरांकैर्मदनयष्टिकेतुभिः प्रकाशितमकरध्वजपूजा सत
तमध्ययनध्वनिधौतकल्मषास्फालितमुरजरवगंभीरगर्जितेषु सलिलसीकरासारस्तबकरचितदुर्दिनेषु पर्यस्तरविकिरणरचितसु
रचापचारुषु धारागृहेषु मत्तमयूरैर्मंडलीकृतशिखंडैस्तांडवव्यसनिभिरावध्यमानकेकाकोलाहला विकचकुवलयप्रांतैरुत्फुल्लकुमुदधव
लोदरैरनिमिषदर्शनरमणीयैराखंडललोचनैरिव सहस्रसंख्यैरुद्भासिता सरोभिः अविरलकदलीवनकलिताभिरमृतफेनपुंजपांडुरा

का०द०

का०पू०

३६

गिरिशिखरदिशिदंतवक्रभिक्रभिर्धवलीकृता यौवनमदमत्तमालवीकुचकलशलुलितसलिलया भगवतो महाकालस्य शिरसि सुरसरितमालो
क्य समुपजातेर्ष्येव सततसमाबद्धतरंगभ्रुकुटिलेखयारवमिव क्षालयंत्या शिप्रया परिक्षिप्ता [stain] सकलभुवनख्यातयशसा हरजटा
चंद्रेणेव कोटिसारेण मैनाकेनेवाविदितपक्षपातेन मंदाकिनीप्रवाहेणेव प्रकटितकनकपद्मरा[stain]शिना स्मृतिशास्त्रेणेव सभावसथकूपप्रपा
36 न रामसुरसदनसेतुयंत्रप्रवर्त्तकेन मंदरेणेवोद्धृतसमस्तसागर[stain]रत्नसारेण संग्रहीतगारुडेनापि भुजंगसंगभीरुणा [stain] कलोपजीविनापि [stain] मण
धिजनैरुपजीव्यमानविभवेन वीरेणापि विनयवता प्रियंवदेनापि सत्यवादिना अभिरूपेणापि स्वदारसंतुष्टेन परप्रार्थनानभिज्ञेन [stain] पि धर्मप्रधा कामार्थपरेण
नेन महासत्वेनापि परलोकभीरुणा सकलविज्ञानविशेषविदा वदान्येन दक्षेण स्मितपूर्वाभिभाषिणा परिहासपेशलेनोज्वलवेषेण शिक्षिता
शेषदेशभाषेण वक्रोक्तिनिपुणेन आख्यायिकाख्यानपरिचयचतुरेण सर्वलिपिज्ञेन महाभारतपुराणरामायणानुरागिणा बृहत्कथाकु रमः
शलेन द्यूतादिक[stain]लाकलापपारगेण श्रुतरागिणा सुभाषितव्यसनिना प्रशांतेन सुरभिमासमारुतेनेव सततदक्षिणेन हिमगिरिणेवानेन ३६

अतिथिजनाभ्यागमार्थिनापि ५

वांतःसरलेनलक्ष्मणेनेवरामाराधननिपुणेनशत्रुघ्नेनेवाविष्कृतभरतपरिचयेनदिवसेनेवमित्रानुवर्त्तिनाबौद्धेनेवसर्वास्तिवादस्भूदेणसंख्या
गमेनेवप्रधानपुरुषोपेतेनजिनधर्मेणेवजीवानुकंपिनाविलासिजनेनाधिष्ठिता सशैलेवप्रासादैःसशाखानगरेवमहावनैः
सकल्पवृक्षेवसत्पुरुषैर्दर्शितविश्वरूपेवचित्रभित्तिभिःसंध्येवपद्मरागानुरागिणीजन्मराशिपद्मूर्त्तिरिवमरववशतानल
धनदलोपस्तुपतिलास्यक्रीडवसुधाधवलाहंससावृक्षवजालरूपसंपागस्तम्भमूर्त्तिरिवाच्युतास्थितिरमणीयाप्रजानवेले
वप्रकुड्यसर्वलोकाश्रावरवसतिरिवावलंबितचारुचामरनागदंतधवलत्रयशोभमूर्त्तिरिवसदासन्नवसुधाधराजल
धिमथनवेलेवमहाघोषमूरिलदिंगतराप्रस्तुताभिषेकमानिरिवसन्निहितकनकघटसहस्राशोभीवमहासिंहासनोपवि
तमूर्त्तिरदितिरिवदेवकुलसहस्रसेव्यामहावराहलीलेवदर्शितहिरण्याक्षपातालाकरुरिवानंदितभुजंगलोकाहरिवंश
कथेवानेकबालक्रीडारमणीयाप्रकटांगनाभोगाप्यखंडितचारित्रारत्नवर्णपिशुधाधवलावलंबितमुक्ताकलापापि

का॰पू॰
३१
37

विहरन्नषण्मुखप्रकृतिरपिस्थिरोविजितामरलोकद्युतिरवंतीषूज्जयिनीनामनगरी॰यस्यामुत्तुंगसौधोत्संगसंगीतसंगिनीनामंगना
नामतिमधुरेणगीतरवेणाकृष्यमाणोदोलुखरपतुरंगपुंगवः॰पर्यस्तरथपताकापटःकृतमहाकालप्रणामइवप्रतिदिवसमालक्ष्य
तेभगवान्दिवसकरः॰यस्यांचसंध्यारागारुणाइवसिंदूरकुट्टिमेषुप्रारब्धकमलिनीपरिमला इवमरकतवेदिकासुगगनतलप्र
सृताइववैडूर्यमणिभूमिषुतिमिरपटलविघट्टनोद्यताइवकृष्णागरुधूममंडलेषुअभिभूततारकापंक्तयइवमुक्ताप्रालंबेषुविक
चकमलचुंबिनइवनितंबिनीमुखेषुप्रभात चंद्रिकामध्यपतिताइवस्फटिकभित्तिप्रभासुगगन सिंधुतरंगालंबिनइ
वासितपताकांशुकेषुपल्लविताइवसूर्यकांतोपलेषुराहुमुखकुहरप्रविष्टाइवेंद्रनीलवातायनविवरेषुविराजंतेरविगभ
स्तयः॰यस्यांचानुपजाततिमिरत्वाद्विघटितचक्रवाकमिथुनाःव्यर्थीकृतसुरतप्रदीपाःसंजातमदनानलदीप्तिदाहाइवकामि
नीनांमुखप्रभाभिर्यांतिबालातपपिंजरारजन्यः॰यांचसकलहितविषमलोचनामनवरतमतिमधुरोरतिप्रलापइवप्रसर्पन्नु

शिवः
३१

रवरीकरोतिमकरकेतुग्रहारन्तुमृतोभवनकलहंसकुलकोलाहलः।यस्यांच निशिनिशिपवनविलोलैर्दुकूलपल्लवैरुच्छ्वसद्भिर्मालवीमुखकम
लकांतिभिर्निर्जितस्येंदोः कलंकमिवापनयंतो हरप्रसादरितोर्द्भुजाः प्रासादालक्ष्यंते।यस्यांचसौधशिखरशायिनीनांपश्यन्मुखानिपु
रसुंदरीणांमदनपरवशइवप्रपतितः प्रतिमाछलेनलुलितवरुलचंदनजलसेकशिशिरेषुमणिकुट्टिमेषुमृगलांछनः।यस्यांच
निशावसानप्रबुद्धस्यतारतरमपिपठतः पंजरगताः शुकसारिकासमूहस्याभिव्यक्तगृहसारसविस[redacted]तविस्तारिणाविलासि
नीनूपुररवेणविभाव्यमानाव्यर्थीभवंतिप्रभातमंगलगीतयः।यस्यांचानिर्वृत्तिर्मणिप्रदीपानामंतस्तरलतारहारिणामनस्थिति
ःसंगीतमुरजध्वनीनांद्वंद्ववियोगश्चक्रनाम्नांवर्णपरीक्षाकनकानामस्थिरत्वंध्वजानांमिथःद्वेषःकुमुदानांकोशगुप्तिरसीनां।किंच
कृनायस्यांसुरासुरचूडामणिमरीचिचुंबितचरणनखमयूखोनिशितशूलदारितांधकमहासुरोगौरीनूपुरकोटिघृष्टशेखर
चंद्रशकलस्त्रिपुरभस्मरजःकृतांगरागोमकरध्वजध्वंसविधुरयारत्याप्रसादयंत्याप्रसादितकरयुगविगलितवलयनिकरार्चि

तच्चरणः प्रलयानलशिखाकलापकपिलजटाभारभ्रांतसुरसिंधुरंधकारातिर्भगवानुत्सृष्टकैलासवासप्रीतिर्महाकालाभिधानः स्वयं
निवसति। तस्यां चैवंविधायां नगर्यां नलनहुषययातिधुंधुमारभरतभगीरथप्रतिमो भुजबलोपार्जितभूमंडलः फलितशक्तिचयो मति
मानुत्साहसंपन्नो नीतिशास्त्राखिन्नबुद्धिरधीतधर्मशास्त्रस्तृतीय इव तेजसा कांत्या च सूर्याचंद्रमसोरनेकसप्ततंतुपूतमूर्तिरु
पशमितसकलजगदुपप्लवो विधेयकमलवनान्यवगणय्य नारायणवक्षःस्थलवसतिसुखमुत्फुल्लारविंदहस्तया शरत्समागम
व्यसनिन्या निर्व्याजमालिंगितो लक्ष्म्या महामुनिजनसंसेवितस्य मधुसूदनचरणस्येव सुरसरित्प्रवाहस्य प्रभवः सत्यस्य शिशि
रस्यापि रिपुजनसंतापकारिणः स्थिरस्याप्यनवरतं भ्रमतो निर्मलस्यापि मलिनीकृतारातिवनितामुखकमलद्युतेरतिधव
लस्यापि सर्वजनरागकारिणः सुधासूतेरिव जलनिधिकल्पवो यशसः पातालमिव वसत्याश्रितो निजपक्षसौक्षितिभृत्कुलैर्महार्णव इव विबुधानु
गतो मकरध्वज इवोत्सन्नविग्रहो दशरथ इव सुमित्रोपेतः पशुपतिरिव महासेनानुयातो भुजगराज इव क्षमागुरुर्नर्मदाप्रवाह इ

अतिभीतैः २

श्रीतः

वमहावंशप्रभवोऽवतारइवधर्मस्यप्रतिनिधिरिवपुरुषोत्तमस्यरंजानारायीजेनामा नृतं यस्तमःप्रसरमालिनवपुषापायबहुलेन
कलिकालेनचालितमामूलतोधर्मस्थानमनेनेवकैलासमिवपशुपतिरिवावष्टभ्यपुनरपिस्थिरीचकार यंचरतिप्रलापजनित
मिव१ दमाईहृदयमरुरनिर्मितमपरमकरकेतुममंस्तलोकः यंचजलनिधितरंगमेखलात्मचांतर चारितारागणाद्विगुणिततरलतरु
कुसुमप्रकरसुधदिंडुबिंबगलदमृतबिंदुदुर्दिनाईचं स्नादशिशिरकरस्यन्तुरगखुरशिखरोल्लेखखंडितोल्लसल्लवंगप
ल्लवादेरावनकरल्लतशल्लकीकवलादशैलादुद्यनाम्नःकपिबलविलुप्तविरलनलवलीलताफलादुदधिनिर्गतजलदेवता
वंधमानराघवपादादचलपातदलितधरंखकुलधाकलनारकितशिलातलान्मकरतलकलितशैलसहस्रसंभ्रतारासे
तुबंधात्स्थरनिर्दरजलधौतनारकासार्पात्स्मृतमपनोद्यतवैकुंठकेयूरपत्रमकरकोटिकषणमस्खलितग्रावणः सुरासुरे
णावलयितवासुकिसमाकर्षणारंभवलितचरणभरदलितनितंबादमृतसीकरसिक्तसानोराममंदरा चलान्मरनारायणचरण

।मुखरीकृतबदरिकाश्रमरमणीयात्कुबेरपुरस्तुहरीन्द्रशिखरात्सप्तर्षिसंध्योपासनस्थलप्रस्रवणान्नसोढवृकोदरोद्दलितसौगं
धिकषंडसुगंधिमंडलाद्गंधमादनात्सेवांजलिकमलमुकुलदंतुरैःशिरोभिरश्वरणनखसमस्तपथयाथितमुकुटपत्रलतासंघयोभयचकि
ततरलतारकशोभुजबलविजिताःप्रणतसुखनिपाः।येनचानेकरत्नांशुपल्लवितेव्याल्लंबितमुक्ताफलजालकेदिग्गजेनेवकल्पत
रुचाक्रांतेसिंहासनेनरेणशिशिरीसुखव्यतिकंपितालताइवनेमुराधाम्नःसर्वादिशः।यस्मैचमन्येसुरपतिरपिस्पृहयांचका
र।यस्माच्चधवलीकृतभुवनतलःसकललोकहृदयानंदकारीक्रौंचादिवहंसानिवहोनिर्जगामगुणगणः।यस्यचामृता
मोद्धुरासुरपरिमथ्यमानमंदरोद्धतबहलदुग्धसिंधुफेननिचयेनेवधवलीकृतसुरासुरलोकपादपाशासुदिक्षुमुखरितभुवन
नभ्राम्यतकीर्तिः।यस्यचातिदुःसहप्रतापानलदह्यमानेवशरणमपिनमुमोचातपत्रछायांराजलक्ष्मीः।तथाचयस्य हि द्विरद्वि
नियशुश्रावसोपदेशमिवजयायमंगलमिवबहुमेनेमंत्रमिवजजापागमवचनमिवनविसस्मारचरितंजनः।यस्मिंश्चराजनिजि शिवः
ऽसाधारणशक्तिसंपदा६ =लिपिःप्रमाणमनुरोधि... ३९

दीनानां विपक्षता प्रस्थानां पररुंदर्पणानामभिमुखावस्थानं स्रलपालिप्रतिमानां दुर्गाश्लेषः जलधराणां चापधारणं ध्वजानामुन्नतिर्ध
नुषामवनतिर्वंशानां शिलीमुखक्षतिर्देवतानां यात्रा कुसुमानां बंधनास्थितिः इंद्रियाणां निग्रहः वनकरिणां वारिप्रवेशः नैक्ष्ण्यमसि
धाराणां व्रतिनामसिधारव्रतग्रहणं तुलारोहणं अगस्त्योदये विषशुद्धिः केशनखानामापतिभंगः जलददिवसानां मलिनांबर
त्वं रत्नोपलानां भेदः मुनीनां योगसाधनं कुमारस्तुतिषु तारकोद्धरणं धनुरस्य ग्रहाणां शंका शशिनो ज्येष्ठातिक्रमः महाभारते
दुःशासनापराधाकर्णनं वयः परिणामे दंडग्रहणं असिपरिकरे घनकुशयोगो वक्रता कामिनीनां कुचपत्रभंगे पुष्करिणां दानविच्छि
त्तिः अस्तकेऽस्तुभ्रन्थग्रहदर्शनं पार्थिवानामासीत्। तस्य च राज्ञो निखिलकलावगाहगंभीरबुद्धिः शैशवादुपारूढनिर्भरप्रे
मरसो नीतिशास्त्रप्रयोगकुशलो भुवनराज्यभारवोढ्रणधारः महत्स्वपि कार्यसंकटेष्वविषण्णधीः धाम धैर्यस्य स्थानं स्थितेः से
तुः सत्यस्य गुरुर्गुणानां आचार्य आचाराणां धाता धर्मस्य शेषाहिरिव महीभारधारणक्षमः सलिलनिधिरिव महासत्वः जरासंध

इवप्रकटितसंधिविग्रहः अंबरइवसमस्ताधितदुर्गःयुधिष्ठिरइवधर्मप्रभवः सकलवेदवेदांगविदशेषराज्यमंगलैकसारोबृ
हस्पतिरिवसुनासीरस्यकविरिववृषपर्वणः वसिष्ठइवदशरथस्यविश्वामित्रइवरामस्यधौम्यइवाजातशत्रोर्दमनकइव
नलस्यसर्वकार्येष्वाहितमतिरमात्योब्राह्मणःशुकनासोनामासीत्। योनरकासुरशस्त्रप्रहारजीर्णलोभ्रमन्मंदरमणितंवनिर्दय
निष्पेषकठिनांसपीठेनारायणवक्षःस्थलेऽपिस्थितामकुष्कुरलाभामन्मथनप्रज्ञाबलेनलक्ष्मीपंचसमासाघदर्शितानेकराम
फलालनवमहापादपमनेकप्रतानगहनाविस्तारमुपाययोमप्रज्ञायस्यानेकचारपुरुषसहस्र संचाररचि त्रितचतुरुदधि
वलयपरिक्षेपममालेधरातलेभवनइवाविदितमहरहःसमुच्छ्वसितमपिराज्ञांनासीत् सराजाबालएवसुरकुंजर
करपीवरेणराजलक्ष्मीलीलोपधानेनसकलजगदभयप्रदानयज्ञदीक्षाकपनेनस्फुरदसिलतामरीचिजालजटिलेनानिखि राम
लारातिकुलप्रलयधूमकेतुदंडेनबाहुनाविजित्यसप्तद्वीपवलयांवसुंधरांतस्मिन्नसुकनाशनाम्निमंत्रिणिसुहृदीवराज्य ४०

भारमारोप्य सुस्थिताः प्रजाः कृत्वा कर्त्तव्यशेषमपरमपश्यन्प्रशमिताशेषविपक्षतया विगताशंकः शिथिलितपृथिवीआपा

रः प्रायो यौवनसुखान्यनुबभूव। तथाहि। कदाचिदुल्लसत्कठोरकपोलपुलकजर्जरितकर्णपल्लवानां प्रणयिनीनां चंदनरु (पद) जल

धाभिरिव स्मितसुधाछविभिरभिषिच्यमानः कर्णोत्पलैरिव लोचनांशुभिस्ताड्यमानः कुंकुमवासधूलिभिरिवाभरणप्रभा

भिराकुलीक्रियमाणलोचनः धवलांशुकैरिव हारचरचरणमयरजालकैराहन्यमानश्चंपककुसुमदलमालिकाभिरिव भुजलताभिरा

बध्यमानः हस्ताधरधुतकरतलवलयमणिवलयकलकलरवरमणीयमतिरभसदलितदंतपत्रदलदंतुरितोरःस्थलमुत्क्षिप्तचरण

गलदलक्तकरसच्छेदरवरसंभवभासकचयग्रहचलितमणिकर्णपूरमुल्लसितकुचकृष्णागरुपंकपत्रलतांकितमच्छदपटमच्छम

जलकलिकालुलितरोचनातिलकपत्रभंगं अनंगपरवशः सुरतमातनोति। कदाचिन्म करकेयूरकनकनाराचपरंपराभिरिव

कामिनीकरपुटविनिर्गताभिः कुंकुमजलधाराभिः पिंजरीक्रियमाणकायो लोलाक्ताजलछटाभिहारपाटलीकृतदुकूलः मृगमदजल

क्षमल१

बिंदुचंदनस्थासकः कनकशृंगकोशैरम्भिरं चिक्रीड कदाचित्कुचचंदनचूर्णधवलितोर्मिमालं चटुलतुलाकोटिवाचालचरणालक्तकासिक्तहं
समिथुनममलकमनिपतितकुसुमशारं लवमानकर्णपूरकुवलयदलसुगन्धितानिलं वक्षोभजर्जरिततरंगमुच्छलितनालपर्यस्तनलिननिपाति
तमधुलिपटलमनवरतकरास्फालनस्फुरत्फेनबिंदुचंद्रकितं सावरोधजनो जलक्रीडया दीर्घिकाणामंभश्चकार· कदाचित्संकेतवंचिता
भिः प्रणयिनीभिराबद्धभंगुरभ्रुकुटीभिरारणितमणिपारिहार्यमुखरभुजलताभिर्बकुलकुसुमावलीभिः संयमनचरणेन स्वकीकरण
विमिश्रैः कुसुमदामभिः कृतापराधो दिवसमताड्यत· कदाचित्कुलतरुरिव कामिनीगंडूषसीधुधारास्वादमुदितो विकासमभजत·
कदाचिदशोकपादप इव युवतिचरणनलप्रहारसंक्रान्तालक्तकोरागमुवाह· कदाचिन्मुसलायुध इव चंदनधवलः कंठावसक्तो
घ्रसवकोलकुसुममालः पानमसेवत· कदाचिदंधगज इव मदरक्तकपोलदोलायमानकर्णपल्लवो मदकलः काननं विकचवनलता
कुसुमसुरभिपरिमलं जगाहे· कदाचित्कणितमणिनूपुरनिनादानंदितमानसो हंस इव कमलवनेषु रेमे· कदाचिन्मृगपतिरिव स्कंधा

बलंबिकेसरमालः क्रीडापर्वतकेषु विचचार· कदाचिन्मधुकर इव विकचनमालकुसुममुकुलं तु रेणुलताग्रहेषु बभ्राम· कदाचिन्नीलपटविरचि
तावगुंठनो बहुलनिशाप्रदोषदत्तसंकेताः सुंदरीरभिससार· कदाचिच्च विघटितकनककपाटप्रकटवातायनेषु नवतरसमागमकुत्लागक
भ्रमरकैरिव पारावतैरध्यासितविटंकेषु मणिप्रासादकुक्षिषु कतिपयाप्तसुहृत्परिवृतो वीणावेणुमुरजमनोहरतममंतःपुरसंगी
तकं ददर्श· किं बहुना यद्यदतिरमणीयमभिमतमविरुद्धमायत्यां तदत्त्वेच तत्तदनाक्षिप्तचेताः परिसमाप्तत्वादन्येषां पृथ्वीव्यापा
राणां सिषेवे न तु व्यसनितया· प्रमुदितप्रजस्य हि परिसमाप्तसकलमहीप्रयोजनस्य नरपतेर्विषयोपभोगलीलालक्षणमितर
स्य तु विडंबना· प्रजानुरागहेतोश्चानवरतमादर्शनं ददौ विलासनं च निमित्तेष्वारुरोह· शुकनाशोपि महांतं राज्यभारमनायासेनै
व प्रज्ञाबलेन बभार· यथैव राजा सर्वकार्याण्यकार्षीत्तद्वत्सोऽपि द्विगुणीकृतप्रजानुरागश्चक्रे· तमपि चलितचूडामणिमरीचिमं
जरीजालिभिर्मौलिभिरावर्जितकुसुमशेखरच्युतमधुसीकरसिक्तसमंतूरावनतिप्रेषितमणिकुंडलकोटिक्षतघटितांगदं राजकमा

का॰पू॰

तराला ~

ननाम॰ तस्मिन्नपिचलितेचलितचटुलतुरगबलखुरखरवबधिरीकृतभुवनांबलभरप्रचलवसुधातलदोलायमानगिरयोगलन्मदं
धगंधगजदानधारांधकाराः संसर्पद्दंतिबहलधूलिपटलधूसरितसिंधवः प्रबलपदातिकलकलरवस्फोटितश्रवणाः सरभसो
त्क्षुभ्यमाणजयशब्दनिर्भराः श्रूयमाणधवलचामरसहस्रसंछादिताः पुंजितनरेंद्रवृंदकनककलशातपत्रसंघट्टनष्टदिवसाश्च
दिशोबभ्रमुः॥ एवंतस्यराज्ञोमंत्रिविनिवेशितराज्यभारस्ययौवनसुखमनुभवतःकालोजगाम॰ अथसचकालेनान्येषामपिजीव
लोकसुखानांप्रायःसर्वेषामंतंययौ॰ एकंतुतनयमुखदर्शनसुखंनलेभे॰ तथासंभुज्यमानमपिनिष्फलपुष्पदर्शनंशरवणमि
वांतःपुरमभवत्॰ यथायथाचयौवनमतिचक्रामतथातथाविफलमनोरथस्यानपत्यताजन्मामहानवर्धतास्यसंतापः॥ विषयो
पभोगसुखेभ्यश्चनिश्चमनोविजज्ञे॰ नरपतिसहस्रपरिवृतमप्यसहायमिवचक्षुष्मंतमप्यंधमिवभुवनालंबनमपिनिरालंब
नमिवात्मानममन्यत॰ अथतस्यचंद्रलेखेवहरजटाकलापस्यकौस्तुभप्रभेवकैटभारातिवक्षःस्थलस्यवनमालेवमुसलायु

शिवः

सुधस्यवेलेवसागरस्यमदलेखेवदिग्गजस्यलतेवपादपस्यकुसुमोद्गतिरिवकुसुममासस्यचंद्रिकेवचंद्रमसःकमलिनीवसरसःतारापं
क्तिरिवनभसःहंसमालेवमानसस्यचंदनवनराजिरिवमलयस्यफणामणिशिखेवशेषस्यभूषणमभुवनत्रिभुवनविस्मयजननीजन
नीववनिताविभ्रमाणांसकलांतःपुरप्रधानभूतामहिषीविलासवतीनाम।एकदाचनृपोवासगतस्तांचिंतास्तिमितदृष्टिनाशोकत्
केनपरिजनेनपरिवृतामाराद्वस्थितैश्चध्याननिमिषलोचनैःकंचुकिभिरुपास्यमानामनतिदूरवर्तिनीभिश्चांतःपुरवृद्धाभिरा
श्वास्यमानामविरलाश्रुबिंदुपातार्द्रीकृतदुकूलामनलंकृतांवामकरतलविनिहितमुखकमलामसंयताकुलालकांसुनिवि
डपर्यंकिकोपविष्टांरुदतींददर्श।कृतप्रत्युत्थानांचतांतस्यामेवपर्यंकिकायामुपवेश्यस्वयंचोपविश्याविज्ञातबाष्पवेगकार
णोभीतभीतइवकरतलेनविगतबाष्पांभःकणौकुर्वन्कपोलौभूपालस्तामवादीत्।देविकिमर्थमंतर्गतशोकभारमंथरमश्रुदुं
ध्यते।प्रक्षंतिहिमुक्ताफलजालकमिवबाष्पबिंदुनिकरमेनास्तावपक्ष्मपंक्तयः।किमर्थंचकृशोदरिनालंकृतासिबालातपश्चर
कारविंदकोशयोरयंकिमितिनपातितश्चरणयोरलक्तकरसः।कुसुमधन्वसरःकलहंसकौकस्मात्पंकजस्पर्शेननानुगृहीतौमणि

नूपुरे किंनिमित्तमयमपगतमेखलाकलापश्रोणिमध्यभागः किमिति चरणेइव हरिणलांछनेन लिखितः कुचाग्ररूपत्रभंगः पयोधरभा
रेकेन कारणेन लग्नीयं हरमुकुटचंद्रलेखेव गंगास्रोतसा न विभूषिता हारेण वरोरु शिरोधरा किं यथाव[illegible]हसितविलासिनि स्रवदश्रु
जलप्लवधौतकुंकुमपत्रलेखं कपोलयुगमिदं च कोमलांगुलिदलनिकरं रक्तोत्पलमिव करतलं किमिति कर्णपूरतामारोपितमिमां
च केन हेतुना मानिनि धारयस्यत्तु परचितगोरोचनाबिंदुतिलकामसंयमितालकिनी ललाटलेखामयं च नेवकुलपक्षप्रदोषश्व
चंद्रलेखाविरहितः करोति मे दुःखमतिबहलतिमिरपटलांधकारैः केशपाशः प्रसीद निवेदय देवि दुःखनिमित्तमेतेहि पल्ल
वमिव सरागं मम हृदयमाकंपयंति निरंतरलीकृतस्तनांशुकास्तवायताः श्वासमरुतः कच्चिन्मयापरद्धमन्येन वा केन चिदस्मदनुजी
विना परिजनेनातिनिपुणमपि परिचिंतयन्नपराधमिव खलु सुवल्लिलमल्पमप्यात्मनस्त्वद्विषये तदायत्तं हि मे जीवितं च राज्यं च कथ्य
तां सुंदरि शुचः कारणमित्यभिधीयमानापि विलासवती यदा न किंचित्प्रतिवचः प्रतिपेदे तदा विरुद्धबाष्पहेतुमस्याः परिजनमपृच्छ
त्। अथ तस्यास्तांबूलकरंडवाहिनी सततप्रसासन्ना मकरिकानाम राजानमुवाच देव कुतो देव्याः स्वल्पमपि परिस्खलितमभि

मुखेचदेवेकाशक्तिःपरिजनस्याप्यस्यवाकस्यचिद्वक्तुंकिंतुमहाराजस्यैस्तेवविफलमनोरथंइसमागमात्स्मीसयमस्यादेव्याःसंतापःसुमहां
श्चकालःसंतप्यमानायाःप्रथममपिस्वामिनीदानवश्रीरिवसततनिंदितसुरलायतनस्नानभोजनभूषणपरिजनादिषुसकुचितेषपिद्
वसव्यापारेषुकथंकथमपिपरिजनप्रयत्नात्प्रवर्त्यमानासशोकेवासीत्तदेवहस्यपीशपरिजिहीर्षयानदर्शितवतीविकारंजघत्तुचतुर्द
शीतिभगवंतंमहाकालमर्चितुमितोगतयातत्रमहाभारतेवाच्यमानेश्रुतमपुत्राणांकिलनसंतिलोकाःशुभाःपुन्नाम्नोनरकात्त्रायतइति
पुत्रइत्येतच्छ्रुत्वाभवनमागत्यपरिजनेनसशिरःप्रणाममभ्यर्थ्यमानापिनाहारमभिनंदतिनभूषणपरिग्रहमाचरतिनोत्तरंप्रतिपद्य
तेकेवलमविरलवाष्पदुर्दिनांधकारितमुखीतिष्ठतिएतदाकर्ण्यदेवःप्रमाणमित्यभिधायविरराम·विरतवचनायांतस्यांअवनिपाल
त्कस्मीमुहूर्त्तमिवस्थित्वादीर्घमुष्णंचनिश्वस्यनिजगाद·देविकिमत्रक्रियतांदैवायत्तेवस्तुन्यतिमात्रमलंरुदितेननवयमनुग्राह्याःप्रायो
देवतानामात्मजपरिष्वंगामृतास्वादसुखस्यनूनमनाजनमस्माकंहृदयमन्यस्मिन्जन्मनिनकृतमवदातंकर्मजन्मांतरकृतंहिकर्मफ
लमुपनमतिपुरुषस्येहजन्मनिनहिशक्यंदैवमन्यथाकर्त्तुमभियुक्तेनापियावन्मानुष्यकेशक्यमुपपादयितुंतावत्सर्वमुपपाद्यतामधि

का॰सू॰
४४
44

कांकुरुदेविगुरुषुभक्तिं द्विगुणामुपपादयदेवतानांपूजामस्मिजनसपर्यामनुदर्शितादराजनवपरं हि दैवतमृषयो यत्नेनाराधिता यथासमीहि
तफलानामतिदुर्लभानामपिवराणांदातारोभवंति। श्रूयतेहिचंडकौशिकप्रभावात्मगधेषुवृहद्रथोनाम राजाजनार्दनस्यजेतारमनु
लभुजबलमप्रतिरथंजरासंधंनामतनयंलेभे। दशरथश्चराजापरिणतवयाविभांडकमहामुनिसुतस्यऋष्यशृंगस्यप्रसादाना
रायणभुजानिवाप्रतिहतानुदधीनिवाक्षोभ्यानवापचतुरःपुत्रान्। अन्येचराजर्षयस्तपोधनानाराध्यपुत्रदर्शनामृतस्वादसु
खभाजोबभूवुरमोघफलाहिमहामुनिसेवाभवति। अहमपि [redacted] खलुदेविकदासमुपारूढगर्भभरालसामापांडुमुखीमासन्नचं
द्रोदयामिवपौर्णमासीनिशांदेवींद्रक्ष्यामि। कदामेतनयजन्ममहोत्सवानंदनिर्भरोहरिष्यतिपूर्णपात्रंपरिजनः। कदाहारिद्रवसन
धारिणीसुतसनाथोत्संगाद्यौरिवोदितरविमंडलासबालातपामामानंदयिष्यतिदेवी। कदासर्वौषधिपिंजरजटिलकेशोनि
हितरक्षाघृतबिंदुनितालुनिविन्यस्तगौरसर्षपोन्मिश्रभूतिलेशोगोरोचनाचित्रकंठसूत्रग्रंथिरुत्तानशयोदशनशून्यस्मितानन:
पुत्रकोजनयिष्यतिमेहृदयाह्लादं। कदागोरोचनाकपिलद्युतिरंतःपुरिकाकरतलपरंपरासंचार्यमाणमूर्तिरशेषजनवंदितोमंगल

शिवः
४५

प्रदीप इव मे शोकांधकारमुन्मूलयिष्यति चक्षुषोः कदा च क्षितिरेणुधूसरो मंडयिष्यति मम हृदयेनोद्दिश्या च सह पदिभ्रमन्भवनांगणं
कदा केसरिकिशोरक इव संजातजानुचंक्रमणो वस्यः संचरिष्यतीतस्ततः स्फटिकमणिभित्यंतरिता भवनमृगशावकान्जिघृक्षुः कदा
ऽन्तःपुरनुपुरनिनादसंगतान्गृहकलहंसकाननुसरन्कक्षांतरप्रधाविता कनकमेखलाघंटिकारवानुसारिणीमायासयिष्यति धात्रीं
कदा कृष्णागरुपंकलिखितमदलेखालंकृतगंडस्थलको मुखरवडिंडिमध्वनिजनितप्रीतिरूर्ध्वकरविप्रकीर्णचंदनचूर्णधूलिधूसरः कुंचि
तांगुलिशिखरांकुशाकर्षणविधुतशिराः करिष्यति मत्तगजराजलीलाम् ऽः। कदा मातुश्चरणयुगलरागोपयुक्तशेषेण पिंडालक्तकरसे
न वृद्धकंचुकिनां विडंबयिष्यति मुखानि कदा कुतूहलचंचललोचनो मणिकुट्टिमेषु पोदत्तदृष्टिरनुसरिष्यति स्ववलक्कतिरात्मनः प्रति
बिंबानि कदास्थानरेंद्रसहस्रप्रसारितभुजयुगलालिंग्यमानागमनो भूषणमणिप्रभावलेखाकुलीक्रियमाणलोलदृष्टिरास्थानस्थितस्य
मे पुरः पर्यटिष्यति सभांतरेष्वित्येतानि च मनोरथशतानि चिंतयतोऽन्तः संताप्यमानस्य प्रयांति रजन्यो ममापि दहत्येवायमहर्निशमन

का॰पू॰
४५
45

तद्वानपत्यतासमुद्भवः शोकः शून्यमिवमेप्रतिभातिजगदफलमिवपश्यामिराज्यमप्रतिविधेयेतुविधातरिकिंकरोमितन्मुच्यतामयंदेविशोका
नुबंधआधीयतांधैर्येधर्मेचधीर्धर्मपराणांहिसदासमीपसंचारिण्यःकल्याणसंपदोभवंतीत्येवमभिधायसलिलमादायस्वयंकरतलेना
भिनवपल्लवेनेवविकचकमलोपमानमाननमस्याःसाश्रुजलंममार्ज॰पुनःपुनश्चप्रियशतमधुराभिःशोकापनोदननिपुणाभिर्धर्मोपदेश
गर्भाभिर्वाग्भिराश्वास्यसुचिरंस्थित्वानरेंद्रोनिर्जगाम॰निर्गतेचतस्मिन्मंदीभूतशोकावेगाविलासवतीयथाक्रियमाणमाभरणपरिग्रहादिक
मुचितंदिवसव्यापारमन्वतिष्ठत्॰ततःप्रभृतिसुतरांदेवताराधनेषुब्राह्मणपूजासुगुरुजनसपर्यासुचादरवतीबभूव॰यद्यच्चकिंचित्
कुतश्चिच्छुश्रावगर्भतृष्णयातत्तत्सर्वंचकारनमहांतमपिक्लेशमजीगणत्॰अनवरतदह्यमानगुग्गुलुबहलधूमांधकारितेषुचंडिकागृहेषु पु॰२
धवलांबरसुचिर्निरुपोषिताहरितकुशोपच्छदेषुसुसत्वशयनेषुसुष्वाप॰पुण्यसलिलपूर्णैर्विविधकुसुमफलोपेतैःक्षीरतरुपल्ल
वलांछनैःसर्वरत्नगर्भैःशातकुंभकुंभैर्गोकुलेषुवृद्धगोपवनिताकृतमंगलाशुलक्षणसंपन्नानांगवामधःसस्नौ॰प्रतिदिवसमुत्थायो

शिवः
४५

स्थापसर्वरत्नोपेतानि हैमानि तिलपात्राणि ब्राह्मणेभ्यो ददौ· महानरेंद्रालिखितमंडलमध्यवर्त्तिनी विविधवलिस्नानानंदितदिग्देवतानि बहु
लपक्षचतुर्दशी निशासु चतुष्पथेषु स्नपनमंगलानि भेजे· सिद्धायतनानि कृतविचित्रोपयाचितकानि सिषेवे· दर्शितप्रसादेश्वणानिस
न्निधानमातृभवनानि जगाम· प्रसिद्धेषु नागकुलह्रदेषु ममज्ज· अश्वत्थप्रभृतीनुपपादितपूजान्महावनस्पतीन्कृतप्रदक्षिणमव
वंदे· दोलायमानवलयेन पाणियुगलेन स्नाना स्वयमखंडसिक्थसंपादितं रजतपात्रे पयसि गृहीतं वायसेभ्यो दध्योदनबलिम
दात्· अपरिमितकुसुमधूपविलेपनपुष्पपल्लवपायसबलिलाजकलितां महतीं अंबादेवीसपर्यामाततान· स्वयमुपहृतपि
ण्डपात्रान्भक्तिप्रवणेन मनसा सिद्धादेशान्नग्नक्षपणकान्पप्रच्छ· विप्रप्रश्निकादेशवचनानि बहु मेने· निमित्तज्ञानुपचचार· शकु
नज्ञानविदः सादरमदर्शयत्· अनेकवृद्धपरंपरागतानि रहस्यान्यंगीचकार· दर्शनागतं द्विजजनमात्मजदर्शनोत्सु
का वेदस्मृकतीरकारयत्· अनवरतं च वाच्यमानाः पुण्यकथाः शुश्राव· गोरोचनालिखितभूर्जपत्रगर्भान्मंत्रकरंडकानुवाह

का॰ पू॰
४६
४६

रक्षाप्रतिसरोपेतान्योषधीसूत्राणि बबंध॰ परिजनोपि चास्याः सततमुपसुप्तो निर्जगाम मल्लिमित्ता निर्जग्माहः॰ शिवाभ्यो मांसबलिविं
डम्बनुदिनं निशि समुत्ससर्ज॰ स्वप्नदर्शनाश्चर्याण्याचार्याणामाचचक्षे॰ चत्वरेषु शिवबलिमुपजहार॰ एवं च गच्छति काले कदा
चित्सजाक्षीणभूयिष्ठायां रजन्यामल्पशेषपांडुतारके जरत्पारावतपक्षधूम्रे नभसि स्वप्ने सितप्रासादशिखरस्थिताया
विलासवत्याः करिण्या इव बिसपल्लवमानने सकलकलापरिपूर्णमंडलं शशिनं विशंतमद्राक्षीत्॰ प्रबुध्य चोत्थाय हर्षवि
कासस्फीततरेण चक्षुषा धवलीकृतवासभवनं तस्मिन्नेव क्षणे समाहूय शुकनासाय तं स्वप्नमकथयत्॰ स तं समुप
जातहर्षः प्रत्युवाच॰ देव संपन्नाः सुचिराद्स्माकं प्रजानां च मनोरथाः कतिपयैरेवाहोभिरसंदेहमनुभवति स्वामी सुतमु
खकमलावलोकनसुखमद्य खलु मयापि निशि स्वप्ने धौतसकलवाससा शांतमूर्तिना दिव्याकृतिना द्विजेन विकचं चं
द्रकलावदातदलमुत्तमालोलकेसरसहस्रजटालं मकरंदबिंदु [redacted] सीकरवर्षि पुंडरीकमुत्संगे देव्या मनोरमाया निहि शिवः

४६

हितंहृदं·आवेदयंतिचप्रत्यासन्नमानंदमग्रपातीनिशुभानिनिमित्तानिकिंवान्यदस्मादितरमधिकमानंदकारणमतोभविष्यति·अवितथ
फलाश्चप्रायोनिशावसानसमयदृष्टाभवंतिस्वप्नाः।सर्वथानचिरेणमांधातारमिवधौरेयंसर्वराजर्षीणांभुवनानंदहेतुमात्मजंजननीजनयि
ष्यतिशिशिरकालकमलिनीवाभिनवकमलेनगंधगजमाह्लादयिष्यतिस्त्वं·येनेयंदिग्गजमदलेखेवाविच्छिन्नसंतानास्मिन्निभार
धारणोचितानविषमतिकुलसंततिःस्वामिनइत्येवमभिदधानमेवतंकरेणगृहीत्वानरेंद्रःप्रविश्याभ्यंतरमुभाभ्यामपिताभ्यांस्व
भ्यांविलासवतीमानंदयांचकार·कतिपयदिवसापगमेचदेवताप्रसादात्सरसीमिवप्रतिमाशशीविवेशगर्भोविलासवतीं
येननंदनवनराजिरिवपारिजातेनमधुसूदनवक्षःस्थलीवकौस्तुभमणिनासुतरामराजतदर्पणश्रीरिवगर्भच्छलेनसंक्रां
तमवनिपालबिंबमुवाह·साशनैःशनैश्चप्रतिदिनमुपचीयमानगर्भानिर्भरपरिपीतसागरसलिलभरमंथरेवमेघमालामंदं
मंदंसंचचार·मुकुलकुसुमविकासिनीकमाजिलितलोचनंसालसंनिश्वास·तथावस्थांचतामहरहःस्वयमनेकरसवांछित

47

पानभोजनंग्राहयन्निवश्यामायमानपयोधरमुखीकेतकीगर्भपत्रविपांडुरामालोकेंगितकुशलःपरिजनो विज्ञातवान् अथतस्याःसर्व
जनप्रधानभूतासहराजकुलसंवाससचतुरासदाचराजसान्निकर्षप्रगल्भासर्वमंगलकुशलाकुलवर्द्धनानाममहत्तरिकाप्रशस्तेदिव
सेप्रदोषवेलायामभ्यंतरस्थानमुपगतंगंधतैलावसेकज्वलितदीपिकासहस्रपरिवारमुडुनिकरमध्यवर्त्तिनमिवपौर्णमा
सीशशिनमुरगराजफणामणिसहस्रांतरालस्थितमिवनारायणंमूर्द्धावसिक्तैःप्रधाननरेंद्रैःपरिमितैःपरिवृतमनतिदूरएव
स्थितपरिजनमनंतरमुत्तुंगवेत्रासनोपविष्टेनधौतधवलांबरपरिधानेनातुल्यगुणवेषेणजलनिधिनेवागाधगांभीर्येणस
मुपारूढविस्रंभनिर्भरास्तास्ताःकथाःशुकनाशेनसहकुर्वाणंभूमिपालमुपसृत्यसरहःकर्णमूलेकिलविलासवतीगर्भवृत्तांत
मकार्षीत् तेनतुतस्यावचनेनाश्रुतपूर्वेणासंभाव्येनामृतरसेनेवसिक्तसर्वांगस्यसद्यःप्ररूढरोमांकुरनिकरकंटकितत
नोरानंदरसेनविह्वलीक्रियमाणस्यस्मितविकसितकपोलस्थलस्यपरिस्फुरितहृदयातिरिक्तंहर्षमिवदशनांशुविलानच्छलेनवि

किरणोराज्ञःशुकनाशमुखेलोलतारकमानंदजलबिंदुक्लिन्नपक्ष्ममालंनिश्चलंपपातचक्षुः।अनालोचितपूर्वंतुतंहर्षप्रकर्षमतिसमीपस्थमुपनेः
कुलवर्द्धनांचस्मितविकसितमुखीमागतांदृष्ट्वातस्यचार्थस्यसत्यतांमनसिविपरिवर्त्तमानतयाविदितवृत्तांतोपितत्कालोचितमपरमतिम
हेतोर्हर्षस्यकारणमपश्यन्शुकनाशःस्वयमुल्लेख्यसमुत्सर्पितासनःसमीपतरमुपसृत्यनातिप्रकाशमाबभाषे।देवकिमस्तिकिंचि
त्तस्मिन्स्वप्नदर्शनेसत्यं।अत्यंतमुत्फुल्ललोचनाहिकुलवर्द्धनादृश्यतेदेवस्यापीदंप्रियवचनश्रवणकुतूहलादिवश्रवणांतमुपस
र्पदुपरचयदिवनीलकुवलयकर्णपूरशोभामानंदजलपरिप्लुतंतरलतारकंविकसद्दृश्यतेमहतोहर्षकारणमीक्षणयुग
लं।उपारूढमहोत्सवश्रवणकुतूहलमुत्सुकोत्सुकंक्राम्यतिमेमनस्तत्कथयतुदेवःकिमिदमुक्तमित्युक्तवतितस्मिन्राजाविह
स्याब्रवीत्।यदियमनयाप्याकथितंतथासर्वमवितथंस्वप्नदर्शनं।अहंतुनश्रद्दधे।कुतोऽस्माकमियतीभाग्यसंपत्।अभा
जनंहिवयमीदृशानांप्रियवचनश्रवणानामवितथवादिनीमप्यहंकुलवर्द्धनामेवंविधानांकल्याणानामसंभावितत्वादात्मानंमन्यमानोविपरी

तामिवाधपश्यामि॰नतुनिश्चयमेवगच्छामिकिमत्रसत्यमितिदेवीमुक्त्वास्मामीत्यभिधायविसर्ज्यसकलंनरेंद्रलोकमुन्मुच्यचस्वांगेभ्यआभ
रणानिकुलवर्द्धनायैदत्त्वातयास्तप्रसादानंतरमवनितलाश्लिष्टललाटलेखयाशिरःप्रणामेनाभ्यर्चितःशुकनासेनोत्थायएवं
त३ विशेषनिर्भरेणापूर्यमाणोमनसापवनचलितनीलकुवलयदललीलाविडंबकेनदक्षिणेनाक्ष्णापरिस्फुरताभिनंद्यमानस्तोककाल
सेवासमुचितेनविरलविरलेनपरिजनेनानुगम्यमानःपुरःसंसर्पिणीनामनिललोलस्फुरच्छिखानांप्रदीपिकानामालोकेनस
मुत्सार्यमाणकक्षांतरतिमिरसंहतिरंतःपुरमयासीत्॰तत्रसुकृतरक्षासंविधानेनवसुधाधवलितेप्रज्वलितमंगलप्रदीपेपूर्ण
कलशाधिष्ठितद्वारपक्षकेप्रशस्तलिखितमंगल्यलेख्योज्ज्वलभित्तिभागमनोहारिणिउपरचितसितवितानवितानपर्यंतावबद्ध
मुक्तागुणेमणिप्रहततिमिरेवासभवनेभित्तिलिखितपत्रलताक्षररक्षापरिक्षेपंशयनशिरोभागविन्यस्तधवलनिद्राकलशं
आबद्धविविधौषधिमूलमंत्रपवित्रमवस्थापितरक्षाशक्तिवलयमितस्ततोविप्रकीर्णगौरसर्षपमवलंबितबालनयोक्त्रग्रथितलोहपि

त३

पल्लपत्रमासक्तहरिद्रादिग्धपल्लवमुत्तुंगपादपीठप्रतिष्ठितमिंदुदीधितिधवलप्रच्छदपटमचलराजशिलातलविशालं गर्भोचितं शयनतल
मधिशयानां कनकपात्रपरिगृहीतैरविच्छिन्नविरलावस्थितदधिलवैर्जलतरंगतरलासितशालिक्षिप्यनिकरैरध्यापितकुसुमां
ञ्जलिसनाथैः पूर्णभाजनैरखंडिताननमत्स्यपटलैश्चप्रत्यग्रपिशितपिंडमिश्रैरविच्छिन्नसलिलधारानुगम्यनमार्गैः पटलकप्र मा३
ज्वलितैश्चशीतलप्रदीपैश्चगोरोचनामिश्रगौरसर्षपैश्चसलिलांजलिभिश्चाभिचारकुशलेनांतःपुरजरतीजनेन क्रियमाणाव
तरणकमंगलांधवलांबरविविक्तवेषेणप्रमुदितेनप्रस्तुतमंगल्यप्रायालापेनपरिजनेनोपास्यमानामुपारूढगर्भतयान्तर्ग
तकुलशैलामिवक्षितिंसलिलनिमग्नैरावतामिवमंदाकिनींगुरुणागतसिंहामिवगिरिराजमेखलांजलधरपटलांतरितदिन
करामिवदिवसश्रियमभ्युदयगिरितिरोहितशशिमंडलामिवविभावरीमभ्यर्णकमलविनिर्गमामिवनारायणनाभिमासन्नागस्त्योदया
मिवदक्षिणाशांफेनावृतकलशामिवक्षीरोदवेलांगोरोचनाचित्रितदशामनुपहतमतिधवलंदुकूलयुगलंवसानांविलासवतीं

ताम॰

दर्श॰ ससंभ्रमपरिजनप्रसारितकरतलावलंबनावष्टंभेनवामजानुविन्यस्तहस्तपल्लवाप्रचलितरत्नाभरणमणिरवमुखरमुत्तिष्ठंतीविला
सवतीमलमलमत्यादरेणदेविनोत्थातव्यमित्यभिधायसहतयातस्मिन्नेवशयनीयेपार्थिवःसमुपाविशत्॰प्रमृष्टचामीकरचारुपादेधव
लोपच्छदेचासन्नेऽपिशयनांतरेशुकनाशोन्यषीदत्॰अथतामुपारूढगर्भामालोक्यहर्षनिर्भरमंथरेणमनसाप्रस्तुतपरिहासोराजादेविशुक
नाशःपृच्छतियदस्मत्कुलवर्द्धनाकिमपितत्किंतथैवेत्युवाच॰अथाव्यक्तस्मितच्छुरितकपोलाधरलोचनालज्जयाधस्तानांशुजालक
व्याजेनांशुकेनवक्रमुखमाच्छादयंतीविलासवतीतत्क्षणमधोमुखीतस्थौ॰पुनःपुनश्चानुबध्यमानाकिंमामतिमात्रंत्रपापरवशां
करोषिनाहंकिंचिदपिवेद्मीत्यभिदधानातिर्यग्वलिततारकेणचक्षुषावनतमुखीराजानंसाभ्यसूयमिवापश्यत्॰अपरिस्फु
टहासज्योत्स्नाविशदेनमुखशशिनाभूभुजांपतिरेनांभूयोबभाषे॰सुतनुयदिमदीयेनवचसातवत्रपाविधीयते॰तदयमहंस्थितो
निभृतं॰अस्यतुकिंप्रतिविधास्यसिविघटमानदलकोशविशदचंपकच्छवेःसवर्णतयापरिमलानुमीयमानकुंकुमांगरागस्यां
गस्य

श्री

[redacted]

पांडुरतामापाद्यमानस्याननस्याश्वगर्भसंभवामृतावसेकनिर्वाप्यमानहृदयशोकानलभस्मवंभ्रममिव वमतोगृहीतनीलोत्पलयोरिव चूचुका
कपोलस्तमालपल्लवलांछितनुखयोरिव कनककलशयोः सकृद्दिवालिखितकृष्णागरुपंकपत्रलतयोःश्यामायमानचूचुकयो
:पयोधरयोःप्रत्यहमतिदिनमतिगाढतरतामापाद्यमानेन कांचीकलापेन दृश्यमानस्य त्रिवलिलेखावलयस्य क्रशिमानमुज्झ
तोमध्यभागस्यैवं बहुविधामवनिपालमंतर्मुखाविर्भूतहर्षः शुकनाशो देव किमायास्यसि देवीनियमनया कथमपि
लज्जालेख्यजकुलवर्द्धनाकथितवार्त्तासंबद्धमालापमपीत्यब्रवीत्॥ एवं विधाभिश्चानर्मप्रायाभिः कथाभिः सुचिरं स्थि
त्वा स्वभवनमयासीत्॥ नरेंद्रोपि तस्मिन्नेव वासगृहे तया सह तां निशामसमारुह्यत्॥ ततः क्रमेण यथासमीहितगर्भदोह
दसंपादनप्रमुदितापरैर्ल्लप्रसवसमयेषु लेहन्यनवरतगलन्नाडिकाकलितकालकलैर्बहिरवहितशयैर्गणकैर्गृहीतेल
ग्नेप्रशस्तायां वेलायामिरंमदमिव जलधरमाला सकललोकहृदयानंदकारिणं विलासवती सुतमसूत॥ तस्मिन्जाते स

रनसमितस्ततः प्रधावितजनस्य चरणकृतसंक्षोभवलितक्षितितलोऽन्तःपालाभिमुखप्रसृतस्खलत्कतिविकलकंचुकिसहस्रजनसंमर्द
निक्षिप्यमाणपतितकुब्जवामनकिरातगणो विस्फार्यमाणान्तःपुरजनाभरणझंकारमनोहरः पूर्णपात्रहरणविलुप्यमानवस
नभूषणः संक्षोभितनगरो राजकुले दिदिविछिसंभ्रमोऽतिमहानभूत् । अनंतरं मंदरमथ्यमानजलनिधिघोषगंभीरदुंदुभिध्वान
पुरःसरेण प्रहतमृदुमृदंगशंखकाहलानकनिवहनिर्नरेण मंगलपटहपटुरवसंवर्द्धितेनानेकजनसहस्रकलकलबहु
लेन त्रिभुवनमापूर्यतोत्सवकोलाहलेन ससामंताः सांतःपुराः सप्रकृतयः सराजलोकाः सवेश्यायुवतयः सबालवृद्धाननृतुरा
गोपालमुन्मत्ता इव हर्षनिर्भराः प्रजाः । प्रतिदिनमवर्द्धत च शशिदर्शनेनेव जलनिधिः कलकलमुखरो राजसूनोर्जन्ममहोत्सवः ।
पार्थिवस्तु तनयाननदर्शनोत्सवहृतहृदयोऽपि दिवसवशेन मौहूर्तिकगणोपदिष्टे प्रशस्ते मुहूर्ते निवारितनिखिलपरिजन
ः शुकनासद्वितीयो मणिमयमंगलकलशयुगलोपशोभितेनासक्तबहुपुत्रिकालंकृतेन विविधबन्धनपल्लवनिवहनिरंतरनिचितेन

सन्निहितकनकमयमुखमलयुगलेनविरलमर्पितसितकुसुमनिम्बदूर्वाप्रवालमौलेकेनालंबिताविरलव्याघ्रचर्मणावंदन
मालांतरालघटितघंटागणेनद्वारदेशेनविराजमानमुन्नमत्लश्वद्रुमपस्तकयोर्मर्यादानिपुणेनगोमयमयीभिरुन्ना
नविनिहितवराटकप्रकरदंतुराभिरंतरांतराकु[illegible]विधवर्णरागरुचिरकर्पासकुसुमलेशलांछिताभिःकुसुमके
सरलवाम्लेषलोहिताभिर्लेखाभिरालिखितस्वस्तिकभक्तिजालमुपरिरचयताहरिद्रद्रवविच्छुरणपरिपिंजरांबरधारि
णींभगवतींषष्ठींदेवींकुर्वताविकचपत्रपुटविकटशिखंडिपृष्ठमंडलाधिरूढमालोललोहितपटघटितपताकमुल्लसि
तशक्तिदंडप्रचंडंकार्तिकेयंसंघट्टयताविन्यस्तालक्तकपटलपाटलमध्यभागौसूर्याचंद्रमसावाबध्नताकुंकुमपंकपिं
जरीकृताम्रईप्रोतकनकमययवनिकरकंटकितामविरललग्नगौरसिद्धार्थकप्रकरतयाकांचनरसरचिताभिवमन्त्र
यगुटिकाकदंबमालांविन्यस्यताचंदनजलधवलितेषुभित्तिशिखरभागेषुपंचरागविचित्रचेलचीरकलापचिह्नं

का.पू.
५१
51

मापीतपिष्टपंकांकितवर्द्धमानपरंपरामन्यानिचप्रसवगृहमंडनमंगलानिसंपादयतापुरंध्रिवर्गेणसमधिष्ठितमु
पद्वारसंयतविविधगंधकुसुममालालंकृतजरच्छागमखिलनीहिमधाव स्थापितार्घवृषध्वासिलशय
नशिरोन्नागमनवरतधूप्यमानाभिमन्त्रभुजगनिर्मोकमेषविषाणक्षोदमनलदह्यमानाभिर्ज्वलतरुपल्ल
वोल्लसितरक्षाधूमगंधमध्ययनमुखरद्विजगणविप्रकीर्यमाण शांत्युदकलवमभिनवालिखितजानमा
तृपटपूजाव्यग्रधात्रीजनमनेकवृद्धांगनारब्धसूतिकामंगलगीतिकामनोहरमुपपाद्यमानस्वस्त्ययनं
क्रियमाणशिशुरक्षाबलिविधानमाबध्यमानधवलकुसुमदामघटितमवि च्छिन्नपठ्यमाननारायण
नामसहस्रममलहाटकघटितप्रतिष्ठापितैरंतःशुभ्रतनानीवनिश्चलशिखैर्ध्यायद्भिर्मङ्गलप्रदीपैरुद्भासि
तमुत्खातासिलतासनाथपाणिभिःसर्वतोरक्षापुरुषैःपरिवृतंसूतिकागृहमपश्यत्‌अम्भःपा [redacted] शिवः

५१

वकंचस्त्रस्थवि वेश। प्रविश्य च प्रसवपरिक्षामपांडुमूर्त्तेः कृतमंगलं तेंविलासवत्याः स्वप्रभासमुदयोपहतगर्भगृहप्रदीपप्रभं अपरिस्फुट
गर्भरागत्वादुदयपरिपाटलमंडलमिव सवितारं अपरसंध्यालोहितबिंबमिव चंद्रमसं अनुपजातकाठिन्यमिव कल्पतरुपल्लवं उत्फुल्ल
मिव रक्तारविंदराशिं अवनिदर्शनावतीर्णमिव लोहितांगं विद्रुमकिशलयदलैरिव बालातपछेदैरिव पद्मपरागरश्मिभिरिव विरचि
तावयवं अनभिव्यक्तसुखपंचकमिव महालेनं सुरवनिताकरपरिभ्रष्टमिवामरकुमारकं उत्तमकल्याणलक्षणस्वरभास्वरया स्वदेह
प्रभयापूरयंतमिव वासभवनमुत्प्रासमानैः सहजप्रतापैरिव महापुरुषलक्षणैरुपेतं आगामिकालपालनप्रहृष्टया श्रियासमालिंगितं
आह्लादहेतुमात्मजं ददर्श। विग तनिमेषनिश्चलपक्ष्मणा च मुहुर्मुहुः भूयः संघट्टितानंदबाष्पपटलप्लुततारकेण हर्षविस्फारितेन स्निग्धे
न चक्षुषा पिबन्निवा लपन्निव स्पृशन्निव मनोरथसहस्त्रैर्दर्शनं तस्य सस्पृहमीक्षमाणस्तनयाननं मुहुर्मुहुः। कृतकृत्यं चात्मानं मेने सम्प्रति मनोर
थैः शुकनाशस्तु शनैःशनैः रंगप्रत्यंगान्यस्य निरूपयन्प्रीतिविस्फारितलोचनो भूमिपालमवादीत् देव पश्य पश्यास्य कुमारस्य गर्भसंपीडनवशा

५२ रूपपरिस्फुटावयवशोभस्यापिमाहात्म्यमाविर्भावयंतिचक्रवर्तिचिह्नानि।तथास्यसंध्यानुरक्तबालशशिकलाकारेणललाटपट्टेनवनलि
ननालभंगतंतुतन्वीयमूर्णापरिस्फुरति।एतद्विकचपुंडरीकधवलंकर्णांतायतंमुहुर्मुहुरुन्मिषैर्धवलयतीववासभवनंअरालपक्ष्मलोच
52 नयुगलं·विजृंभमाणकमलकोशपरिमलमनोहरमियमस्यसहजमाननामोदमाजिघ्रतीवदीर्घायतकनकलेखेवनासिका।रक्तोत्पलक
लिकाकारमुद्वहतीवचास्याधररुचकंरक्तोत्पलकलिकालोहितमलौभगवतोविष्टरश्रवसइवशंखचक्रचिह्नौप्रशस्तलेखयालांछितौक
रौ·अभिनवकल्पतरुपल्लवकोमलंलेखामयैर्ध्वजरथतुरगातपत्रकमलैरलंकृतंअनेकनरेंद्रसहस्रचूडाम लिचक्रचुंबनोचितंचर
णयुगलं·एषचदुंदुभेरिवातिगंभीरःस्वरयोगोऽस्यरुदितःश्रूयतांइत्येवंकथयत्येवतस्मिन्कृतसंभ्रमापसृतेनराजलोकेनद्वारिस्थितेनद
त्तमार्गस्त्वरितगतिरागत्यप्रहर्षोद्गमपुलकिततनुःस्फारीभवल्लोचनोमंगलकनामाप्रहृष्टवदनःपुरुषःपादयोःप्रणम्यराजानंव्यजिज्ञ रामः
पत्।देवदिष्ट्यावर्द्धसेभतिहतास्तेशत्रवश्चिरंजीवजयचपृथिवींपरिपालयत्वत्प्रसादाच्चभवतःशुकनासस्यापिज्येष्ठायांब्राह्मण्यां ५२

मनोरमाभिधानायांराम इवरेणुकायांतनयोजातःश्रुत्वादेवःप्रमाणमिति।अथनरपतिरमृतवृष्टिमतिमधुरांकर्ण्यतद्वचनंप्रीतिविस्फा
रिताक्षःप्रत्यवदत्‌अहोकल्याणपरंपरासुयंजनयन्वरोयद्विपद्विपदंसंपत्संपदमनुबध्नातीतिसर्वथासमान सुखदुःखतां
दर्शयताविधिनापिभवतेववयमनुवर्तिताःइत्यभिधायप्रीतिविकसितमुखःसरभससमालिंग्यविहस्तन्नयमेवस्वकंनाशस्योत्तरीयं
पूर्णपात्रंजहारतस्मैचप्रीतमनाःप्रियवचनश्रवणानुरूपंपुरुषायापरिमितंपारितोषिकमादिदेश।उत्थायचतथैवतेनचरणवि
कुट्टनकलितनूपुरसहस्रमुखरितदिगंतरेणसरभसोत्क्षेप वलितमणिवलयावलीवाचालितभुजलतेनोर्ध्वीकृतेनरुत्तानत
लैःकरपुटैरनिलकुलिताभाकाशकमलिनीमिवदर्शयतापर्यस्तमृदितकर्णपल्लवेनपरस्परं गह क्रांदितसंघट्टस्पष्टपातितोत्तरी
यांशुकेनश्रमजलधौतांगरागरंजितस्वचीनवाससाकिंचिद्वशिष्टतमालपत्रेणविलसत्सारविलासिनीहसितैरुन्निद्रकैरववनतानुका
रंप्रयधतासरभसवल्गनस्तवलल्लोलहारलतास्फालितकुचस्थलेनासिंदूरतिलककुलितालकलेखेनाविप्रकीर्णपिष्टातकपांसुपुंजपि

का॰सू॰
५३
53

जरितकेशपाशेनमदनोन्मत्तकलमूककुब्जकिरातवामनवधिरजडजनपुरःसरेलोत्तरीयांशुकग्रीवावष्टावकृष्टविडंबितजरत्कंचुकिक
दंबकेनवीणावेणुमुरजकांस्यताललयानुगतेनकलमधुरमुद्गायताहर्षनिर्भरतयामत्तेनेवोन्मत्तेनेवग्रहगृहीतेनेवव्यपगतवाच्या
वाच्य विवेकेनन्तत्रीजनसमूहेनान्तःपुरिकाजनेनस चलन्मणिकुंडलाहतकपोलभित्तिनाचविघूर्णमानकर्णोत्पलेनार्धविगलि
तविलोलशेखरेणदोलायमानवैकक्ष्यककुसुममालेननिर्दयमाहतभेरीमृदंगमर्दलपटहनिनादानुगतकाहलाशंखरवजनितर
व८ भसेनचरणसन्निपा तैर्दलयतेववसुधांराजपरिजनेनमदनोन्मत्तेनचचारणगणेनविविधमुरजवाद्यकृतकोलाहलेनपठतागायताव
लातावानुगम्यमानःशुकनाशभवनंगत्वाद्विगुणतरमुत्सवमकारयत।अतिक्रांतेचषष्ठीजागरेप्राप्तेदशमेऽहनिपुण्येमुहूर्तेगाःसुवर्णं
चकोटिशोब्राह्मणसात्कृत्वामातुरस्यमयापरिपूर्णमंडलश्चंद्रःस्वप्ने मुखकमलमाविशन्दृष्टइतिस्वप्नानुरूपमेवराजास्वसूनोश्चंद्रा राम॰
पीडइतिनामचकार।अपरेद्युःशुकनाशोपिकृत्वाब्राह्मणोचिताःसकलाःक्रियाःराजानुमतमात्मजस्यविप्रजनोचितंवैशंपायनइतिनामचक्रे।क्रमे ५३

कादं

णकृतचन्द्रोंदिबालक्रियाकलापस्यशैशवमतिचक्रामचंद्रापीडस्य·क्रीडाव्यासंगविघातार्थंबहिर्नगरादनुशिप्रंप्राकारमंडलेनपरि क्षिप्तं
अनुप्राकारमाहितेनमहतापरिखावलयेनपरिवेष्टितंअतिदृढकपाटसंपुटसुगुप्तद्वारमेकद्वारप्रवेशमेकांतोपरचिततुरगवाह्यालीविभा
गमर्द्धक्रोशमात्रायाममतिमहतातुहिनगिरिशिखरमालानुकारिणासुधाधवलेनचंद्रशालावलयेनविलासितमधःकल्पितव्यायामशा
लममरागाराकारंविद्यामंदिरमकारयत्।सर्वविद्याचार्याणांचसंग्रहेयत्नमतिमहांतमन्वतिष्ठत्।तत्रस्थंचकेसरिकिशोरकमिवपंजरग
तंकृत्वाप्रतिषिद्धनिर्गममाचार्यकुलपुत्रप्रायपरिजनपरिवारमपनीताशेषशिशुक्रीडनव्यासंगमनन्यमनसं समखिलविद्योपादानार्थ
माचार्येभ्यश्चंद्रापीडंशोभनेदिवसेवैशंपायनद्वितीयमर्पयांबभूव।प्रतिदिनंचोत्था योत्थायसविलासवत्याविरलपरिजनस्तत्रैवगत्वैन
मालोकयामास राजा।चंद्रापीडोप्यनन्यहृदयतयातथानियंत्रितोराज्ञाअचिरेणैवकालेनयथास्वमात्मकौशलंप्रकटयद्भिःपात्रवशादुप
जातोत्साहैश्चाचार्यैरुपदिश्यमानाः सर्वाविद्याजग्राह।मणिदर्पणइवातिनिर्मलेतस्मिन्संचक्रामसकलःकलाकलापः।तथाहिपदवाक्यप्र

५४ 54 मालेधर्मशास्त्रेराजनीतिषुव्यायामविद्यासुचापचक्रचर्मकृपाणशक्तितोमरपरशुगदाप्रभृतिषुसर्वेष्वायुधविशेषेषुरथचर्यासुग
जपृष्ठेषुतुरंगमेषुवीणावेणुमुरजकांस्यतालदर्दुरपुटप्रभृतिषुभरतादिप्रणीतेषुनारदीयप्रभृतिषुगांधर्ववेदविशेषेषुहस्तिशिक्षायां
तुरगवयोज्ञानेपुरुषलक्षणेषुचित्रकर्मणिपत्रच्छेद्येपुस्तकव्यापारेलेख्यकर्मणिसर्वासुद्यूतकलासुगंधशास्त्रेषुशकुनिरुतज्ञानेग्रह
गणितेरत्नपरीक्षासुदारुकर्मणिदंतव्यापारेवास्तुविद्यासुआयुर्वेदेयंत्रप्रयोगेविषापहरणेसुरुंगोपभेदेतरणेलंघनेप्लुतिषुअंग
करोहणेरतितंत्रेषुइंद्रजालेकथासुनाटकेष्वाख्यायिकासुकाव्येषुमहाभारतपुराणेतिहासरामायणेषुसर्वलिपिषुसर्वदेशभाषासु
सर्वसंज्ञासुसर्वशिल्पेषुछंदस्स्वन्येष्वपिकलाविशेषेषुपरंकौशलमवापसहजाचास्यानभ्यस्ततोवृकोदरस्येवशैशवएवाविर्भवस
र्वलोकविस्मयजननीमहाप्राणतायदृच्छयाक्रीडताप्यनेनकरतलाकुंचितकर्णपल्लवावनतांगाःसिंहकिशोरकाक्रमाक्रांताइवगजक रामः
लभकाःस्खलितुमपिनशेकुः।एकैकेनकृपाणप्रहारेणबालएवतरुणतालदंडानिवलुलावसकलराजन्यवंशवनदावानलस्यपरशुराम ५८

स्य२

स्यवनाराचाः शिखरिशिखिनातलभिदो बभूवुः। इमापुरुषसंवाहनयोग्येन चायोदंडेन श्रममकरोत्। कृते च महाप्राणतायाः सर्वविद्याभिरन्याभिः क
लाभिरनुचकार तं वैशंपायनः। चंद्रापीडस्य तु सकलकलाकलापपरिचयबहुमानेन शुकनाशगौरवेण सहपांसुक्रीडनतया सह संवृद्ध
तया च सर्वविश्रंभस्थानं द्वितीयमिव हृदयं वैशंपायनः परं मित्रमासीत्। निमेषमपि तेन विना स्थातुं न शशाक। वैशंपायनोऽपि तमुष्ण
करमिव वासरोऽनुगच्छन् क्षणमपि विरहयांचकार। एवं तस्य सर्वविद्यापरिचयमाचरतश्चंद्रापीडस्य त्रिभुवनविलोजनीयो
रतरस इव सागरस्य सकललोकहृदयनयनानंदजननश्चंद्रोदय इव प्रदोषस्य बहुविधरागविकारभंगुरः सुरधनुःकला
प इव जलधरसमयस्य मकरध्वजायुधभूतः कुसुमप्रसव इव कल्पपादपस्याभिव्यज्यमानरागरमणीयः सूर्योदय इव कमल
वनस्य विविधविलासयोग्यः कलाप इव शिखंडिनो यौवनारंभः प्रादुर्भवन् रमणीयस्यापि द्विगुणां रमणीयतां पुपोष। लब्धाव
सरो नवसेवक इवास्य निकटीबभूव मन्मथः। लक्ष्म्या सह विवृद्धस्तारवसंस्यैबंधुजनमनोरथैः सह पूर्यमाणोरुदंडद्वयमरिजनेन
तं

सहतनिमानमभजतमध्यभागः सागेन सह अथिमानमाततान नितंबभागः प्रतापेन सहारुरोह रोमराजिः अरिकलत्रालककलाभिः सह
प्रलंबतामुपययौ भुजयुगलं चरितेन सह धवलतामभजत लोचनयुगलमाज्ञया सह गुरुतां बबंध भुजशिखरदेशः स्वरेण सह गंभीर
तामाजगाम हृदयं॰ एवं च क्रमेण समारूढयौवनारंभं परिसमाप्तसकलकलाविज्ञानमधीताशेषविद्यं चावगम्यानुमोदितमाचा
र्यैश्चंद्रापीडमानेतुं राजा बलाधिकृतं बलाहकनामानमाहूय बहुतुरगबलपदातिपरिवृतमतिप्रशस्तेऽहनि प्राहिणोत् स गत्वा
विद्यागृहं द्वाःस्थैः समावेदितः प्रविश्य क्षितितलविलंबितचूडामणिना शिरसा प्रणम्य स्वभूमिसमुचिते राजसमीपे इव सविन
यमासने राजपुत्रानुमतो न्यषीदत्॰ स्थित्वा च मुहूर्त्तमात्रं बलाहक[redacted]श्चंद्रापीडमुपसृत्य दर्शितविनयो व्यजिज्ञपत्॰ कुमार
महाराजः समाज्ञापयति पूर्णा नो मनोरथा अधीतानि शास्त्राणि शिक्षिताः सकलाः कला गतोऽसि सर्वास्वायुधविद्यासु परां प्रति
ष्ठामनुमतोऽसि निर्गमाय विद्यागृहात्सर्वाचार्यैरुपगृहीतशिक्षं गंधगजकुमारकमिव वारिबंधाद्विनिर्गतमधिगतसकलकलाकला

पंपौर्णमासीशशिनमिवोद्गतंपश्यन्तुत्वांजनोव्रजंतुसफलतामतिचिरदर्शनोत्कंठितानिलोकलोचनानिदर्शनंप्रतितेसमुत्सुकान्यतीव
सर्वांतःपुराणि·अयमत्रभवतोदशमोवत्सरोविद्यागृहमधिवसतःप्रविष्टोसिषष्ठमनुभवन्वर्षमेवंसंपिंडितेनाधुनाषोडशेनवर्
सेतदद्यप्रभृतिनिर्गत्यदर्शनोत्सुकाभ्योद वादर्शनमखिलाभ्योमातृभ्योऽभिवाद्यगुरूनपगतनियंत्रणोयथासुखमनुभव
राज्यसुखानिनवयौवनललितानिच·संमानयराजलोकंपूजयद्विजातीन्परिपालयप्रजाआनंदयबंधुवर्गं·अयंचतेत्रि
भुवनैकरत्नमनिलगरुडसमजवइंद्रायुधनामातुरंगमःप्रेषितोमहाराजेनद्वारितिष्ठति·एषखलुदेवस्यपारसीकाधि
पतिनात्रिभुवनाश्चर्यमितिकृत्वाजलधिजलादुत्थितमयोनिजमिदमश्वरत्नमासादितंमयामहाराजाधिरोहणयोग्यमिद
मितिसंदिश्यप्रहितोदृष्टानिवेदितंचलक्षणविद्भिर्देवयान्युच्चैःश्रवसःश्रूयंतेलक्षणानितैरयमुपेतोनैवंविधोभूतोभावीवातुरंगम
इतितदयमनुगृह्यतामधिरोहणेनइदंचमूर्द्धाभिषिक्तपार्थिवकुलप्रसूतानांविनयोपपन्नानांशूराणामभिरूपाणांकलावतां

भ्यांपुरुषाभ्या

नी

कुलक्रमागतानांचराजपुत्राणांसहस्रंपरिचारार्थमनुप्रेषितंतुरंगमाधिरूढंद्वारिप्रणामलालसंप्रतिपालयत्यभिधायविरलवच
सिबलाहकेचंद्रापीडःपितुराज्ञांशिरसिकृत्वानवजलधरध्वानगंभीरयागिराप्रवेश्यतामिंद्रायुधइतिनिर्जिगमिषुरादिदेश।अ
थवचनानंतरमेवप्रवेशितमुन्नयतःखलीनकनककटकावलग्नाभ्यांपदेपदेकृताकुंचनप्रयत्नाभ्यामवकृष्यमाणमतिप्रमा
णमूर्द्धकरपुरुषप्राप्यपृष्ठभागमापिबंतमिवसंमुखागतमखिलमाकाशमतिनिष्ठुरेणमुहुर्मुहुःप्रकंपितोदररंध्रेणहेषारवेण
पूरितभुवनोदरविवरेणनिर्भर्त्सयंतमिवात्मीकवेगदुर्विदग्धंगरुत्मंतमतिदूरमवनमताप्रतिक्षणमतिदूरमुन्नमताचजवाभि
रोथस्फीतरंध्रघुरघुरायमाणघोरघोणेनशिरोभागेननिजजवदर्पवशादुल्लंघनार्थमाकलयंतमिवत्रिभुवनमसितपीत
हरितपाटलाभिराखंडलचापानुकारिणीभिर्लेखाभिःकल्माषितशरीरमास्तीर्णविविधचित्रवर्णकंबलमिवकुंजरकलभंकैलासतटा
घातधातुधूलिपाटलमिवहरवृषभमसुररुधिरपंकले[redacted]खालोहितसटमिवपार्वतीसिंहंरंहःसंघातमिवमूर्त्तिमंतमनवरतपरि

स्फुरदोष्ठपुटेनोन्मुक्तसूत्कारेणातिजवापीतमनिलमिव नासिकाविवरेणोद्वमंतमंतःस्खलितमुखमरुद्धीनस्फुरच्छिखरक्षोभजन्मनो लालाजलमु
वःफेनपल्लवा नुदधिनिवासपरिचितामृतरससगंधानिवोद्गिरंतमत्यायतमतिनिर्मांसतया समुत्कीर्णमिव वदनमुद्वहंतमाननमंड
लनिहितारुणमणिसमुद्भूतैरंशुकलापैरुपेतेनावसक्तरक्तचामरेणेव निश्चलशिखरेण कर्णयुगलेन विराजमानमुज्ज्वलकन
कण्ठखलीनरचितरश्मिकलापकलितया लाक्षालोहितलंबलोलसटासंतानया जलनिधिसंचरणलग्नविद्रुमपल्लवयेव शि
रोधरयोपशोभितमतिकुटिलकनकपत्रलताप्रतानभंगुरेण पदेपदे रणितरत्नमालेन स्थूलमुक्ताफलप्रायेण तारागणे
नेव संध्यारागमरुणेनाश्वालंकारेणालंकृतमश्वालंकारनिहितमरकतरत्नप्रभाश्यामायमानदेहतया गगनतलनिपति
६४
तसकररथतुरगशंकामिवोपजनयंतमतितेजस्वितया जवनिरोधरोषवशात्प्रतिरोमकूपमुद्भूतानि सागरपरिचयलग्नानि मु
क्ता[illegible]फलानीव स्वेदलवजालकानि वर्षंतमिंद्रनीलमणिपादपीठानुकारिभिरंजनशिलाघटितैरिवानवरतपतनोसतनज

मितविषम खरखुरखरवैः पृथुभिःखुरपुटैर्जर्जरितवसुंधरैर्मुरजवाद्यमिवाभ्यस्यंतमुत्कीर्णमिवजंघासुविस्तारितमिवोरसिस्फुरणी
कृतमिवमुखेप्रसारितमिवकंधरायामुल्लिखितमिवपार्श्वयोर्द्विगुणीकृतमिवजघनभागेजवप्रतिपक्षमिवगरुत्मतस्त्रैलोक्यसंच
रणसहायमिवमारुतस्यअंशावतारमिवोच्चैःश्रवसोवेगसब्रह्मचारिणमिवमनसोहरिचरणमिवसकलवसुंधरोल्लंघनक्षमंवरु
णहंसमिवमानसप्रचारंमधुमासदिवसमिवविकसिताशोकपाटलंव्रतिनमिवभस्मसितपुंड्रकांकितमुखंकमलवनमिवमधुपं
कपिंगकेसरंग्रीष्मदिवसमिवमहायाममनुग्रतेजसंभुजंगमिवसदागत्यभिमुखमुदधिपुलिनमिवशंखमालिकाभरणंभीतमिवस्तब्ध
कर्णंविद्याधरराज्यमिवचक्रवर्त्तिनरवाहनोचितंसूर्योदयमिवसकलभुवनार्घार्हमश्वातिशयमिंद्रायुधमद्राक्षीत्।दृष्ट्वाचतमदृष्टपूर्वम
मानुषलोकोचिताकारमखिलत्रिभुवनराज्योचितमशेषलक्षणोपपन्नमश्वरूपातिशयमतिधीरप्रकृतेरपिचंद्रापीडस्यपस्पर्शविस्म
योहृदयं।आसीच्चास्यमनसिसरभसविवर्त्तनवलितवासुकिभ्रमितमंदरेणमथ्नताजलनिधिजलमिदमश्वरत्नमुद्धृतंसुरासुरलोके ।शिवः
मनुद्धरताकिमिवरत्नं

न·अनारोहताचमेरुशिलातलविशालमस्यपृष्ठमाखंडलेनकिमासादितंत्रैलोक्यराज्यफलमुच्चैःश्रवसाविक्षिप्तहृदयोवंचितःखलुज
लनिधिनाशतमखः।मन्येचभगवतानारायणेनास्यचक्षुर्गोचरमियताकालेननागमुपगतोयेनाद्यापितांगरुडारोहणव्यसनितांनपरित्यज
ति·अहोखल्वतिशायितत्रिदशराजसमृद्धिरियंतातस्यराज्यलक्ष्मीर्यदेवंविधान्यपिसकलत्रिभुवनदुर्लभानिरत्नान्युपकरणताम
गछंति·अतितेजस्वितयामहाप्राणतयाचसदैवतेयमस्याकृतिर्यत्सत्यमारोहणेशंकामिवमेजनयति·नहिसामान्यवाजिनाममानुषलो
कोचिताःसकलत्रिभुवनविस्मयजनन्यईदृश्योभवंत्याकृतयः।देवतान्यपिहिमुनिशापवशादुज्झितनिजशरीराःकामपिशापवचनोप
नीतानिशरीरांतराण्यध्यासतएव·श्रूयतेहिपुरास्थूलशिरानाममहातपामुनिरखिलत्रिभुवनललामभूतामप्सरसंरंभाभिधानां
शशापसासुरलोकमपहायअश्वहृदयेतिविख्यातावडवामृत्तिकावत्यांशतधन्वानंनामराजानमुपसे
वमानामर्त्यलोकेमहांतंकालमुवास·अन्येचमहात्मानोमुनिजनशापपरिपीतप्रभावानानाकाराभूत्वाबभ्रमुरिमंलोकं·असंश

यमनेनापिमहात्मनाकेनापिशापपनाजाभवितव्यमावेदयतीवमेदंतःकरणमस्यदिव्यतामितिचिंतयन्नेवारुरुक्षुरासनादुदतिष्ठत्.मनसा
चतंतुरंगममुपसृत्यमहात्मन्नर्वन्योऽसिसोऽसिनमोऽस्तुतेसर्वथास्थितेननमर्षणीयोयमारोहणातिक्रमोऽस्माकमपरिमितानिदैवतान्यप्य
नुचितपरिभवभांजिभवंतीत्यामंत्रयांबभूव.विदिताभिप्रायइवसतमिंद्रायुधश्चडुलशिरःकेसरसटाशांतिकूणिताकेकरतारकेण
तिर्यक्चक्षुषाविलोक्यमुहुर्मुहुस्ताडयताक्षितितलमुत्वानधूलिधूसरितक्रोडरोमराजिनादक्षिणखुरेणारोहणायाह्वयन्निवस्फुरि
तघ्राणविवरघर्घरध्वनिमिश्रंमधुरमपरुषहुंकारपरंपरानुबद्धमतिमनोहरहेषारवमकरोत्.अथानेनमधुरहेषितेनदत्तारोहणाभ्य
नुज्ञइवेन्द्रायुधमारुरोहचंद्रापीडः.समारुह्यचतंप्रदेशमात्रमिवत्रैलोक्यमखिलंमन्यमानोनिर्गत्यप्रलयजलधरविमुक्तोपलासारपरु
षेणजर्जरयतेवरसातलमतिनिष्ठुरेणखुरपुटानांरवेणखुररजोनिरुद्धघ्राणघोरघोषेणचहेषितेनबधिरीकृतसकलभुवनविवरमाशि
राकिरणदीधितिपरामर्शस्फुरितविमलफलकेनोर्ध्वीकृतेनकुंतलतावनेनोन्मालन्नीलोत्पलकलिकावनगहनंसरइवगगनतलमलंकुर्वाणः

मुदंडमायूरातपत्रसहस्रांधकारिताष्टदिङ्मुखतयास्फुरितमानमन्युचापकलापकल्माषमिवजलधरवृंदमुद्गमत्फेनपुंजधवलितमुख
तयानवरतवल्गनचटुलतयाचप्रलयसागरजलकल्लोलसंघातमिवसमुजतमष्टपर्यंतमश्वसैन्यमपश्यत्·तच्चसागरजलमिव [redacted]
[redacted] चंद्रोदयेनचंद्रापीडनिर्गमेनसकलमेवसंचचालाम्बीयमहमहमिकयाचप्रणामलालसाःसरभसापनीतातपत्रास्त्यधिरसः
परस्परेणपीडनकुपिततुरंगमनिवारणायायासिताराजपुत्रास्तंपर्यवारयंत·एकैकशश्चजातिनामग्रहणमावेद्यमानाबलाहकेनवि
मचलितमुकुटपद्मरागकिरणोज्जमच्छलेनानुरागमिवोद्वमद्भिःसंघटितसेवांजलिमुकुलतयायौवराज्याभिषेककलशावर्जित
सलिललग्नकमलैरिवहृदयनतैःशिरोभिश्चप्रणेमुः।चंद्रापीडस्तुतान्सर्वान्संमानयित्वायथोचितमनंतरंतुरंगमाधिरूढेनानुग
म्यमानोवैशंपायनेनराजलक्ष्मीनिवासपुंडरीकाकृतिनासकलराजन्यकुलकुमुदखंडचंद्रमंडलेनेवतुरंगमसेनास्त्ववंतीपुलिनायमा
नेनक्षीरोदकेनेवधवलितवासुकिफणामंडलमविनास्थूलमुक्ताकलापजालकावृतेनोपरिचिह्नीकृतंकेसरिणमुद्धरतातिमहताका

र्तैस्वरहंसेनध्रियमाणेनातपत्रेणोभयतःसमुद्धूयमानचामरकलापपवननर्तितकर्णपल्लवःपुरःप्रधावतातरुणवीर[redacted]पुरुषप्रा
येणानेकसहस्रसंख्येनपदातिपरिजनेनजयजीवेतिचमधुरवचसामंगलप्रायमनवरतमुच्चैःपठताबंदिजनेनस्तूयमानोनगराभिमु
खःप्रतस्थे॰क्रमेणचसमासादितविग्रहमनंगमिवावतीर्णंनगरमार्गमनुप्राप्तमवलोक्यसर्वएवपरित्यक्तसकलव्यापारोरजनिक
रोदयपरिक्षुभ्यमानकुमुदवनानुकारीजनःसमजनि॰सत्यस्मिन्संप्रतिमुखकुमुदकदंबकविकलाकृतिःकार्त्तिकेयोविडंबयति
कुमारभावं॰अहोवयमतिपुण्यभाजोयदिमाममानुषीमस्याकृतिमंतःसमारूढप्रीतिरसनिष्पंदविस्तारितेनकुतूहलोत्तानितेनलोचन
युगलेनानिवारिताःपश्यामःसफलानोऽद्यजाताजन्मवत्तानमोऽस्मैरूपांतरधारिणेभगवतेचंद्रापीडरूपेणपुंडरीकेक्षणायेतिविरचि
तप्रणामांजलिर्नगरलोकःप्रणनाम॰सर्वतश्चसमपात्यतकपाटपुटप्रकटवातायनसहस्रतयाचंद्रापीडदर्शनकुतूहलान्नगरन
पिसमुन्मीलितलोचननिवहमिवाभवत्अनंतरंचसमासन्नसकलविद्याविद्यागृहान्निर्गतोयमागच्छतिचंद्रापीडइतिसमाकर्ण्यालोकन

कुतूहलिन्यःसर्वस्मिन्नेवनगरेससंभ्रममुत्तस्थुरपरिसमाप्तप्रसाधनव्यापाराःकाश्चिद्वामकरतलगतदर्पणाःस्फुरितसकलरजनिकरमंडला
इवपौर्णमासीरजन्यःकाश्चिदार्द्रालक्तकरसपाटलितचरणपुटाःकमलपरिपीतबालातपाइवनलिन्यःकाश्चित्ससंभ्रमगतिविगलितमेख
लाकलापाकुलितचरणकिसलयाःशृंखलासंदानमंदमंदसंचारिण्यइवकरिण्यःकाश्चिज्जलधरसमयदिवसश्रियइवेंद्रायुधरागरक्त
चित्रांबरधारिण्यःकाश्चिदुल्लसितधवलनखमयूखपल्लवान्नूपुररवाकृष्टगृहकलहंसकानिवचरणपुटानुबद्धहंसाःकाश्चि [redacted]
करतलस्थितस्थूलहारयष्टयोरतिमिवमदनविनाशशोकगृहीतस्फटिकाक्षवलयांविडंबयंत्यःकाश्चित्पयोधरांतरालगलितमुक्ताल
तास्तनुविमलस्रोतोजलांतरितचक्रवाकमिथुनाइवप्रदोषश्रियःकाश्चिन्नूपुरमणिसमुत्थितेंद्रायुधतयापरिचयानुगतगृहमयूरिकाइववि
राजंत्यःकाश्चिदर्द्धपीतोज्झितमणिचषकाःस्फुरितरागैर्मधुरसमिवाधरपल्लवैःक्षरंत्योहर्म्यतलानिललनाःसमारुरुहुः।अन्याश्च
मरकतवातायनविवरविनिर्गतमुखमंडलाविकचकमलकोशपुटमंबरतलसंचारिणींकमलिनीमिवदर्शयंत्योददृशुः।उपपादि

का.पू. चसहंसास्तरजमसंचलनजन्मामधुरस्वः रणास्खलितवीलारववोलाहलबहलोदरसनाथवाकृतगृहसारससरसितसंभिन्नः स्खलितचरणतलताडित
६० सोपानजातगंभीरध्वनिमहरणानामवरोधशिखंडिकानांकेकारवैरनुगम्यमानोनवजलधररवभयचकितकलहंसकोलाहलकोमलकोमकारध्वजाविजय
60 घोषलग्नकाञ्चीपरस्परविघट्टनारणितनारतरहारमणीनांरमणीनांज्रोच्चहारीहर्म्यकुक्षिषुभवितिश्वनिर्ह्रादोभषणनिनादः कृतांदिवयुवतिजननि
रंतरतथानारीमयाइवप्रासादाः सालक्तकपदकमलविन्यासैः पल्लवमयमिवक्षितितलं [redacted] अंगप्रभाप्रवाहेण लावण्यमयमिवनगरम् आन
नमंडलनिवहेन चंद्रबिंबमयमिवगगनतलं आतपनिवारणायोन्नामितकरतलजालकेन कमलवनमयमिवदिक्चक्रवालं आभरणांशुकला पे
नेंद्रायुधमयइवातपः लोचनमयूखलेखासंतानेननीलोत्पलदलमयइवदिवसोबभूव कौतुकप्रसारितनिश्चललोचनानांचपश्यंतीनांकासामादर्शम
यानीवसलिलमयानीवस्फटिकमयानीवहृदयानि विवशानि चंद्रपीडाकृतिः। आविर्भूतमदनरसानांचान्योन्यतः सपरिहासाः सविस्रंभाः ससंभ्रमाः सेर्ष्याः
सोत्प्रासाः साभ्यसूयाः सविलासाः समन्मथाः सस्पृहाश्च तत्क्षणमतिरमणीयाः प्रससृरालापाः। तथाहि। त्वरितगमने मामपि प्रतिपालय दर्शनोन्मने राम
६०

गृहीतोत्तरीयं. उल्लासयालकलतां आननावलंबिनीमर्द्धे चंद्रलेखांशुकं पाहरे पाहर कुसुमस्तबकितचरणापतन्निमिरन्नां पे। संयमयमद

निश्वतनेक शपाशं उत्क्षिपचं क्षपीडदर्शनभ्रमनिनिद्रां चीक्षायकं। उत्सर्पयपापेक्रपोल दोलायितं कर्णपल्लवं. अहृदयेन्द्र हाणनिपतितं दंतपत्रं

यौवनोन्मत्तो विलोक्य सेजनेन स्थगयपयोधरजारं. अपगतलज्जो शिथिलीभूतमायलयत् कूलं अलीकमुग्धे द्रुततरमागम्य तां कुत हलिभिर्देहि हृदयं

नांतरं. असंतुष्टेक्रियशालोकयसेतरलहृदये परिजन[stain] मपेतस्वपिशाचिगलितोत्तरीया हृस्यसे जनेन रागावततनयने पश्यासि नसखीजनं अनेक

भंगिविभ्रमरसर्णे दुःखमभ्यासर्णी वासितहृदयाजीवसि मिथ्याविनीतेकिं व्यपदेशवीक्षितैर्विस्मयमालोकय. यौवनशालिनि क्लिंपीडयसि पयोध

रभारेण अतिकोपने पुरतो भव. मत्तरिणि कि मे भ्राकिनी रूणक्षिवातायनं. अनंगपरवशेमदीयमुत्तरीयं अंशुकमुत्तरीयतां नयसि रागा

सवमत्ते निवारया त्मानं उज्झितधैर्ये किं धावसि गुरुजनसमक्षं उल्लसत्स्वभावे किमेवमाकुलीभवसि मुग्धे निगृहस्व मदनज्वरजनित

पुलकजालकं असाध्ये वरणे किमेव मुत्ताम्यसि. वक्रविभ्रमे विविधांगभंगवलनया खेदितमध्यभागा वृथा खिद्यसे अन्यहृदये स्वमव

नान्निर्गतमपिनात्मानमवगच्छसि॰ कौतुकाविष्टेविस्मृतासिनिःश्वसितुंअंतःसंकल्परचितरतसमागमसुखरससनिमीलितलोचनेसमुन्मी
लयलोचनयुगलमतिकामत्पयंअनंगशरप्रहारमूर्छितरविकिरणनिवारणायकुरुशिरस्युत्तरीयांशुकपल्लवं॰अपिसतीव्रतजश्वहृद
हीतइवव्यमपश्यंतीवंचयसिलोचनयुगलं॰अधन्येहतासिपरपुरुषदर्शनपरिहारव्रतेन॰भक्तीरोति छसाविपरस्परातिविरहितंसाक्षा
देतं॥ दिवभगवंतंगृहीतमकरध्वजंअयमस्यसितातपत्रांतरेणालिकुलनीलेशिरसिनिभिरशंकानिपतितइवशशिकरकलापोमालतीकुसुमशे
खरोजिलक्ष्यते।एतदस्यकर्णाभरणमरकतप्रभाश्यामायितमुपरचितविकचशिरीषकुसुमकर्णपूरमिवकपोलतलमाभाति॰अयमस्यहा
रांतर्निविष्टारुणमणिकिरणकलापछलेनहृदयंविविक्षुरभिनवयौवनरागइवबहिःपरिस्फुरतिएतद्दनेनचामरकर्पोतांतरेरितए
ववीचितंएतत्किमपिवैशंपायनेनसहसमामंत्र्यदशनमयूखलेखाधवलीकृतदिक्चक्रवा लंहसितंएषोस्यश्रुकपलुतिहसितरा शिवः
गेणोत्तरीयांशुकशांतेनवलाहकस्तुरंगखुरच्चलनजन्मानमालग्नमयक्लेशपुरेणुमपहरतिअपमनेनलक्ष्मीकरकमलकोमलेनलस ६१

रिवकीर्यमाणश्चंद्रापीडोराजकुलसमीपमाससाद:क्रमेणवया मावस्थितानि ६

मुत्क्षिप्यतिर्यक्तुरंगमस्कंधेनिक्षिप्तश्चरणपल्लवःसलीलमनेनचवामवलयाचनार्यमुत्तानितनलोदीर्घांगुलिराताम्रपुष्करकोशशो
भीगजेंद्रेणेवशैवालकवलग्रासलालसःप्रसारितःकरः।धन्यासौयालक्ष्मीरिवनिर्जितकमलंकरतलमस्यवसुंधरासपत्नीग्रहीष्यति
धन्याचदेवीविलासवतीसकलमहीमंडलभारधारणक्षमःककुभांदिग्गजइवगर्भेणयस्याधृतःइत्येवंविविधानिचान्यानिवदं
तीनांनासामापीयमानइवलोचनपुटैराहूयमानइवभूषणरवैरनुगम्यमानइवहृदयैर्निबध्यमानइवाभरणरत्नरश्मिरज्जु
भिरपह्रियमाणइवनवयौवनवलिभिःशिथिलभुजलताविगलितधवलवलयमनिकरपदेपदेविवाहानलइवकुसुममिश्रैर्ला
जांजलिभिरनवरतकट स्थलगलितमदमषीपंककरीभिरंजनगिरिमालामालिनीभिःकुंजरघटाभिरंधकारितदिङ्मु
खतयाजलधरदिवसायमानमुद्दंडधवलातपत्रसहस्रसंकटमनेकद्वीपांतरागतदूतशतसमाकुलंराजद्वारमाससादचतुरं
गमाच्चावततार:अवतीर्यचकरतलेनकरेवैशंपायनमवलंब्यपुरःसविनयंप्रस्थितेनबलाहकेनोपदिश्यमानमार्गस्त्रि

का॰पू॰

६२ भुवनमिव पुंजीभूतमागृहीतकनकवेत्रलतैः सितवारबाणधारिभिः सितांगरागैः सितकुसुमशेखरैः सितोष्णीषैः सितवेषपरिग्रहतया
श्वेतद्वीपसंभवैरिव कृतयुगपुरुषैरिव मरणभ्रमाणैर्दिवानिशमालिखितैरिवोत्कीर्णैरिव तोरणस्तंभनिषण्णैर्द्वारपालैरनुज्झित
द्वारदेशमनेकसंजवनचंक्रमणलिकाविटंकवेदिकासंकटशिखरैरभ्रंकषैरपहसितकैलासशैलशोभैरमलसुधाधवलितैः
समालेयशैलमिव महाप्रासादैरनेकवातायनविवरविनिर्गतयुवतिभूषणकिरणसहस्रतया कनकशृंखलाजालकेनेवोप
गतवि४ दिवितानेन विराजमानमंतर्गतायुधनिवहाभिराशीविषकुलसंकुलाभिः पातालगुहाभिरिवातिगंभीराभिरायुधशालाभिरुपेत
मबलाचरणालक्तकरससरक्तमणिशकलैः शिखरनिलीनशिखिकुलकृतकेकारवकलकलैः क्रीडापर्वतकैरुपशोभितमुज्ज्व
लवर्णकंबलावगुंठितकनकपर्याणाभिः प्रचलचामरकलापचुंबितचलकर्णपल्लवाभिः कुलयुवतिभिरिवोपरूढधिसाविन
यनिभृताभिरश्वत्यकक्षांतरमालानस्तंभनिषण्णेन च नवजलधरघोषगंभीरमनुगतवीणावेणुरवरम्यमास्फालितघर्घरि

भिर्यामिकारेणुका

शिव
६२

कायघर्घरमनवरतसंगीतमृदंगध्वनिमामीलितलोचनत्रिभागेनवामदशनकोटिनिमग्नहस्तेननिश्चलकर्णतालेनाकर्णयतासलीलमु
भयपार्श्वावलंबिवर्णकंबलतयाविंध्यगिरिणेवाविष्कृतधातुविचित्रितपक्षसंपुटेनाधोरणगीतानंदकृतमंदकंठगर्जितेनमदजल
लवशबलशंखशोभितश्रवणपुटेनरजनिकरबिंबचुंबितावर्त्तकांसुदर्दुरविडंबकेनकर्णांतलंबिनाकांचनमयेनकृतकर्णपू
रमिवांकुशेनमुखचुंबितामदजलमलिनेनद्वितीयेनेवकर्णचामरेणकपोलतलदोलायमानेनमधुकरकुलेनालंक्रियमाणेना
सुदृढतयापूर्वकायस्यातिवामनतयाजघनभागस्यपातालतलादिवोत्तिष्ठतानिशासमयेनेवपरिस्फुरत्ताराचंद्रनक्षत्रमा
लेनशरदारंभेणेवप्रकटितारुणचारुपुष्करेणवामनरूपेणेवकृतत्रिपदीविलासेनस्फटिकगिरितटेनेवलग्नसिंहमुखप्र
तिमेनप्रसाधितेनेवालोलकर्णपल्लवाहतमुखेनगंधमादननाम्नागंधहस्तिनासनाथीकृतैकदेशमुज्ज्वलपट्टकंबलपटप्र
वरितपृष्ठंस्वरसितमधुरघंटिकारवमुखरकंठैर्मंजिष्ठालोहितस्कंधकेसरबालपल्लवैर्वनगजरुधिरपाटलसटैरिवके

सखिभिःपुरोनिहितमवसराशीर्वचोपविष्टमंडपालैरासन्नमंगलगीतध्वनिदत्तकर्णैरंतःकपोलध्वतमधुरस्वरसमुल्लिललाज
कवलैर्नृपालवल्लभैर्मंदुरागतैस्तुरंगमैरुपासितमधिकरणमंडपगतैश्चार्यवेषैरत्युच्चवेत्रासनोपविष्टैर्धर्ममयैरिव धर्मा
धिकारिभिर्महापुरुषैरधिष्ठितमधिगतसकलग्रामखर्वटनामभिरेकभवनमिवजगदखिलमालोकयद्भिरालिखितसकलभुव
नव्यापारतयाधर्मराजनगरव्यतिकरं दर्शयद्भिरधिकरणलेखकैरालिख्यमानशासनसहस्रमभ्यंतरावस्थितनरपतिनि
र्गमप्रतीक्षणपरेण च स्थानस्थानेषु बद्धमंडलेन कनकमयार्धचंद्रतारागणाधिष्ठितशबलैश्चर्मपालकैर्निर्भिन्नसमयमिवदर्श
यता स्फुरितनिशितकरवालकरप्रकोष्ठकरालितालपैनैकश्रवणपुटघटितधवलदंतपत्रेणार्द्धबद्धमौलिकलापेन धव
लचंदनस्थासकरचितभुजोरुदंडेन बद्धासिधेनुकेनांध्रद्रविडसिंहलप्रायेण सेवकजनेनास्थानमंडपगतेन च यथोचि
तासनोपविष्टेन प्रसारयता दुरोदरक्रीडामन्यस्मिताशापदव्यापारमास्फालयता परिवादिनीमालिखता चित्रफलके नृपमिपा

लप्रतिबिंबमावध्नताकाव्यगोष्ठीमातन्वतापरिहासकथांविंदताबिंदुमतींचिंतयताप्रहेलिकांभावयतानरपतिकृतकाव्यसुभाषितानिपठ
ताद्विपदीर्गर्हताकविगुणानुत्किरतापत्रभंगानालपतावारविलासिनीजनमाकर्णयतावैतालिकगीतमनेकसहस्रसंख्येनधवलोष्णीषपट
श्लिष्टविकटकिरीटसंकटशिरसासनिर्भरशिखरालग्नबालातपमंडलेने व कुलपर्वतचक्रवालेनमूर्द्धाभिषिक्तेनसामंतलोकेना
धिष्ठितमास्थानोत्थितभूमिपालसंवर्त्तितानांचकुथानांरत्नासनानांचराशिभिरनेकवर्णैरिंद्रायुधपुंजैरिवविराजितसभापर्यंतमम
लमणिभूमिसंक्रांतमुखनिवहप्रतिबिंबतयाविकचकमलपुष्पप्रकरमिवसंपादयतागतिवशरणितनूपुरपारिहार्यरसनास्वन
मुखरेणस्कंधावसक्तकनकदंडचामरेणानिर्गच्छताप्रविशताचानवरतंवारविलासिनीजनेनाकुलितमेकदेशनिषण्णचामीक
रशृंखलासंयतव्याघ्रगणमितस्ततःप्रचलितामितकस्तूरिकाकुरंगपरिमलवासितदिङ्मुखमनेककुब्जकिरातवर्षवरबधिरवामन
कमूकसंकुलमुपाहृतकिन्नरमिथुनमानीतवनमानुषमाबद्धमेषकुक्कुटकुररकपिंजललाववर्त्तिकायुद्धमुखकूजितचकोरकादंबह

रीतकोकिलमालप्यमानशुकसारिकमभिमतपरिमलामर्षजंभितैर्श्वानिःकूजद्भिःशिखरिणांजीवितैरिवागिरिगुहावासिभिर्गृहीतैःपंजर
केसरिभिरुत्त्रास्यमानमुत्त्रास्यमानैःकांचनभवनप्रभाजनितदावानलशंकैर्नीलनारंकैर्भ्रमद्भिर्भवनहरिणकदंबकैर्लोचनप्रभयाशबलीकृ
तदिगंतरमुद्दाममेकेकारवानुमीयमानमरकतकुट्टिमस्थितशिखंडिमंडलमतिशिशिरचंदनविटपिच्छायानिषण्णनिद्रायमाणगुरुसार
समंतःपुरेणचबालिकाजनप्रस्तुतकंदुकपंचालिकाक्रीडनाविरतसंवाह्यमानदोलाशिखरक्वणितघंटाटंकारमूर्छिताशामुखेननु
जगानिर्मोकशंकितमयूरक्रियमाणहारेणसौधशिखरावतीर्णप्रचलितपारावतकुलतपास्यल्लोसलिनीवनशोभितेनवांतःपुरिकाजन
प्रस्तुतनरपतिचरितविडंबनक्रीडनाश्वमंडुरपरिभ्रष्टागतैरवलुप्तभवनदाडिमीफलैरारब्धतांगणसरुकारपल्लवैरभिभूतकुब्ज
वामनकिरातकरतलाच्छिन्नाभिभूषणानिविकिरद्भिःकपिभिराकुलीकृतेनशुकसारिकाप्रकाशितसुरतविस्रंभालापलज्जिता
वरोधजनेनप्रासादसोपानसमारोहणचलितैरबलानांकंठवसक्तैर्मणिमयैर्विभूषणैःपदेपदेरणद्भिस्तुलाकोटिवलयैर्दिंडी

कृतकूजितरुताभिर्भवनकलहंसमालाभिर्धवलितांगणेनधृतधौतधवलदुकूलोत्तरीयैःकलधौतदंडावलंबिभिःपलितपांडुमौलिभिरा
चारमयैरिवमर्यादामयैरिवविनयमयैरिवमंगलमयैरिवगंभीराकृतिभिःस्वभावधीरैरुक्मीविभिर्वयःपरिणामेपिजरत्सिंहैरिवा
परित्यक्तसर्वावष्टंभैःकंचुकिभिरधिष्ठितेनसमुपेताभ्यंतरंजलधरसनाथमिवकृष्णागरुधूमपटलैःसनीहारमिवयामकुंजरघटक
रसीकरैःसनिशमिवतमालवीथिकांधकारैःसबालातपमिवरक्ताशोकैःसतारागणमिवमुक्ताकलापैःसवर्षासमयमिवधारागृ
हैःसतडिज्जलमिवहेममयीभिर्मयूरयष्टिभिःसगरुडदैवतमिवपन्नगलांछिकाभिःशिवभवनमिवद्वारावस्थितदंडपाणिप्रतीहारगणमु
त्कृष्टकविगद्यमिवविविधवर्णश्रेणिप्रतिपाद्यमानानेकाभिनवार्थसंचयमप्सरोगणमिवप्रकटमनोरमारंभंदिवसकरोदयमिवो
न्नसत्प्राकरकमलामोदमुत्सृष्टकिरणमिवनिजलक्ष्मीकृतकमलोपकारंनाटकमिवपताकांकशोभितंशोणितपुरमिवबाणयोग्यावा
सोपेतंपुराणमिवयथाभागावस्थापितसकलभुवनकोशंसंपूर्णचंद्रोदयमिवमधुकरसहस्रसंवर्द्धितरत्नालयंदिग्गजमिवाविच्छिन्न

कदंब२

=पक्षांतरेव्ययोतिभेदः।२=

महादानसंतानंब्रह्मांडमिवसकलजीवलोकव्यवहारकारणंसन्निहितल्पगर्भमीशानधामुमिवमहाभोगिमंडलसहस्राधिष्ठितकोषंमहाभार
तमिवानंतगीताकर्णनानंदितनरंयदुवंशमिवकुलक्रमागतश्रीरसमीमपुरुषोत्तमबलपरिपालितंव्याकरणमिवप्रथममध्यमोत्तमपुरु
षविभक्तिस्थितानेकादेशकारककारख्यातसंप्रदानक्रियाव्ययप्रपंचसुस्थितमुदधिमिवमयांतःप्रविष्टसपक्षमहीभृत्सहस्रसंकु
लमुषानिरुद्धसमागममिवचित्रलेखादर्शितविचित्रसकलत्रिभुवनाकारंबलियज्ञमिवपुराणपुरुषवामनाधिष्ठिताभ्यंतरं
शुक्लपक्षप्रदोषमिवविततशशिकिरणकलापधवलांबरवितानंनरवाहनदत्तचरितमिवांतःसंवर्द्धितप्रियदर्शनराजदारिका
गंधर्वदत्तोत्कंठंमहातीर्थमिवसद्योनेकपुरुषप्राप्ताभिषेकफलंप्राग्वंशमिवनानास्तवपात्रसंकुलंनिशासमयमिवानेकनक्षत्रमाला
लंकृतंप्रभातसमयमिवपूर्वदिग्भागराजगात्रमेयमित्रोदयंगांधिकभवनमिवस्नानधूपविलेपनवर्णकोज्ज्वलंतांबूलिकभवनमिवक्र
तलवलीलवंगैलाकंकोलपत्रसंचयंप्रधानवेश्यासमागममिवाविदितहृदयाभिप्रायचेष्टाविकारंकामुकजनमिवबहुचाटुसंलाप

शिवः

सुभाषितरसास्वादस्तलालशब्दंधूर्त्तमंडलमिवदीयमानमणिथितसहस्त्रालंकरणकल्लोलेस्थपत्रसंचयंधर्मारण्यमिवाशेषैर्मनःप्रह्लादनंमहाव
नमिवविंध्यश्वापदद्विजोपघुष्टंरामायणमिवकपिकथासमाकुलंमाद्रीकुलमिवनकुलालंकृतंसंगीतमनवनमिवानेकस्थानाव[redacted]स्था
पितमृदंगंरघुकुलमिवजरत्गुणानंदितंज्योतिषमिवग्रहमोक्ष कलानागनिपुणंनारदीयमिव वर्ण्यमानराजधर्मंयंत्रमिववि
विधशाष्ट्ररसलब्धास्वादंमधुकाव्यमिवान्यचिंतितस्वभावाभिप्रायावेदकंमहानदीप्रवाहमिवसर्वदुःखितलापहरंधनमिवैकस
चित्ताकांक्षणीयंसंध्यासमयमिवदृश्यमान[redacted]चंद्रापीडोदयंनारायणवक्षःस्थलमिवश्रीरत्नप्रभासितदिगंतंबलभद्रमिवका
दंबरीरसविशेषवर्णनाकुलमतिंब्राह्मणमिवपद्मासनोपदेशदर्शितमंडलंस्कंधमिवशिखिक्रीडारंजनंचंचलंकुलांगनाप्रचारमिवस
र्वदोषजातशंकंवेश्याजनमिवोपचारचतुरंदुर्जनमिवापगतपरलोकभयमंत्यजजनमिवागम्यविषयाभिलाषिअगम्यविषयासक्तमपि
प्रशंसनीयंअंतकनटगणमिवकृताकृतसुकृतविचारंसुकृतमिवादिमध्यावसानकल्याणकरंवासरारंभमिवपरिस्फुरत्प्रभगारु

णीक्रियमाणनिशांतंदिव्यस्तुतिगानमिवकलापिसनाथस्वेनकेतुशोभितंभारतसमरमिवकृतवर्मशिलीमुखचक्रसंभारजीवरणंपातालमिवमहा
कंचुकिसहस्राध्यासितंवर्षपर्वतसहस्रमिवांतःस्थितापरिमाणशृंगरोहमकूटंमहाद्वारमपिदुःप्रवेशमनंतविषयगतमपिमागधजनाधि
ष्ठितंस्फीतमपिविभ्रमल्लोकंराजकुलंविवेश।ससंभ्रमोपगतैश्चकृतप्रणामैःप्रतीहारमंडलैरुपदिश्यमानमार्गःसर्वतःप्रचलितेनच
पूर्वकृतावस्थानेनदूरपर्यस्तमौलिशिथिलितचूडामणिमरीचिचुंबितवसुधातलेनराजलोकेनप्रत्येकशःप्रतीहारनिवेद्यमानेनसा
दरंप्रणम्यमानःपदेपदेचाभ्यंतरविनिर्गताभिराचारकुशलाभिरंतःपुरवृद्धाभिःक्रियमाणवतरणमंगलोभुवनांतरालीवविविधप्रा
णिसहस्रसंकुलानिसप्तकक्षांतराण्यतिक्रम्याभ्यंतरावस्थितमनवरतशस्त्राभ्यासश्यामिकाकलंकितकरतलैःकनकचरणलोचनवज्रभासित
लोहजालकावृतशरीरैरम्लानस्तंभैरिवगजमदपरिमललोभनिरंतरनिलीनमधुकरपटलजटिलैःकुलक्रमागतैरुपहतान्वयैरत्युर
कैर्महाप्राणतयातिकर्कशतयाचदानवैरिवातिशयाकारसंभाव्यमानपराक्रमैःसर्वतःशरीररक्षाधिकारनियुक्तैःपुरुषैःपरिवृतमुभय

तोवारविलासिनीभिश्चानवरतमुद्धूयमानधवलचामरममलपुलिनतलशोभिनिसुरकुंजरमिवमंदाकिनीवारिणिहंसधवलशयनतलेनिष
ण्णंपितरमपश्यत्‌: आलोकयेतिचप्रतीहारवचनानंतरमतिदूरावनतेनचलितचूडामणिनाशिरसाकृतप्रणाममेह्येहीत्यभिदधानोदूरा
देवप्रसारितभुजयुगलःशयनतलादीषदुच्छ्वसितमूर्तिरानंदजलापूर्यमाणलोचनःसमुद्भूतपुलकतयासीव्यन्निवैकीकुर्वन्निवपिबन्नि
वतंपिताविनयावनतमालिलिंग। आलिंगितोन्मुक्तस्यपितुश्चरणपीठसमीपेपिंडीकृतमुत्तरीयमाक्षिप्यतांबूलकरंडवाहिन्यास्त्वरमा
सनीकृतमपनयेतिशनैर्वदन्नग्रचरणेनतमुत्सार्यचंद्रापीडःक्षितितलएवनिषसाद। अनंतरंनिहितेचास्मासनेराज्ञासुतनि
र्विशेषमनुपगतोवैशंपायनोन्यवीदत्‌। मुहूर्त्तमिवविस्मृतचामरोत्क्षेपनिश्चलानांवारविलासिनीनांसाभिलाषैरनिलचलितकुवल
यदलदामदीर्घैराजिलतरतरलतारसारैरवलुप्यमानइवदृष्टिपातैःस्थित्वागर्भपुत्रवत्सलांमातरमभिवाद्यदर्शनलालसायथा
क्रमंसर्वाजननीर्दर्शनेनानंदयेतिविसर्जितःपित्रासविनयमुत्थायनिवारितपरिजनोवैशंपायनद्वितीयोऽन्तःपुरंप्रवेश्ययोग्येनरा

जपरिजनेनोपदिश्यमानवर्त्मांतःपुरमाययौ। तत्र धवलकंचुकावछन्नशरीरैरनेकशतसंख्यैः श्रियमिव क्षीरोदकल्लोलैः समंतात्परिवृतां
शुद्धांतांतर्वंशिकैरतिप्रशांताकाराभिश्च कषायरक्तांबरधारिणीभिः संध्याभिरिव सकललोकवंद्याभिः प्रलंबश्रवणपाशाभिर्विदितानेकक
थालापवृत्तांताभिः श्रुतपूर्वाः कथाः कथयंतीभिर्वाचयंतीभिरितिहासपुस्तकानि ददतीभिर्धर्मोपदेशान्निवेदयंतीभिः पुण्याः कथाः जरत्प्रव्रा
जिकाभिर्विनोद्यमानामुपरचितस्त्रीवेषजाधरणगृहीतविकटप्रसाधनेन वर्षवरजनेन संसेव्यमानामनवरतविधूयमानबालव्यज
नकलापामंगनाजनेन च वसनाभरणकुसुमपटवासतांबूलतालवृंतांगरागभृंगारधारिणा मंडलोपविष्टेनोपास्यमानां पयोध
[redacted]रावलंबितमुक्ताभरणाम् चलवलयमध्यप्रवृत्तगंगाप्रवाहामिव मेदिनीमासन्नदर्पणपतितमुखप्रतिबिंबामर्कबिंबप्रविष्टशशिमं
डलामिव दिवं समुपसृत्य मातरं ननाम। सा तु ससंभ्रममुत्थाय सलष्पाज्ञा संपादनदक्षपार्श्ववर्तिनि परिजने स्वयमेव कृतावतरण
का प्रस्नुतपयोधरक्षरत्पयोबिंदुच्छलेन द्रवीभवत्स्नेहाकुलेन निर्गच्छतेव हृदयेनांतःस्नुतशक्तानीवाभिध्यायंती मूर्द्धन्युपाघ्राय तं सु

चिरमाश्लिष्य·अनंतरंचतथैवकृतयथोचिताचारमाश्लिष्यवैशंपायनंस्वयमुपविश्यविनयादवनितलेसमुपविशंतमारुह्यबलादनि
च्छंतमपिचंद्रापीडमुत्संगमारोपितवती·ससंभ्रमपरिजनोपनीतायामासंद्यामुपविष्टेचवैशंपायनेचंद्रापीडंपुनःपुनरालिंग्यललाट
देशेवक्षसिभुजशिखरयोश्चमुहुर्मुहुःकरतलेनपरामृशंतीविलासवतीतमवादीत्·वत्सकठिनहृदयस्तेपितायेनेयमाकृतिरीदृ
शीत्रिभुवनलालनीयाक्लेशमतिमहांतमिमंतंकालंलंभिता·कथमसिसोढवानिमांगुरुजनयंत्रणांमहतींबालस्यापिसतःकठोर
स्येवतेमहद्धैर्यमहोविगतशिशुजनक्रीडाकौतुकश्लाघवमर्भकस्यापिहृदयमहोगुरुजनस्योपरिनिर्व्याजरसाधारणीसर्वेषाम
धापितुःप्रसादात्क्षमस्ताभिरुपेतोविद्याभिरालोकितोस्येवमचिरेणैवकालेनानुरूपाभिर्वधूभिरुपेतमालोकयिष्यामीत्ये
वमभिदधायलज्जास्मितावनतमात्मनुखप्रतिबिंबगर्भविकचकमलकृतकर्णपल्लवावतंसइवकपोलेपर्यचुंबदेनं·एवं
चतत्रापिनातिचिरमेवस्थित्वाक्रमेणसर्वांतःपुराणिदर्शनेनानंदयामास·निर्गत्यचराजकुलद्वारावस्थितमिंद्रायुधमारुह्यतथैवले

नराजपुत्रलोकेनानुगम्यमानःशुकनाशंद्रष्टुमयासीत्।यानावस्थितविविधगजघटासंकटमनेकतुरंगसहस्रसंबाधमपरिमितजन
समूहसहस्रसंमर्दसंकुलमेकदेशोपविष्टैःसाहस्रशोनिबद्धचक्रवालैरनेककार्यागतैर्दर्शनोत्सुकैःसमंततोविविधशास्त्रांजनो
न्मीलितलोचनैश्चीवरच्छन्ननाविनमानुरागिभिर्धर्मपटैरिवावगुंठितैःशाक्यशासनपथबोधपैरक्तपटैःपाशुपतैर्द्विजैश्चभूरि
मासेव४ वानिशम्यमानमभ्यंतरप्रविशतांचसामंतानांजघनोपविष्टपुरुषोत्संगावस्थितछत्रकुब्जाभिरतिचिरावस्थाननिर्वेदमुकुमाधार
णाभिर्निश्चलावस्थानप्रचलायिताभिःसहस्रशःकरिणीभिराकीर्णंशुकनाशगृहद्वारमासाद्यसत्वरप्रधावितैर्द्वारदेशावस्थि
तैःप्रतीहारपुरुषैरनिवार्यमाणोपिराजकुलइवराजपुत्रोबाह्यांगणएवतुरंगादवततार।द्वारदेशावस्थापिततुरंगश्चवैशंपाय
नमवलंब्यपुरःप्रधावितैःसमुत्सारितपरिजनैस्तथैवप्रतीहारमंडलैरुपदिश्यमानमार्गस्तथैवचलितमुकुटकोटिभिर्नरेंद्र
वृंदैःसेवासमुपस्थितैरुत्थायोत्थायप्रणम्यमानस्तथैवप्रचंडप्रतीहारहुंकारजनितभयमूकीभवत्परिजनानिप्रचलितवेत्रलताचकित शिव:

सामंतचक्रचरणशतचलितवसुंधरं णिकक्षांतरगिरिनिरीक्षमाणं क्ष्मेवनवनवसुधावदातप्रासादसहस्रनिरंतरं द्वितीयमिवराजकुलं
शुकनाशभवनं विवेश। प्रविश्य चानेकनरेंद्रसहस्रमध्योपविष्टमपरमिव पितरमुपदर्शितविनयो दूरादवनतेन मौलिना शुकनाशं ववं
दे। शुकनाशस्तु ससंभ्रममुत्थायानुपदेशोत्थितराजलोकः सादरमभिमुखमागत्याविरलपरः प्रहर्षविस्फारितलोचनमागतानंदज
लकणः सह वैशंपायनेन प्रगाढमालिलिंग। आलिंगितोन्मुक्तश्च सादरोपनीतमपहाय रत्नासनं भवनावेव राजपुत्रः सकु
पाविशत् तत्र च वैशंपायनः। समुपविष्टे च राजपुत्रे शुकनाशवर्जमन्यदखिलमवनिपालचक्रमुज्झितनिजासनमवनितलमभ
जत। स्थित्वा च तत्र मुहूर्तमिव शुकनाशः सद्भुजनप्रीतिपुलकैरंगैरेव समानहृदयहर्षप्रकर्षस्तमब्रवीत्। तात चंद्रापीड यद्य
लुदेवस्य तारापीडस्य समाप्तविद्यमुपारूढयौवनमालोक्य भवंतं सुचिराद्भुवनराज्यफलप्राप्तिरुपजाताद्य सम्यक्। सर्वा गुरुजनाशि
षोद्यफलितमनेकजन्मांतरोपात्तमवदातं [redacted] कर्माद्य प्रसन्नाः कुलदेवतानां यथुण्यभाजां नवाहशाक्तिर्भुवनविस्मयहेतवः पुत्र

तांप्रतिपद्यंतेकेद्वयःकोयममानुषीशक्तिःकचेदमशेषविद्याग्रहणसामर्थ्यमहोधन्याःप्रजायासांत्वरलनगीरप्रतिमोभवानुत्पन्नःपालयि
ताकिंखलुसुकृतमवदातंकर्मवसुंधरयाययासिभर्त्तासमासादितोहरिवक्षःस्थलनिवासासक्तव्यसनिनीहताखलुलक्ष्मीर्याविग्रहव
ती भवंतंनोपसर्पतिसर्वथाकल्पकोटीर्महावराहइवदंष्ट्रावलयेनवह बाहुनावसुंधराभारंसहपित्रेत्यभिधायचस्वयमाभरण
वसनकुसुमांगरागादिभिरभ्यर्च्यविसर्जयांचकारः विसर्जितश्चासौस्थायांतःपुरंप्रविश्यदृष्ट्वावैशंपायनमातरंमनोरमाभिधानांनिर्ग
त्यसमारुह्येंद्रायुधंपित्रापूर्वकल्पितंप्रतिच्छंदकमिवराजकुलस्यद्वारावस्थितसितपूर्णकलशमाबद्धहरितवंदनमालमुल्लसि
तसितपताकासहस्रमभ्याहतमंगलतूर्यरवपरिपूरितदिगंतरमुपरचितविकचकमलकुसुमप्रकरमचिरकृताग्निकार्य
मुज्वलविविक्तपरिजनमुपपादिताशेषगृहप्रवेशमंगलंकुमारोभवनंजगाम॰गत्वाचश्रीमंडपावस्थितेशयनेमुहूर्त्तमुपविश्यस
हतेनराजपुत्रलोकेनाभिषेकादिकैंमकरोद्दिवसविधिं॰अभ्यंतरेचस्वशयनीयगृहएवेंद्रायुधस्यावस्थानमकल्पयद्देवंप्रायेणवा

मणगावसानं१

स्पंदंतेनतदहःपरिणतिमुपययौ·गगनतलादवतरंत्यादिवसश्रियःपद्मरागनूपुरमिवस्वप्रभापिहितरंध्रं रविमंडलमुन्मुक्तपादंपपात·सलि
लमवाङ्मुखरथचक्रमार्गानुसारेणदिवसकरस्यवासरालोकःप्रतीचीककुभमगात्·अ[redacted]भिनवपक्ववन्लोहितेनकरेणेवाधोमुख
प्रसृतेनदिवसकरविंबेनवासरःकमलरागमधोबंनमार्ज·कमलिनीपरिमलपरिचयागतालिमालाकुलितकंठकालपाशैविव
कवाकमिथुनमाकृष्यमाणंविजघटे·करपुटैरादिवसांतमापीतमरविंदमधुरसमिवरक्तातपच्छलेनगगनगमनखेदाद्दिवदि
वसकरविंबंववाम·क्रमेणचप्रतीचीकर्णपूररक्तोत्पलेलोकांतरमुपगतेभगवतिगभस्तिमालिनिसमुल्लसितायामंबरतलतडा
गविकचकमलिन्यांसंध्यायांकुसुमागरूपंकपत्रलतास्विवतिमिरलेखासुस्फुरंतीषुदिशांमुखेषालिकुलमलिनेनकुवलयव
नेनेवरक्तकमलाकरेतिमिरनिकरेणोत्सार्यमाणेसंध्यारागेकमलिनीनिपीतमातपमुन्मूलपितुमंधकारकरपक्षनेविविश
तमुरक्तकमलोदराणिमधुकरकुलेषुशनैःशनैश्चनिशाविलासिनीमुखावतंसपल्लवेगलितेसंध्यारागेदिक्षुविक्षिप्तेषुसंध्यादेवता

७० [redacted]र्चनबलिपिंडेषुशिखरदेशलग्नतिमिरस्तनारूढमयूरास्वपिमयूराधिष्ठितास्विवमत्सरयष्टिषुगवाक्षविवरनिलीनेषुप्रासादलक्ष्मी
कर्णोत्पलेषुपारावतेषुविगलविलासिनीसंवाहननिश्चलकांचनपीठासुमूकीभूतघंटास्वरास्वंतःपुरदोलासुभवनसरःकारण्डवाव
लंबितपंजरेषुविमलालापेषुशुकसारिकानिवहेषुसंगीतकविरामविश्रांतरवासूत्सार्यमाणासुवीणासुयुवतिनूपुररवरोपरमाति
मतेषुभवनकलहंसेष्वपनीयमानकर्णधंरवचामरनक्षत्रमालामंडनेषुमधुकरकुलश्यामकपोलभित्तिषुमत्तवारणेषुप्रदीयमा
नेषुराजवल्लभतुरंगममंदुराप्रदीपेषुप्रविशंतीषुप्रथमयामकुंजरघटासुकृतराजस्वस्त्ययनेषुनिःक्रमत्सुपुरोहितेषुविस
र्जितराजलोकविरलपरिजनेषुविस्तारितेष्विवराजकुलकक्षांतरेषुप्रज्वलितदीपिकासहस्रप्रतिबिंबचुंबितेषुकृतविकचचंप
कदलोपहारेष्विवमणिकुट्टिमेषुनिपतितदीपालोकासुरविरहोत्तप्तनलिनीविनोदनागतबालातपास्विवभवनदीर्घिकासुनिश्चल
तेषुपंजरकेसरिषुसमारोपितकार्मुकेगृहीतसायकेयामिकजनेवांतःपुरप्रविष्टेमकरकेतावचतंसपक्षेणैवविवसरागेषुकर्णोक्रिय

मार्गेषु सुरतदूतीवचनेषु सूर्यकांतमणिष्विव संक्रांतानलेषु ज्वलत्सु मानिनीनां शोकविधुरेषु हृदयेषु प्रवृत्ते प्रदोषसमये चंद्रापीडः
प्रज्वलितदीपिकाचक्रवालपरिवारः पद्भ्यामेव राजकुलं गत्वा पितुः समीपे मुहूर्तं स्थित्वा दृष्ट्वा च विलासवतीमागत्य स्वभव
नमनेकरत्नप्रभाशबलमुरगराजफणामंडलमिव हृषीकेशः शयनतलमधिशिश्ये। प्रभातायां च निशीथिन्यां समुत्थाय सम
नुज्ञातः पित्राभिनवमृगयाकौतुकाकृष्यमाणहृदयो भगवत्यनुदित एव सहस्ररश्मावारूढेंद्रायुधः प्रयातो बालेयप्रमा
णानाकर्षद्भिः श्यामीकरस्थैः खलाभिः कौलेयकानुजरग्याघ्रचर्मशबलवसनकंचुकधारिभिरनेकवर्णपट्टचीरिकोद्बद्धमौ
लिभिरुपाचितश्मश्रुगहनमुखैरेककर्णावसक्तहेमतालीपुटैराबद्धनिविडकक्षैरनवरतश्रमोपचितोरुपिंडकैः कोदंडपा
णिभिः श्वपोषकैरनवरतकृतकोलाहलैः प्रधावद्भिर्दिङ्मुखी क्रियमाणागमनोत्साहो बहुगजतुरगपदातिपरिवृतो घनं वनं य
यौ। तत्र च कर्णावतंसीकृते विकचकुवलयपलाशकांतिभिर्नवकलभकुंभभित्तिभिदुरैः श्वानारवैः श्वापदं कातर

वनमयचकितवनदेवतार्धवीक्षितो वनवराहान्केसरिणः शरभांश्चामराननेककुरंगकांश्च सहस्रशो जघानान्यांश्च जीवत एव महा
प्राणतया स्फुरतो जग्राह। समारूढे च मध्यमह्नः सवितरि विनाक्लांतो क्षितेनैव श्रमसलिलबिंदुवर्षमनवरतमुज्झतानुक्रमुहुरीश
नविघट्टनैः खणखणायितखरखलीनेन श्रमशिथिलमुखगलितफेनिलरुधिरलवेन पर्याणपट्टकानुसारेण लिप्तफेनराजि
नाकर्णावतंसीकृतमुकुलकुसुमशबलमलिपटलझंकाररवमनुसरं वनगमनचिह्नपल्लवस्तबकमुद्वहतेंद्रायुधेनोह्यमानः
समुज्झतस्वेदलवांतरांतराड्डीकृतमंडनेन मृगरुधिरलवशतशबलेन वारबाणेन द्विगुणतरमुपजनितकांतिरनेकरूपानुसा
रसंभ्रमपरिस्त्रस्तछत्रधारतया छत्रीकृतेन नवपल्लवेनानिवार्यमाणातपो विविधवनलताकुसुमरेणुधूसरो वसंत इव वि
गृहवानश्वखुररजोमलिनललाटाभिव्यक्तावदातस्वेदलेखो दूरविच्छिन्नेन पदातिजनेन शून्यीकृतपुरोभागः प्रजविनातुरंगमाधिरू
ढैरल्पावशिष्टैः सहराजपुत्रैरेवं मृगपतिरेवं वराह एवं वनमहिष एवं शरभ एवं रुहिण इति तमेव मृगयावृत्तांतमुच्चारयन्भवनमाजगाम। अवतीर्य च
तुरंगमात्ससंभ्रमप्रधावि

तपरिजनोपनीते समुपविश्यासने वारबाणमवतार्यापनीय चाशेषं कुरंगाधिरोहणोचितं वेषपरिग्रहमितस्ततः प्रचलिततालवृंतपवनाप
नीयमानश्रमो मुहूर्तं विशश्राम· विश्रम्य च मलिरजतकनककलशशतसनाथमंतर्विन्यस्तकांचनपीठं स्नानभूमिमगात्। निर्वर्त्तिताभिषेकश्चापार
स्य च विविक्तवसनपरिमृष्टवपुः स्वच्छदुकूलपल्लवाकलितमौलिर्गृहीतवाससः कृतदेवतार्चनस्यांगरागभूमौ समुपविष्टस्य राज्ञा विसर्जितम
हाप्रतीहाराधिष्ठिता राजकुलपरिचारिकाः कुलवर्द्धनासनाथाश्च विलासवतीहस्ताः सर्वतः पुरप्रेषिताश्चांतःपुरपरिचारिकाः पटलकविनिहिता
नि विविधान्याभरणानि माल्यान्यंगरागान्वासांसि चादाय पुरतस्तस्योपतस्थुः। उपनिन्युश्च· यथाक्रममादाय च ताभ्यः प्रथमं स्वयमुपलिप्य वैशंपायने
मुपरचितांगरागो दत्वा च समीपवर्त्तिभ्यो यथार्हमाभरणवसनांगरागकुसुमानि विविधमणिभाजनसहस्रसारं शारदमंबरतलमिव स्फुरितता
रागणमाहारमंडपमगच्छत्। तत्र च चाद्विगुणीकृतकुथासनोपविष्टः समीपोपविष्टेन तत्कुलोपवर्णनपरेण वैशंपायनेन यथार्हभूमिभागोपविष्टैस्तेन
राजपुत्रलोकेन हमस्मदीयमिति प्रसादविशेषदर्शनसंवर्द्धितसेवारसेनाहारविधिमकरोत्। उपस्पृश्य च गृहीतताम्बूलस्तस्मिन्मुहूर्तमिव

का०प०
का०पू०
७२

स्थित्वाइंद्रायुधसमीपमगमत्. तत्र चानुपविष्ट एव तत्कुलोपवर्णनमायालापाः कृपाः कृत्वा सत्यप्यात्मनी सलोकस्वेपार्श्वपरिवर्त्तिनि परिज
नेतत्कुलाहतहृदयः स्वयमेवेंद्रायुधस्य पुरोयवसमाकीर्य निर्गत्य राजकुलमयासीत्. तेनैव च क्रमेण गावलोक्य राजानमागत्य निशामनैषीत्. अ
परेद्युः प्रभातसमय एव संवीतः पुराधिष्ठितमवनिपतेः परमसंमानमनुमार्गागतया प्रथमे वयसि वर्त्तमान[illegible]याराजकुलसंवासप्रगल्भयाप्य
नुज्झितविनयया किंचिदुपारूढयौवनया शक्रगोपकालोहितरागेणांशुकेन रचितावगुंठनया सबालातपयेव पूर्वया ककुभा भ्रमत्खयशलितमनःशि
लातलवर्णानांगलावण्यप्रभाप्रवाहेणामृतरसनदीप्रस्रवेणेव भवनमाप्लावयंत्या ज्योत्स्नयेव शरत्कुमुदहासभयादपहाय रजनिकरमंडलमवती
र्णया राजकुलमटंतदेवतयेव चरणनिर्भिन्नत्वाकलितमणिनूपुरारुणितचरणयुगलया कूजत्कलहंसाकुलितकमलयेव मेखलिन्या महार्हहेममेखला कां
कलापकलितजघनस्थलया नातिनिर्भरोद्भिन्नपयोधरया मंदंमंदं भुजलताविक्षेपमें[illegible]षिविततनखमयूखछलेन धाराभिरिव लावण्यरसमनवर रामः
तं क्षरंत्या शिखुरवविसर्पिणि हारलतांशुरश्मिजाले निमग्नशरीरतया क्षीरसागरोन्मग्नवरुनयेव लक्ष्म्याव हलतांबूलकृष्णिमांधकारिताधरलेख ७२

यासमस्तुवत्ततुंगनासिकयाविकसितपुंडरीकधवललोचनयामरकतमणिकुंडलमकरपत्रभंगकोटिकिरणलातपाहतकपोलतयासकर्णपल्लवमिव
मुखमुद्वहंत्यापर्युषितभ्रमरस्वेदनरससतिलकालंकृतललाटपट्टयानुकाफलप्रायालंकारयाराधेयराजलस्पर्शोपपादितांगरागयानववनले
खयेवकोमलतनुलतयात्र्यंबकसुप्रतिष्ठितचरणयामरकतशालयेववेदिमध्ययामेरुवनलतयेवकनककूपमालंकृतयामनुभावाकारयानुग
म्यमानंकन्ययाकैलासनामानंकंचुकिनमायांतमपश्यत्. सकृतप्रणामःसमुपसृत्यक्षितितलनिहितदक्षिणकरोविज्ञापयामासकुमारम
हादेवीविलासवतीसमाज्ञापयतीयंखलुकन्यकामहाराजेनपर्वंकुलूतराजधानीमवजित्यकुलूतेश्वरदुहितापत्रलेखाभिधानाबालिका
सतीबंदीजनेनसहानीयांतःपुरपरिचारिकामध्यमुपनीतातास्याश्चविगतनाथाराजदुहितेतिचसमुपजातस्नेहयादुहितृनिर्विशेषमियं
तंकालमुपलालितासंवर्द्धिताच. तदियमिदानीमुचिताभवतस्तांबूलकरंकवाहिनीतिकृत्वामयाप्रेषितानचास्यामायुष्मतापरिजन
सामान्यदृष्टिनाभवितव्यंबालेवलालनीयास्वचित्तवृत्तिरिवचापलेभ्योनिवारणीयाशिष्येवद्रष्टव्या. सुहृदिवसर्वविश्रंभेष्वभ्यंत

रीकरणीयादीर्घकालसंवर्द्धितस्नेहतयास्वसुतायामिवहृदयमस्यामस्तिमेबलवानस्यांपक्षपातोमहानिजनराजवंशप्रसूताचार्हतीयमेवंविधानि
नियतंस्वयमेवेयमभिविनीतातयाकतिपयेष्वेवदिवसेषुकुमारमाराधयिष्यतिकेवलमतिचिरकालोपचिताबलवतीमेप्रेमप्रवृत्तिरस्यामविदित
शीलश्चास्याःकुमारइतिसंदिश्यतेसर्वथातथाकल्याणिनाप्रपालितव्यंयथेयमतिचिरमुपचितापरिचारिकातेभवतीसन्निधापाविरतव
वस्थिकैलासेकृताभिज्ञानप्रणामांपत्रलेखामनिमिषलोचनंसुचिरमालोक्यचंद्रापीडःयथाज्ञापयत्यंबेत्युक्त्वाकंचुकिनंप्रेषया
मास॰पत्रलेखाचततःप्रभृतिदर्शनेनैवसमुपजातसेवारसानदिवानरात्रौनसुप्तस्यनासीनस्यनोत्थितस्यनभ्रमतोनराजकुलग
तस्यच्छायेवराजसूनोःपार्श्वंमुमोचचंद्रापीडस्यापितस्यांदर्शनादारभ्यप्रतिक्षणमुपचीयमानामहतीप्रीतिरासीत्॰अभ्यधिकंप्रतिदि
वसमस्याःप्रसादमकरोत्॰आत्महृदयादव्यतिरिक्तामिवचैनांसर्वविश्रंभेष्वमन्यत॰एवंसमतिक्रामत्सुकेषुचिद्दिवसेषुराजाचंद्रापीड
स्ययौवराज्याभिषेकंचिकीर्षुःप्रतीहारानुपकरणसंभारसंग्रहार्थमादिदेश॰समुपस्थितयौवराज्याभिषेकंचतंकदाचिद्दर्शनार्थमागतमारूढ
५९

विनयमपिविनीततरमिच्छन्शुकनासःसविस्तरमुवाचतातचंद्रापीडविदितवेदितव्यस्याधीतसर्वशास्त्रस्यापितेनाल्पमप्युपदेष्टव्यमस्तिकेवलं
निसर्गतएवाभानुभेद्यमरत्नालोकोच्छेद्यमप्रदीपप्रभापनेयमतिगहनंतमोयौवनप्रभवमपरिणामोपशमोदारुणोलक्ष्मीमदःकष्टमनंजन
वर्त्तिसाध्यमपरमैश्वर्यतिमिरांधत्वंनशिशिरोपचारहार्योतितीव्रोदर्पदाहज्वरोष्मासततममूलमंत्रगम्योविषमोविषयविषास्वादमो
होनित्यस्नानशौचावध्योबलवान्रागमलावलेपोऽजस्रमक्षपावसानप्रबोधाघोराचराज्यसुखसन्निपातनिद्राभवतीत्यतोविस्तरे
णाभिधीयसेगर्भेश्वरत्वमभिनवयौवनत्वमप्रतिमरूपत्वममानुषशक्तित्वंचेतिमहतीखल्वनर्थपरंपरा·सर्वाविनयानामेकैक
मप्येषामायतनंकिमुतसमवायः।यौवनारंभेचप्रायःशास्त्रजलप्रक्षालननिर्मलापिकालुष्यमुपयातिबुद्धिरनुज्झितधवलतापिस
रागैवभवतियूनांदृष्टिः।अपहरतिचवात्येवशुष्कपत्रंसमुद्भूतरजोभ्रांतिरतिदूरमात्मेच्छयायौवनसमयेपुरुषंप्रकृतिरिंद्रियह
रिणहारिणीचसततमतिदुरंतेयमुपभोगमृगतृष्णिकानवयौवनकषायितात्मनश्चसलिलानीवतान्येवविषयस्वरूपाण्यास्वाद्य

मानानिमधुरतराण्यापतंतिमनसोनाशयतिचदिङ्मोहइवोन्मार्गप्रवर्त्तकःपुरुषमत्यासंगोविषयेषुभवादृशाएवभवंतिभाजनान्युपदेशानाम
पगतमलेहिमनसिस्फटिकमणाविवरजनिकरगभस्तयोविशंतिसुखमुपदेशगुणाःगुरुवचनममलमपिसलिलमिवमहदुपजन
यतिश्रवणस्थितंशूलमभव्यस्येतरस्यचकरिणइवशंखाभरणमाननशोभासमुदयमधिकतरमुपजनयतिहरतिसकलमतिम
लिनमपिदोषजातमुपदेशःप्रशमहेतुःपरिणामइवपलितरूपेणशिरसिजजालममलीकुर्वन्गुणरूपेणतदेवपरिणमयति
अयमेवचानास्वादितविषयरसस्यतेकालउपदेशस्यकुसुमशरशरप्रहारजर्जरितेहिहृदयेजलमिवगलत्युपदिष्टंअ
कारणंचभवतिदुःप्रकृतेरन्वयःश्रुतंवाविनयस्यचंदनप्रभवोनदहतिकिमनलःकिंवाप्रशमहेतुनापिनप्रचंडतरीभवति
वडवानलोवारिणागुरूपदेशश्चनामपुरुषाणामखिलमलप्रक्षालनक्षममजलंस्नानमनुपजातपलितादिवैरूप्यमजरं
वृद्धत्वमनारोपितमेदोदोषंगुरुकरणमसुवर्णविरचनमग्राम्यंकर्णाभरणमतीतज्योतिरालोकोनोद्वेगकरःप्रजागरोविशे

येणनुरक्तांविरज्याहितेषामुपदेष्टारः॥प्रतिशब्दकइवराजवचनमनुगच्छतिजनोभयांदुद्दामदर्पश्वयथुस्थगितश्रवणविवराश्चोपदिश्यमानम
पितेनशृण्वंतिशृण्वंतोपिचगजनिमीलितेनावधीरयंतःखेदयंतिहितोपदेशदायिनोगुरूनहंकारदाहज्वरमूर्छांधकारिताविह्वलाहि
राजप्रकृतिरलीकाभिमानोन्मादकारीणिधनानिराज्यविषविकारतंद्रीप्रदाराजलक्ष्मीरालोकयतुतावत्कल्याणाभिनिवेशीलक्ष्मीमे
वप्रथममियंहिसुभटखड्गमंडलोत्पलवनविभ्रमभ्रमरीलक्ष्मीःक्षीरसागरात्पारिजातपल्लवेभ्योरागमिंदुशकलादेकांतवक्र
तामुच्चैःश्रवसश्चंचलतांकालकूटान्मोहनशक्तिंमदिरायामदंकौस्तुभमणेरतिनैष्ठुर्यमित्येतानिसहवासपरिचयवशाद्विरह
विनोदचिह्नानिगृहीत्वेवोद्गतानह्येवंविधमपरमपरिचितमिहजगतिकिंचिदस्तियथेयमनार्यालब्धापिखलुदुःखेनपरिपाल्यते
दृढगुणपाशसंदाननिष्पंदीकृतापिनश्यतिउद्दामदर्पभटसहस्रोल्लासितासिलतापंजरविधृतापिक्रामतिमदजलदुर्दिनांधकार
गजघटितघनघटापरिपालितापिपलायतेनपरिचयंरक्षतिनाभिजनमीक्षतेनरूपमालोकयतेनकुलक्रममनुवर्त्ततेनशीलंपश्य

तिनवैदग्ध्यंगणयतिनश्रुतमाकर्णयतिनधर्ममनुरुध्यतेनत्यागमाद्रियतेनविशेषज्ञतांविचारयतिनाचारंपालयतिनसत्यमनुबुध्यतेनलक्ष
णंप्रमाणीकरोतिगंधर्वनगरलेखेवपश्यतएवनश्यतिअद्याप्यारूढमंदरपरिवर्त्तावर्त्तभ्रांतिजनितसंस्कारेवपरिभ्रमतिकमलिनी
संचरणव्यतिकरलग्ननलिननालकंटकेवनक्वचिन्निर्भरमाबध्नातिपदंअतिप्रयत्नविधृतापिपरमेश्वरगृहेषुविविधगंधगजगं
डमधुपानमत्तेवपरिस्खलतिपारुष्यमिवोपशिक्षितुमसिधारासुनिवसतिविश्वरूपमिवग्रहीतुमाश्रितानारायणमप्रत्ययबहुला
चदिवसांतकमलमिवसमुपचितमूल दंडकोशमंडलमपिमुंचतिभूभुजंलतेवविटपकानध्यारोहतिगंगेववसुजनन्यपितरंग
बुद्बुदचंचलादिवसकरगतिरिवप्रकटितविविधसंक्रांतिःपातालगुहेवतमोबहुलाहिडिंबेवभीमसाहसैकहार्यहृदयाप्रावृडिवाचिर
द्युतिकारिणीदुष्टपिशाचीवदर्शितानेकपुरुषोच्छ्रायास्वल्पसत्त्वमुन्मनीकरोतिसरस्वतीपरिगृहीतमीर्ष्ययेवनालिंगतिजनंगुणवं
तमपवित्रमिवनस्पृशतिउदारसत्त्वममंगलमिवनबहुमन्यतेसुजनमनिमित्तमिवनपश्यतिअभिजातमहिमिवलंघयतिशूरंकंटक

मिवपरिहरतिदारान्दुःस्वप्नमिव[redacted]नस्मरतिविनीतंपातालमिवनोपसर्पतिमनस्विनमुन्मत्तमिवउपहसतिपरस्परविरुद्धंचेंद्रजालमि
वदर्शयंतीप्रकटयतिजगतिनिजंचरितंतथाहिसंततमूष्माणमारोपयंत्यपिजाड्यमुपजनयतिउन्नतिमादधानापिनीचस्व
भावतामाविष्करोतितोयराशिसंभवापितृष्णांसंवर्द्धयतिईश्वरतांदधानाप्यशिवप्रकृतित्वमातनोतिबलोपचयमाहरंत्यपिल
घिमानमापादयतिअमृतसहोदरापिकटुकविपाकाविग्रहवत्यप्यप्रत्यक्षदर्शनापुरुषोत्तमरतापिखलजनप्रियारेणुमयीवस्व
च्छमपिकलुषीकरोति।यथायथाचपलाचेयंदीप्यतेतथातथादीपशिखेवकज्जलमलिनमेवकर्मकेवलमुद्वमति।तथाहिइयंसंव
र्द्धनवारिधारातृष्णाविषवल्लीनांव्याधगीतिरिंद्रियमृगाणांपरामर्शधूमलेखासच्चरितचित्राणांविभ्रमशय्यामोहदीर्घनिद्रा
णांनिवासजीर्णवलभीधनमदपिशाचिकानांतिमिरोद्गतिःशास्त्रदृष्टीनांपुरःपताकासर्वाविनयानामुत्पत्तिनिम्नगाक्रोधावे

=पुस्तं च पुस्तके लेप्यकर्मविज्ञानमोदपीतिबिम्बः। तथा चायमयगणैः सततं लेप्यकर्मणा तन्मयी इन्द्रजालमिव सो विद्वानमप्यप्रीतिविरोधाभासः। ४=

का·पू·

७६ 76

८२

गृहाणां आपानभूमिर्विषयमधूनां संगीतशाला भ्रूविकारनाट्यानां आवासदरी दोषाशीविषाणां उत्सारणवेत्रलता सत्पुरुष

व्यवहाराणां अकालप्रावृट् गुणकलहंसकानां विसर्पणभूमिर्लोकापवादविस्फोटकानां प्रस्तावना कपटनाटकस्य कदलिका कामकरिणो

वध्यशाला साधुभावस्य राहुजिह्वा धर्मेन्दुमण्डलस्य नहि तं पश्यामि यो ह्यपरिचितयानया न निर्भरमुपगूढो यो वा न विप्रलब्धो नि

यतमियमालेख्यगतापि चलति पुस्तमय्यपि इन्द्रजालमाचरति उत्कीर्णापि विप्रलभते श्रुताप्यभिसंधत्ते चिंतितापि वंचयति एवं

विधयापि चानया दुराचारया कथमपि दैववशेन परिगृहीता विक्लवा भवंति राजानः सर्वाविनयाधिष्ठानतां च गच्छंति अभिषेकसम

य एव चैषां मंगलकलशजलैरिव प्रक्षाल्यते दाक्षिण्यमग्निकार्यधूमेनेव मलिनीभवति हृदयं पुरोहितकुशाग्रसंमार्जनीभिरि

वापनीयते क्षांतिरुष्णीषपट्टबंधेनेवाच्छाद्यते जरागमनस्मरणमातपत्रमंडलेनेवापवार्यते परलोकदर्शनं चामरपव शिवः

नैरिवापह्रियते सत्यवादिता वेत्रदंडैरिवोत्सार्यंते गुणाः जयशब्दकलकलरवैरिव तिरस्क्रियंते साधुवादाः ध्वजपटपल्लवैरि ७६

वपरीतमस्यनेयशास्तथाहिकेचिच्छ्रमवशशिथिलशकुनिगलपुटचपलाभिःखद्योतोन्मेषमुहूर्त्तमनोहराभिर्मनस्विजनगर्हिताभिःसंपद्भिःप्रलो
भ्यमानाधनलवलाभावलेपविस्मृतजन्मानोनेकदोषोपचितेनदुष्टासृजेवरागावेशेनबाध्यमानाविविधविषयग्रासलालसैःपंच
भिरप्यनेकसहस्रसंख्यैरिवेंद्रियैरायास्यमानाःप्रकृतिचंचलतयालब्ध[redacted]प्रसरेणैकेनापिशतसहस्रमिवोपगतेनम
नसाकुलीक्रियमाणाविह्वलतामुपयांतिग्रहैरिवगृह्यंतेभूतैरिवाभिभूयंतेमंत्रैरिवावेश्यंतेसत्त्वैरिवावष्टभ्यंतेवायुनेव
विडंब्यंतेपिशाचैरिवग्रस्यंतेमदनशरैर्मर्माभिहताइवमुखभंगसहस्राणिकुर्वतेधनोष्मणापच्यमानाइवविचेष्टंतेगाढप्रहाराहता
इवांगानिनधारयंतिकुलीराइवतिर्यक्परिभ्रमंतिअधर्मभग्नगतयःपंगवइवपरेणसंचार्यंतेमृषावादविपाकसंजातमुखरोगा
इवातिकृच्छ्रेणजल्पंतिसप्तच्छदतरवइवकुसुमरजोविकारैरासन्न[redacted]वर्त्तिनांशिरःशूलमुत्पादयंतिआसन्नमृत्यवइवबंधुज
नमपिनाभिजानंतिउत्कंपितलोचनाइवतेजस्विनोनेक्षंतेकालदष्टाइवमहामंत्रैरपिनप्रतिबुध्यंतेजातुषाइवसोष्माणंनसहंतेदुश्[redacted]

का॰मु॰
७१
71

वारणाइवमहामानस्तंभनिश्चलीकृतानगृह्णंत्युपदेशंतृष्णाविषमूर्छिताःकनकमयमिवसर्वंपश्यंतिअसयइवपानवर्द्धिततैक्ष्ण्याःपरप्रेरि
ताविनाशयंतिदूरस्थितान्यपिफलानीवदंडविक्षेपैर्महाकुलानिशातयंतिअकालकुसुमप्रसवाइवमनोहराकृतयोपिलोकविना
शहेतवःश्मशानाग्नयइवातिरौद्रभूतयःतैमिरिकाइवादूरदर्शिनःउपसृष्टाइवक्षुद्राधिष्ठितभवनाःश्रूयमाणाअपिप्रेतपटहाइवोद्वेज
यंतिचिंत्यमानाअपिमहापातकाध्यवसायाइवोपद्रवमुपजनयंत्यनुदिवसमापूर्यमाणाःपापेनेवाध्मातमूर्त्तयोभवंतितदव
स्थाश्चव्यसनशतशरव्यतामुपगतावल्मीकतृणाग्रावस्थिताजलबिंदवइवपतितमप्यात्मानंनावगच्छंत्यपरेतुस्वार्थनि
ष्पादनपिशितग्रासगृध्रैरास्थाननलिनीबकैर्द्यूतंविनोदइतिपरदाराभिगमनं[redacted]वैदग्ध्यमितिमृगयाश्रमइतिपानंविलास
इतिप्रमत्ततांशौर्यमितिस्वदारपरित्यागमव्यसनितेतिगुरुवचनावधीरणमपरप्रणेयत्वमितिअजितभृत्यतांसुखोपसे
व्यत्वमितिनृत्तगीतवाद्यवेश्याभिसक्तिंरसिकतेतिमहापराधाकर्णनंमहानुभावतेतिपरिभवसहत्वंक्षमेतिस्वच्छंदतांप्रभुत्व

शिवः
७१

मितिदेवावमाननंमहासत्त्वतेतिबंदिजनख्यातिर्यशइतितरलताउत्साहइत्यविशेषज्ञतापक्षपातित्वमितिदोषानपिगुणपक्षमध्यारोपयद्भिरं
तःस्वयमपिविहसद्भिःप्रतारणकुशलैर्धूर्त्तैरमानुषाभिःस्तुतिभिःप्रतार्यमाणावित्तमदमत्तचित्ता नि निश्चेतनतयातथैवात्मन्यारोपि
तालीकाभिमानामर्त्यधर्माणोपिदिव्यांशावतीर्णमिवसदैवतमिवातिमानुषमात्मानमुत्प्रेक्षमाणाःप्रारब्धदिव्योचितचेष्टानुभा
वाःसर्वजनस्योपहास्यतामुपयांत्यात्मविडंबनांचानुजीविनाजनेनक्रियमाणामभिनंदंतिमनसादेवताध्यारोपणप्रतारणाद
सद्भूतसंभावनोपहताश्चांतःप्रविष्टापरभुजद्वयमिवात्मबाहुयुगलंसंभावयंतित्वगंतरितलोचनत्रयमिवस्वललाटमाशंकं
तेदर्शनप्रदानमप्यनुग्रहंगणयंतिदृष्टिपातमप्युपकारपक्षेस्थापयंतिसंभाषणमपिसंविभागमध्येकुर्वंतिआज्ञामपिवर
प्रदानंमन्यंतेस्पर्शमपिपावनमाकलयंतिमिथ्यामाहात्म्यगर्वनिर्भराश्चनप्रणमंतिदेवताभ्योनपूजयंतिद्विजातीन्नमानयंति
मान्यान्नार्चयंत्यर्चनीयान्नाभिवादयंत्यभिवादनार्हान्नाभ्युत्तिष्ठंतिगुरूननर्थकायासांतरितविषयोपभोगसुखमित्युपहसंतिविद्वज्जनंजरा

ग्रंपंस

वैक्लव्यप्रलपितमितिपश्यंतिवृद्धजनोपदेशं आत्मप्रज्ञापरिभवइत्यसूयंतिसचिवोपदेशाय कुप्यंतिहितवादिनेसर्वथातमभिनंदंतित
मालपंतितंपार्श्वेकुर्वंतितंसंवर्द्धयंतितेनसहसुखमवतिष्ठंतेतस्मैददतितंमित्रतामुपनयंतितस्यवचनंशृण्वंतितत्रवर्षंतितंब
78 हुमन्यंतेतमाप्ततामापादयंतियोहर्निशमनवरतमुपरचितांजलिरधिदैवतमिवविगतान्यकर्त्तव्यःस्तौतियोवामाहात्म्यमुद्भाव
यतिकिंवातेषांसांप्रतंयेषामतिनृशंसप्रायोपदेशनिर्घृणंकौटिल्यशास्त्रंप्रमाणंअभिचारक्रियाक्रूरैकप्रकृतयःपुरोधसोगुरव
:परामिसंधानपरामंत्रिणउपदेष्टारःनरपतिसहस्रभुक्तोज्झितायांलक्ष्म्यामासक्तिर्मारणात्मकेषुशास्त्रेष्वभियोगःसहज
प्रेमार्द्रहृदयानुरक्ताभ्रातरउच्छेद्यास्तएवंप्रायातिकुटिलकष्टचेष्टासहस्रदारुणेराज्यतंत्रेस्मिन्महामोहकारिणिचयौवनेकु
मारतथाप्रयतेथायथानोपहस्यसेजनैर्ननिंद्यसेसाधुभिर्नधिक्क्रियसेगुरुभिर्नोपालभ्यसेसुहृद्भिर्नशोच्यसेविद्वद्भिर्यथाचनप्र
काश्यसेविटैर्नप्रतार्यसेकुशलैर्नास्वाद्यसेभुजंगैर्नावलुप्यसेसेवकवृकैर्नवंच्यसेधूर्तैर्नप्रलोभ्यसेवनिताभिर्नविडंब्यसेलक्ष्म्या शिवः

ननसंसिमदयन्ते नोन्मत्तीक्रियसे मदेन न नाक्षिप्यसे विषयैर्न ह्रियसे रागेण नापह्रियसे सुखेन कामं भवान्प्रकृत्यैव धीरः पित्रा च महता प्रयत्नेन
समारोपितसंस्कारस्तरलहृदयमप्रतिबुद्धं च मदयंति धनानि तथापि भवद्गुणसंतोषो मामेवं मुखरीकृतवानिदमेव च पुनःपुनर
भिधीयसे विद्वांसमपि सचेतनमपि महासत्वमप्यभिजातमपि धीरमपि प्रयत्नवंतमपि पुरुषमियं दुर्विनीता खलीकरोति ल
क्ष्मीरिति सर्वथा कल्याणैः पित्रा क्रियमाणमनुभवतु भवान्नवयौवराज्याभिषेकमंगलं कुलक्रमागतामुद्वह पूर्वपुरुषैरूढां धु
रमवनमय द्विषतां शिरांस्युन्नमय बंधुवर्गमभिषेकानंतरं प्रारब्धदिग्विजयः परिभ्रमन्विजितामपि तव पित्रा सप्तद्वीपभूषणां
पुनर्विजयस्व वसुंधरां अयं च ते कालः प्रतापमारोपयितुमारूढप्रतापो हि राजा त्रैलोक्यदर्शी सिद्धादेशो भवतीत्येतावद
भिधायोपशशाम उपशांतवचसि च शुकनासे चंद्रापीडस्ताभिरुपदेशवाग्भिः प्रक्षालित इवोन्मीलित इव स्वच्छीकृत इवा
भिषिक्त इवाभिलिप्त इवालंकृत इव पवित्रीकृत इवोद्भासित इव प्रीतहृदयो मुहूर्तं स्थित्वा स्वभवनमाजगाम ततः कतिपय

दिवसापगमेचराजास्वयमुत्क्षिप्तमंगलकलशःसहशुकनासेनपुरोहितपुरोधसासंपादिताशेषराज्याभिषेकमंगलमनेकनरपतिस
हस्रपरिवृतःसर्वेभ्यस्तीर्थेभ्यःसर्वाभ्योनदीभ्यश्चसर्वेभ्यश्चसागरेभ्यःसमाहृतेनसर्वौषधीभिःसर्वफलैःसर्वरत्नैःसर्वमंगल्यैश्चपरिगृहीतेना
नंदबाष्पजलमिश्रेणमंत्रपूतेनवारिणासुतमभिषिषेच।अभिषेकसलिलार्द्रदेहंचतंलतेवनिजपादपंपादपांतरमकुंचंसपितनारापी ई॰
डंतत्क्षणमेवसंचक्रामराजलक्ष्मीः।अनंतरमखिलांतःपुरपरिवृतयाप्रेमार्द्रहृदययाविलासवत्यास्वयमापादतलासामोदिना
चंद्रातपधवलेनचंदनेनानुलिप्तमूर्तिरभिनवविकसितकुसुमकृतशेखरोगोरोचनाच्छुरितदेहोदूर्वाप्रवालरचितकर्णपू
रोदीर्घदशमनुपहतमिंदुधवलंदुकूलयुगलंवसानःपुरोहितप्रतिबद्धप्रतिसरप्रसाधितपाणिरभिनवराजलक्ष्मीकमलिनी
मृणालेनाभिषेकार्द्रदर्शनार्थमागतेनेवसप्तर्षिमंडलेनेवहारेणालिंगितवक्षःस्थलःसितकुसुमग्रथिताभिराजानुलंबिनीभिर्दि
दुकरकलापकोमलाभिर्वैकक्षकस्रग्भिर्निरंतरनिचितशरीरस्तयाधवलवेषपरिग्रहतयाचनरसिंहइवविधुतकेसरनिकरःकै

त्नासइवसर्वस्रोतस्विनीस्रोतोराशिरैरावतइवमंदाकिनीमृणालजालजटिलःक्षीरोदइवस्फुरितफेनलवाकुलस्तत्कालप्रतिपन्नवेत्रदंडेनपि
त्रास्वयंपुरःआरब्धसमुत्सारणःसभामंडपमुपगम्यकांचनमयंशशीवमेरुशृंगंचंद्रापीडःसिंहासनमारुरोह·आरूढस्यचाकृतयथोचित सम
सकलराजलोकसंमानस्यमुहूर्त्तंस्थित्वादिग्विजयप्रयाणशंसीप्रलयघनघटाघोषघर्घरध्वनिरुदधिरिवमंदरपातैर्वसुंधरापी
ठमिवयुगांतनिर्घातैरुत्पातजलधरइवतडिद्दंडपातैःपातालकुक्षिरिवमहावराहघोणाभिघातैःकनककोणैरभिहन्यमानःप्रस्थानदुंदुभि
रामंद्यरंद्रध्वानःयेनध्वनतासमाध्मातानीवोन्मीलितानीवप्रपक्कतानीवविस्तारितानीवगर्भीकृतानीवप्रदक्षिणीकृतानीवरवेणभुवनां
तराणिविश्लेषितानीवदिशामन्योन्यबंधसंधयोयस्यचभयवशाविषमवलितोत्तानफणासहस्रेणालिंग्यमानइवरसातलेशेषेणमुहुर्मु
हुरभिमुखवर्द्धितोर्ध्वघातैरुपहूयमानइवदिक्षुदिक्कुंजरैःसंत्राससरचितैरेचकमंडलैःप्रदक्षिणीक्रियमाणइवनभसिदिवसकररथतुर
गैरपूर्वगर्वाट्टहासशंकाकुर्मुंडकृतेनाश्रुतपूर्वोभाष्यमाणइवकैलासशिखरिणित्र्यंबकवृषभेणकृतगंभीरकंठगर्जितेनप्रसुजृंभमा

नष्टइवविबुधसमन्वैरावतेनांकुशपूर्वशरीरावेशतिर्यगवनमितविषाणमंडलेनप्रणम्यमानइवकृतांतमहिषेणसंत्रस्तलोकपालाकर्णितोबभ्रा
मत्रिभुवनमखिलंनिनादः।ततोदुंदुभिरवमाकर्ण्यजयजयेतिचसर्वतःसमुद्घुष्यमाणजयशब्दःसिंहासनात्सहद्विषतांश्रियासंचचालचंद्रा
पीडः।समंतात्ससंभ्रमोत्थितैश्चपरस्परसंघट्टविघटितहारच्छत्रविगलितानवरतमाशाविजयप्रस्थानमंगललीलालाजानिवमुक्ता
फलप्रकरान्क्षरद्भिःपारिजातइवविसितकुसुममुकुलपातिभिःकल्पपादपैरैरावतइवविमुक्तकरसीकरैरशेषागजैर्गगनाभोगइवता
रावर्षिभिर्दिगंतरैर्जलदकालइवस्थूलजलधारासारस्यंदिभिर्जलधरैरनुगम्यमानोनरपतिसहस्रैरास्थानमंडपान्निरगात्।
निर्गत्यचपूर्वारूढयापत्रलेखयासमध्यासितांतरासनामुपपादितप्रस्थानसमुचितमंगल्यालंकारांससंभ्रमाधोरणोपनीतांकरेणु
कामधिरुह्यचलरेचकचक्रीकृतक्षीरोदावर्तपांडुरेणदशवदनबाहुदंडावस्थितकैलासकांतिनामुक्ताफलजालिनाशतशला
केनातपत्रेणनिवार्यमाणातपोनिर्गंतुमारेभे।निर्गच्छंश्चाभ्यंतरएवस्थितएवप्राकारांतरितदर्शनानांद्वारएवस्थितानांप्रतिपालय

तांराज्ञा मुखमयूखानां कुमुदिनीनां अलक्तक इव द्युतिमुषा बहलेनालोहितबालातपेन राज्याभिषेकानंतरमस्त तेन स्वप्रतापवह्निनेवा
स्तर्थपिंजरीक्रियमाणादशदिशोयो वराज्याभिषेकजन्मनानिजानुरागेणेव रज्यमानमवनितलमासन्नरिपुविनाशपिशुनेन दिग्दा
हेनेव पाटलीक्रियमाणमंबरतलमभिमुखागमनुवनतललक्ष्मीचरणालक्तकरसेनेव लोहितायमानातपं दिवसं [redacted] दद
र्श। विनिर्गतश्च ससंभ्रमप्रचलितगजघटासहस्रैरन्योन्यसंघट्टजर्जरितातपत्रमंडलैराद्रराद्दनवरतप्रणामशिथिलितमणिमुकुटपंक्ति
भिरावर्जितरत्नकर्णपूरैः कपोलस्थलस्खलितकुंडलैराजन्यसेनापतिनिर्दिश्यमाननामभिरवनिभुजांचक्रवालैः प्रणम्यमानो वहल
सिंदूररेणुपाटलेनास्फितितलसेलायमानस्थूलमुक्ताकलापावचूलेन सितकुसुममालाजालशबलशिरस्कालंलग्नसंध्यातपेनेति
र्यगावर्जितश्वेतगंगाप्रवाहेणेव तारागणदंतुरितशिखरशिलातलेन मेरुगिरिणेव गंधमादनेनानुगम्यमानः कनकालंकारप्रभाकल्मा
षितावयवेन चरणकुंकुमस्थासकेन वाकृष्यमाणेन धनुषा सनाथीकृतपुरोभागः शनैः शनैः प्रथममेव शातकृतवीमाशामभिप्रत

का॰पू॰

८१

४१

स्य॰चलितगजघटाकंपितधवलातपत्रमनेककल्लोलपरंपरापतितचंद्रमंडलप्रतिबिंबसहस्रमहाप्रलयजलमिवप्लावितमहीतलम
कुतोभूत[redacted]कलकलमखिलंसंचचालबलंउच्चलितस्यचास्यस्वलवनादुपपादितप्रस्थानमंगलोधवलवासाःसितकुसुमां
गरागोमरुतावलसमूहेननरेंद्रशरीरैश्चानुरज्यमानोधृतधवलातपत्रोद्वितीयइवयुवराजस्त्वरितपदसंचारयाकरिण्यावेगेणा
यनःसमाजगाम॰आगत्यचरजनिकरइवरवेरासन्नवर्तीबभूव॰अनंतरमितश्चेतश्चविनिर्गतोयुवराजइतिसमाकर्ण्यप्रधावतांव
लानांभरेणचलितकुलशैलकीलितजलधिजलतरंगगतेवतस्मिन्क्षणमाचकंपमेदिनी॰संमुखागतैरन्यैश्चान्यैश्चप्रणमद्भिर्भूमि
पालैरस्खलितजालजटिलचूलिकानांमणिमुकुटानामालोकेनोन्मिषितबकुलरोचिषानवपत्रमंगिनीनांकेयूरमंडलीनांप्रभासंतानेन
क्वचिद्विकीर्यमाणचाषपक्षक्षोदइवक्वचिदतुलतिलकशिखिकुलचलच्चंद्रकशतसंभाराइवक्वचिदकालजलधरतडित्तरलाइवक्व
चित्सकल्पतरुपल्लवाइवक्वचिच्छतयज्ञचापाइवक्वचित्सबालातपाइवाक्रियंतदशदिशः॰धवलान्यपिविविधमणिनिकरकला

येरुत्सर्पिभिश्चशमणिमरीचिनिर्मायूराणीवारजंतरज्ञामातपत्राली·क्षणेनचतुरंगमयमिवमहीतलंकुंजरमयमिवदिक्चक्रमातपत्र
मंडलमयमिवांतरिक्षंध्वजमयमिवांबरतलमिभमदगंधमयमिवसमीरणोभूपालमयीवप्रजाभरणांशुमयीवदृष्टिःकि
रीटमयइवातपश्चामरमयइवदिवसोजयशब्दमयमिवचत्रिभुवनमभवत्·सर्वतश्चकुलपर्वताकारैःप्रचलद्भिर्मत्तवारणैरुत्सा
रितवंश्रमंडलानिनैश्चप्रेंखद्भिरातपत्रैःसंवर्त्तकांभोदगंभीरभीमनादेनचध्वनतादुंदुभिनातारकावर्षसदृशेनविसर्पतागजशी
करनिकरेणधूमकेतुधूसरैश्चोल्लसद्भिरवनिरजोखंडकैर्निर्घातपातगंभीरघोषैश्चकरिकंठगर्जितैःक्षतजकणवर्षैश्च
भूषणाचल्लमतामतंगजकुंभसिंदूररेणुनासंक्षुभितजलधिजलकल्लोलचंचलाभिश्चप्रविसर्पंतीभिस्तुरंगममालाभिरंध
कारितदिगंतरेणवातवरतंक्षरतागजमदधारादुर्दिनेनकलकलेनचभुवनांतरव्यापिनामहाप्रलयकालइवसंजज्ञे·बल
कोलाहलभीताइवधवलध्वजनिवहानिरंतरमुद्गमायुयुः·कापिसर्वदिशोमलिनावनिरजःसंस्पर्शशंकिनमिवसमदगजघ

रावचूलसहस्रसंस्थगितांबरमपससार:अनुरवेत्रलतासमुत्सार्यमाणाश्च तुरगखुररजोधूसरतामीताइवार्ककिरणा मुमुचु
:पुरस्तादागमिभकरसीकरनिकरनिर्वापणत्रस्तइवातपत्रसंछादितातपो दिवसो ननाश। बलभरजर्जरीकृतामरकलकरिचर
णाएतनाधिकाध्दितीयेवप्रयाणभेरीभैरवंन्नमीरणस्तगुल्फद्वयसे चतुरंगमुखविनिःसृतसितफेनपल्लवे मदपयसि मग्नस्तु
रंगकरिणां प्रचस्खलुःपदेपदे पदातयः। हरितालपरिमलनिभेन चातिपटुना गजमदामोदेनानुलिप्तस्य सामयसेवस्तु
पयपयोऽतिविलासगंधगहणसामर्थ्यं घ्राणेंद्रियस्य। क्रमेण च प्रसर्पतो बलस्य पुरःप्रधावतां जनकदंबकानां कोलाहलेन ना
रतरदीर्घेण च काहलानां निनादेन खुररवविमिश्रेण च वाजिनां हेषारवेणानवरतकर्णतालस्वरसंपृक्तेन च दंतिनामाडंबरर
वेण ग्रैवेयककिंकिणीक्वणितानुस्यूतेन च गतिवशविषमविरावविलीनां घंटानां टंकृतेन मंगलशंखशब्दसंवर्धितध्वनीनां च प्रया
णपटहानां निनादेन मुहुर्मुहुर्विलक्ष्यमाणानां नांनिःस्वनेन जर्जरीकृतश्रवणपुटस्य मूर्छेवाभवज्जनस्य। शनैःशनैश्च बल
नांडिंडिमा१

संक्षोभजन्मासिलैरनेकवर्णतया क्वचिज्जीर्णशष्पकरकोऽश्यामः क्वचिच्चक्रमेलकघनसन्निभः क्वचित्परिणतरक्तकरोमपल्लवमलिनः क्वचि
त्पक्वोर्णतंतुपांडुरः क्वचिज्जरठमृणालदंडधवलः क्वचिज्जरत्कपिकेशकपिलः क्वचिदुरवृषभरोमंथफेनपिंडपांडुरः त्रिपथगाप्रवाहह
रविरहणप्रणवः कुपितइव मुंचन्समामानारम्भपरिहासइव रूथल्लयनानिलक्षिपतइव पिबन्करिकरशीकरजलानि प्रस्रवाणि वोमत
नगगनतलमालिनि वक्रइव चुंबन्मदलेखां गणपतिद्विरदरचयन्कपि कुंभस्थलीषु परं सुपात्रविजयश्रवणरलन्यलनाकांजरागमव
पांडुरीकुर्वन् शिरांसि मुद्रयन्निव पक्ष्मायसंस्थितनोदधिमाजिप्राल्लिवमकरंदमधुपंकलग्नः कर्णोत्पलानि मद्रकेलकरिकर्णताल
ताडनत्रस्तइव विशन्कर्णशंखोदरविवराणि पीयमानइवोन्मुखीभिरवनिपतिमुकुटमणिभंगमकरिकाभिरभ्यर्च्यमानइव तुरगखु
रविक्षेपविलुलितैः फेनपल्लवकुसुमस्तबकैरनुगम्यमानइव मत्तगजघटाकुंभभित्तिसंभवेन धातुधूलिवलयेनालिंग्यमानइव चल
चामरकलापविधुतेन पटवासपांसुना शोभायमानइव नरपतिशेखरसहस्रपरिच्युतैः कुसुमकेसररजोभिरुत्सानराक्तैरिवादि

का·पू·
८३
83

वसकरमंडलंअकांडएव पिबन्नपप्रस्थानमंगलप्रतिसरवलयमालिकासु गोरोचनाचूर्णायमानः ककचकृतचंदनधूसरारे
णुरुत्पपात· अपरिमाणबलसंघट्टसमुपचीयमानश्च शनैःशनैः संहरन्निव विश्वमशेषमकालकालमेघपटलमेदुरो विस्तारमुप
गंतुमारेभे तेन च क्रमेणोपचीयमानबहलकर्दमेनादिग्विजयमंगलध्वजेन रिपुकुलकमलप्रलयनीहारेण राजलक्ष्मीविलासपटवास
चूर्णेन अहितातपत्रपुंडरीकखंडतुषारेण सैन्यकुंजरपीडितमहीतलमहांधकारेण चलद्दलजलदकालकर्दवकुसुमोद्गमेन दिवसकर
करकमलवनोद्दलनच्छिपयपथेन गगनमहीतलप्लावनप्रलयपयोधिपूरेण त्रिभुवनलक्ष्मीशिरोवगुंठनपटेन महावराहकेसर
निकरकर्बुरेण प्रलयानलधूमराजिमांसलेन पातालतलादिवोत्तिष्ठता चरणेभ्य इव निर्गच्छता लोचनेभ्य इव निष्पतता दिग्भ्य इव आग
च्छता नभस्तलादिव पतता पवनादिवोल्लसता रविकिरणेभ्य इव संभवता नपहृतचेतनेन निःशमनेनानवगणितसूर्यांधकारेणाप शिवः
र्याप्तालोपस्थितेन भूमिगृहेणानुदितताराग्रहगणेनिव हेमवत्कूलनिशमप्रदोषेणापतितसलिलेन जलधरसमयेनाभ्रांतभुजंगेनरसातल ८३

लेन हरिच्चरणेनेव संवर्द्धमानेन त्रिभुवनमलंघ्यतरजसा। विकचकुवलयवनमिव नवोद्गमेन गगनजलमवष्टभ्यमानमलक्ष्यत
ज्ञीशदप्रेन पांडुनाच्छिति सोदेनेव कुलरजो भ्रसारितमशिशिरकिरणविंबमवचलचामरमिव निःप्रभमभवत्। दुकूलपटधवलाकृ
हेलिकेव कलुषतामाजगाम गगनापगा नरपालबलभरमतिगुरुमसहमाना पुनरिव भारावतारणार्थममंबरलोकमारुरोह रजोभर
व्याजेन मही। निःशेषनिपीतातपमंतरद्यमानमिव जलधिजले पृथु[illegible]सारितरविरथध्वजपटमपतद्दवनिरजः। मुहूर्तेन च गर्भवा
समिव संहारसागरजलमिव कृतांतजठरमिव महाकालमुखमिव नारायणोदरमिव ब्रह्मांडमिव विवेश पृथिवी। रजोमयइव बभूव
र दिवसः। प्रलयमयइव चक्राश्रिरे ककुभो रेणुरूपेणेव परिणतमंबरतलमेकमहाभूतमयमिव त्रैलोक्यमासीत्। अथ निजमदेभसं
ततानां दंतिनां दिशि दिशि करविवरविनिःसृतैः स्वरद्भिः शीकरधवलैः शीकरासारैः कर्णपल्लवप्रहतिविस्तृतैश्च विसर्पिभिर्मद
नबिंदुदुर्दिनेन हेषारवविप्रकीर्णैश्च वाजिनां लालाजललव[illegible]आलक्षेरूपशमितरजसि पुनरपि जातालोकासु हृत्तुसागरसलि

लादिवोन्मग्नमालोकनदपरिमाणंबलमुपजातविस्मयःसर्वतोऽन्तःहृष्टिश्चंद्रापीडमाबभाषेवैशंपायनःयुवराजकिंनजितेनदेवेनम[illegible]राधि
राजेनतारापीडेनयज्जेष्यसिकादिशोनवशीकृतामावशीकरिष्यसिकानिदुर्गाणिनप्रसाधितानियानिप्रसाधयिष्यसिकानिद्वीपांतराणि
नात्मीकृतानियान्यात्मीकरिष्यसिकानिरत्नानिनोपार्जितानियान्युपार्जयिष्यसिकेवानप्रणताराजानःकैर्नविरचितःशिरसिवा
बालकमलकुङ्मलकोमलःसेवांजलिःकैर्नमस्तकीकृताःप्रतिबद्धहेमपट्टैर्ललाटैःसत्तानुवःकैर्नघृष्टाःपादपीठेचूडामणयःकैर्नप्र
तिपन्नावेत्रयष्टयःकैर्नोद्धूतानिचामराणिकैर्नोच्चारिताजयशब्दाःकैर्नपीताःकिरीटपत्रमकरैःसलिलधाराइवनिर्मलास्तवचर
णनखमयूखराजयःएतेहिचतुरुदधिजलावगाहदुर्ललितबलमहाबलिनादशरथभगीरथभरतदिलीपालर्कमांधातृप्र
तिमाःकुलाभिमानशालिनःसोमपायिनोमूर्धाभिषिक्ताःराजन्यांसर्वपार्थिवास्त्वाम्नतिमिवाभिषेकपयःपातपूतेचूडामणिपल्ल
वेरुद्वहंतिमंगल्यामवज्ञरणरजःसंहतिमेभिश्चियमादिपर्वमैरिवापरैर्धृताधरित्री॰एतानिचाप्यमीबामाक्षावितदशदिशोनरोत्तानिसे

स्यानिभवंतमुपासते॰ तथाहि पश्य पश्य यस्यां यस्यां दिशि विक्षिप्यते चक्षुस्तस्यां तस्यां रसातलमिवोज्जिरति वसुधेव स्त्रते ककुभ इव वमंति गगन
मिव वर्षति दिवस इव सृजति बलानि॰ अपरिमितबलभराक्रांतामन्ये स्मरति महाभारतसमरसंक्षोभस्याद्य क्षितिः। एवंविधस्य देशेषु परि
स्खलितमंडलो ध्वजानां गणः पाल्लिमकुसुमहलाभ्रमति कदलिकावनांतरेषु मयूरवमाली सर्वतश्च मदजलमुचां करिणां मेलापकमिलन
सुरभिणि निरंतरमग्नावेणिकावाहिनि मदवारिणि निपतितमधुकरकुलकलकलकलिता कालिंदीजलकल्लोलकलितेव भाति भू
तधात्री सैन्यसंक्षोभेन यात्सरितइव गगनतलमुत्सर्पिताः संध्यादयं सेना दिक्चक्रवालमिंदुधवला ध्वजपंक्तयः सर्वथा चित्रं यल्लाघवि
घटितसकलकुलशैलेन संधिबंधाः सहस्रधा एकलीभवंति बलभरेण धरित्र्याः यद्बलभरपीडितवसुधाधारणविधुरेण न दलंति फणि
नांपत्युः फणाभित्तय इत्येवं वर्णयन् एव तस्य युवराजः समुच्छ्रितानेकतोरणं तृणमयप्राकारमंदिरसहस्रसंबाधमुल्लासितधवल
पटमंडपसंशोभितनीनावासमभिमवाप॰ तस्मिंश्चावतीर्य राजवत्सर्वाः क्रियाश्च कारः सर्वैश्च तैः समं सनरपतिभिरमात्यैश्च विविधाभिः कथा

निर्विनोद्यमानस्तं दिवसमशेषमभिनवपितृवियोगजन्मना शोकावेगेनायास्यमानहृदयो दुःखेनासवाहयत्· अतिवाहितदिवसश्च यामिनीम
पि स्वशयनीयस्थेनातिदूरे निहितशयनेनातिप्रयत्नेन वैशंपायनेनान्येन च समीपे क्षितितलविन्यस्तकुथप्रसुप्तया पत्रलेखया सहांतरपित
त्सक्रमं नरपतिसंकटमंतरसुकनाशमयं कुर्वन्नालापैनाल्पमुपजातनिद्रः प्रायेण जागरेण निन्ये· प्रत्यूषे चोत्थाय तेनैव क्रमेणागनवन्त
प्रयाणकैः प्रतिप्रयाणकमुपचीयमानेन सेनासमुदायेन जर्जरयन्वसुंधरामाकंपयन्गिरीननुत्सिंचन्सरितो रिक्तीकुर्वन्सरांसि चूर्णय
न्काननानि समीकुर्वन्विषमाणि दलयन्दुर्गाणि पूरयन्निम्नानि निम्नयन्स्थलानि प्रातिष्ठत· शनैःशनैश्च स्वविषयान्परिक्रमन्नुल्लला
न्नेमयन्नाश्वासयन्भीतान्नक्षयन्सारणागतानुन्मूलयन्विटपकानुत्सादयन्कंटकानभिषिंचन्स्थानस्थानेषु राजपुत्रान्समर्जयन्नला
निप्रतीच्छन्नुपायनानि गृह्णन्करानादिशन्देशव्यवस्थां स्थापयन्क्वचिच्चिह्नानि कुर्वन्कीर्तनानि लेखयन्न[illegible]सनानि पूजयन्नग्रजन्म
नः प्रणमन्मुनीन्पालयन्नाश्रमान्जनयन्जनानुरागं प्रकाशयन्विक्रमं स्थापयन्प्रतापमुपचिन्वन्यशो विस्तारयन्गुणान्प्रख्यापयन्

सद्धदिनमाम्प्रभृत्येवलावनाभिषेकतनरेणुभिरधूसरीकृतसकलसागरसलिलः पृथिवींविचचार·प्रथमंप्राचींततस्त्रिशंकुतिलकांततो
वरुणलांछनामनंतरंससप्तर्षिताराशबलांदिशंविजिग्ये·वर्षत्रयेणात्मीकृताशेषद्वीपान्तरंसकलमेवचतुरंबुधिरशनावलयपरिखा
प्रमाणंबभ्राममहीमंडलं·ततःक्रमेणानवर्जितसकलभुवनतलःप्रदक्षिणीकृतवसुधापरिभ्रमन्कदाचित्कैलाससमीपचारिणांहेम
जटनाम्नांकिरातानांसुवर्णपुरंनामनिवासस्थानंनातिविप्रकृष्टंपूर्वजलनिधेर्जित्वाजयाह·तत्रचनिर्जितलभुवनतलपर्यटन
खिन्नस्यनिजबलस्यविश्रामहेतोःकतिपयान्दिवसानतिष्ठत्·एकदातुतत्रस्थएवेंद्रायुधमारुह्यमृगयानिर्गतोविचरन्काननेशैल
शिखरादवतीर्णंयदृच्छयाकिन्नरमिथुनमद्राक्षीत्·अपूर्वतयातुसमुपजातकुतूहलःकृतयत्नस्तद्ग्रहणाभिलाषस्तत्समीपमादरादुपस
र्पिततुरगःसमुपसर्पन्नदृष्टपूर्वपुरुषदर्शनत्रासप्रधावितंचतत्त्वरायमाणमनवरतपार्ष्णिप्रहारद्विगुणीकृतजवेनेंद्रायुधेनैका
कीनिर्गत्यनिजबलसमूहात्सुदूरमपससार·अचिरेण·अगम्यमनइदंगृहीतमिदंगृहीतमित्यतिरभसाकृष्टचेतामहाजवनयातुरं

गमस्यमुहूर्त्तमात्रेणैकपदमिवासहायस्तस्मात्प्रदेशात्पंचदशयोजनमात्रमध्वानंजगाम·तच्चानुबध्यमानंकिन्नरमिथुनमालोकयतएवा
स्यसंमुखापतितमचलतुंगशिखरमारुरोह·आरूढेचतस्मिन्क्रमेणैस्तदनुसारिणीदृष्टिंनिवर्त्यद्दष्टिमचलशिखरप्रस्तरप्रतिहतगतिप्रसरं
विधृततुरंगमश्चंद्रापीडस्तस्मिन्कालेसमुपारूढश्रमःस्वेदार्द्रशरीरमिंद्रायुधमात्मानंचावलोक्यक्षणमिवविचार्यस्वयमेवविहस्याचिंतयत्
किमितिनिरर्थकमयमात्मामयाशिशुनेवायासितःकिमनेनगृहीतेनागृहीतेनवाकिन्नरयुगलेनप्रयोजनंयदिगृहीतमिदंततः
किंअथनगृहीतंततोपिकिंअहोमेमूर्खतापापःप्रकारःअहोयत्किंचनकारितायामादरःअहोनिरर्थकव्यापारेष्वभिनिवेशःअहोबा
लिशचरितेष्वासक्तिःसाधुफलंकर्तुक्लिश्यमाणंवृथाजातमवश्यकर्तव्यक्रियारम्भस्तुनातिफलीभूतासुहृत्कार्यमनुपपाद्यमानंनो
पपन्नंराजधर्मःप्रवर्तितोननिष्पन्नोगुर्वर्थःप्रारब्धोनपरिसमाप्तःविजिगीषुव्यापारप्रयत्नोनसिद्धःकस्मादहमेवंविधइवोत्सृष्टपरिवा
रएतावतींभूमिमायातःकस्माच्चमयानिःप्रयोजनमिदमनुसृतमश्वमुखद्वयमितिवि चार्यमाणोयमत्यल्पमात्मैवपरइवहाससमुपज

नयतिनजाने कियताधुना विछिन्नमितो बलमननुयायि मे महाजवो हीन्द्रायुधो निमेषमात्रेणातिदूरमतिक्रामति नचागच्छन्नाम यानुरगवेग
वशात्किन्नरमिथुनेन बहुदूरमिनाऽस्मिन्नविरलतरुशतगहनगुल्मलतासंतानगहने निरंतरनिपतितशुष्कपर्णावकीर्णतले महाव
नेपंथानिरूपितः येन प्रतिनिवृत्य यास्यामि न चास्मिन्प्रदेशे प्रयत्नेनापि परिभ्रमद्भिर्मर्त्यधर्मा कश्चिदासाद्यते यः सुवर्णपुरगामिनं
पंथानमुपदेक्ष्यति श्रुतं हि मया बहुशः कथ्यमानमुत्तरेण सुवर्णपुरं सीमांतलेखा पृथिव्याः सर्वजनपदानां ततः परतो निर्मानुषमरण्यं
तच्चातिक्रम्य कैलासगिरिरिति· अयं च कैलासस्तदिदानीं प्रतिनिवृत्यैकाकिना स्वयमुत्प्रेक्ष्योत्प्रेक्ष्य दक्षिणामाशां केवलमंगीकृत्य
गंतव्यं· आत्मकृतानां हि दोषाणां नियतमनुभवितव्यं फलमात्मनैवेत्यवधार्य वामकरतलचलितरश्मिपाशस्तुरंगमं व्यावर्त्तयामा
स· व्यावर्त्तितुरंगश्च पुनश्चिंतितवान्· अयमधुना सितप्रभाभास्वरो भगवान्भानुरधुना दिवसश्रियो रसनामणिरिव मध्यमलंकरो
तिपरिश्रांतश्चायमिंद्रायुधस्तदेनं तावद्ग्राहीतकतिपयदूर्वाप्रवालकवलं कस्मिंश्चित्सरसि शिलाप्रस्रवणे वा सरिदंभसि वा स्नानपी

तोयदकमपनीतश्रमं कृत्वा स्वयं च सलिलं पीत्वा कस्यचित्तरोरधश्छायायां मुहूर्त्तमात्रं विश्रम्य ततो गमिष्यामीति चिंतयित्वा सलिलमन्वेषमाणो
मुहुर्मुहुरितस्ततो दत्तदृष्टिः पर्यटन्नलिनीजलावगाहोत्थितस्याचिरापक्रांतस्य महतो गिरेरिव वनगजयूथस्य चरणोन्नदितैः पंकप
लैरार्द्रीकृतं करावकृष्टैश्च मृणालमूलनालैः कमलकलापैः कल्माषितमार्द्रार्द्रैश्च शैवलप्रवालैः श्यामलितोद्दामुद्दलितैश्च कुमुदकुव
लयकह्लारकुड्मलैस्तरंगतरला विधुरितमुत्पातैश्च सकर्दमैः शालूककंदैराकीर्णं खंडितै[illegible]श्च कुसुमस्तबकसारैर्नवपल्लवै
राच्छादितमात्मनाभिश्च कुसुमोपविघटनिष्पिष्टषट्पदसत्वरूपदाभिर्वनलताभिराकुलितमभिनवबकुलकुसुमपरिमलवाहिना
वतमालपल्लवरसश्यामेन मदजलेन सर्वतः सिक्तमार्गमद्राक्षीत् उपजातजलाशश्च तं प्रतीपमनुसरन्नुद्ग्रीवदृश्यैकरूपरिच्छिन्न
मंडलाकारैः सरलसालसल्लकीप्रायैरविरलैरपि निःशारवनतया विरलैरिवोपलक्ष्यमाणैः पादपैरुपेतेन स्थूलकपिलवालुकेन
शिलातलबहुलतयाविरलतृणोलपेन वनद्विपदशनदलितमनःशिलाधूलिकपिलेनाभंगिनीभिरुत्कीर्णाभिरिव पत्रलंगकु

तहदि२

डिकाभिःपाषाणभेदकमंजरीनिर्झरीकृतशिलांतरालेनानवरतगलद्गुग्गुलुद्रुमद्रवार्द्रीकृतदृषदाशिखरस्खलच्छिलाजतुरसपिच्छिलोप
लेनटंकण हयखुरखंडितालस्तोदपांसुलेनाखुनखरोत्खातबिलप्रकीर्णकांचनचूर्णेनसिकतानिमग्नचमरकस्तूरिकामृगीखुरपं
क्तिनासंशीर्णजीर्णरंकुरल्लकरोमप्रकरनिचितेनविषमशिलाच्छेदोपविष्टजीवंजीवकयुगलेनवनमानुषमिथुनाध्यासितमध्यु
हामुखेनगंधपाषाणपरिमलामोदिनावेत्रलताप्रतानप्ररूढवेणुनाकैलासतलेनकिंचिदध्वानंगत्वातस्यैवकैलासशिखरि
णःपूर्वोत्तरेदिग्भागेजलनारण्यलसज्जलभरधूसरमिवबकुलपल्लवांधकारमिवपुंजीकृतमत्यायतंतरुषंडंददर्श.तंच
संमुखागतेनकुसुमरजःकषायामोदिनाजलसंसर्गशिशिरेणाशीकरिणाचंदनरसस्पर्शेनालिंग्यमानइवजलतरंगमा
रुतेनकमलमधुपानमत्तानांचश्रोत्ररागिभिःकलहंसानांकोलाहलैराहूयमानइवविवेश.प्रविश्यचतस्यतरुषंडस्यमध्य
भागेमणिदर्पणमिवत्रैलोक्यलक्ष्म्याःस्फटिकभूमिगृहमिववसुंधरादेव्यानिर्गमनमार्गमिवसागराणांनिस्यंदमिवदिशा

मंस्वर्गा

वतारमिवगगनतलस्यकैलासमिवद्रवतामापन्नंतुषारगिरिमिवविलीनंचंद्रातपमिवरसतामुपनीतंहराट्टहासमिवजलीभूतंत्रिभुवनपु
ण्यराशिमिवसरोरूपेणावस्थितंवैडूर्यगिरिजालमिवसलिलाकारेणपरिणतंशरदभ्रमिवद्रवीभूयैकत्रनिष्यंदितमादर्शभव
नमिवप्रचेतसःस्वच्छतयामुनिमनोभिरिवसज्जनगुणैरिवहरिणलोचनप्रभाभिरिवमुक्ताफलांशुभिरिवनिर्मितमापूर्णप
र्यंतमप्यंतःस्पष्टदृश्यसकलतलतयारिक्तमिवोपलक्ष्यमाणमनिलोद्भूतजलतरंगशीकरधूलिजन्मभिःसर्वतःसमुपास्थितैः
संरक्ष्यमाणमिवेंद्रचापसहस्रैःप्रतिमानिभेनांतःप्रविष्टसकलकाननशैलनक्षत्रग्रहचक्रवालंत्रिभुवनमुन्मिलत्पंकजेनोद
रेणनारायणमिवबिभ्राणमासन्नकैलासावतीर्णस्यचशतशोभगवतःखंडपरशोर्मज्जनोन्मज्जनक्षोभचलितचूडामणिचंद्र
खंडच्युतेनामृतरसेनजलक्षालितवामार्धकपोलगलितलावण्यप्रवाहानुकारिणासंमिश्रितजलमुपकूलतमालवनप्रति
बिंबांधकारितान्यंतरैर्दृश्यमानरसातलमहारेरिवसलिलप्रदेशैर्गंभीरतरंदिवाप्युपजातनिशाशंकैश्चक्रवाकमिथुनैःपरि शिव:

क्रियमाणनीलोत्पलवनगहनमसकृत्पितामहपरिपूरितकमंडलुपरिपू नजलमनेकशोवालखिल्यकदंबककृतसंध्योपासनंकुश
:सलिलावतीर्णसावित्र्याजनितदेवतार्चनकमलसहस्रंसप्तर्षिमंडलस्नानपवित्रीकृतंसर्वसिद्धवधूधौतकल्पलतावल्कल
धुसरीकृतोदकमुदककीडारोहद्गतानांगुह्यकेश्वरांतःपुरकामिनीनांमकरकेतुचापचक्राकृतिभिरतिविकटैरावर्त्तैर्भि
र्नाभिमंडलैरापीतसलिलंक्वचिद्वरुणहंसाघ्रातकमलवनमकरंदंक्वचिद्दिग्गजमज्जनजर्जरितजरन्मृणालदंडंक्वचिन्नवकट
यत्नविषाणकोटिखंडिततटशिलाखंडंक्वचिद्यममहिषशृंगशिखरविक्षिप्तफेनपिंडंक्वचिदैरावतदशनमुसलखंडितकुमुदषं
डंयौवनमिवोत्कलिकाकुलमुत्कंठितमिवमृणालवलयालंकृतंमहापुरुषमिवमीनमकरकूर्मचक्रभकटलक्षणंषण्मुखचरि
तमिवश्रूयमाणक्रौंचवनिताप्रलापंभारतमिवपांडुधार्त्तराष्ट्रकुलपक्षस्फुरितक्षोभममृतमथनसमयमिवतीरवास्थितशितिकंठपी
यमानविषंकृष्णबालचरितमिवतटकदंबशाखाधिरूढहरिकृतजलप्रपातकीडंमदनध्वजमिवमकराधिष्ठितंदिव्यमिवानि

मिवलोचनरमणीयमरण्यमिवविजृंभमाणपुंडरीकंतुरगकुलमिवानंतशनपत्रप्रभोद्भासितंकंसबलमिवमधुकरकुलोपगीयमानकु
वलयापीडंकृष्णभुजयुगलमिवनागसहस्रपीतपयोगंडूषंमन्मथमिववत्सलशिशिरवनमसत्साधनमिवादर्शनमतिमनोहरमा
च्छोदंनामसरोदृष्टवान्।आलोकमात्रेणापगतश्रमोदृष्टामनस्येवमकरवं।अहोनिष्फलमपिमेतुरगमुखमिथु
नानुसरणमनेनावलोकयतःसरःसफलतामुपगतमद्यपरिसमाप्तमीक्षणयुगलस्यद्रष्टव्यदर्शनफलमालोकितःखलुर
मणीयानामंतोदृष्टआह्लादनीयानामवधिर्वीक्षितामनोहराणांसीमांतलेखाप्रत्यक्षीकृताप्रीतिजननानांपरिसमाप्तिर्विलोकि
तादर्शनीयानामवसानभूमिरिदमुपासरःसलिलममृतरसमनुसादयतावेधसापुनरुक्तमिवनीतास्वस्तदिदमपिखल्व
मलमिवसर्वेंद्रियाह्लादनसमर्थममतिविमलतयाचक्षुषःप्रीतिमुपजनयतिशिशिरतयास्पर्शसुखमुपाहरतिकमलसुगंधितयाघ्राणमाप्याय
यतिहंसमुखरतयाश्रुतिमानंदयतिनिमग्नंचास्यैवदर्शनंतत्स्यपानपरित्यजतःस्वादुतयारसनामाह्लादयति।इतिभगवान्कैलासनिवासव्यसनमुमापतिः

नखलुसांप्रतमाचरतिजलशयनदोहदं देवोरथांगपाणिः।यदिदममृतरससुरभिसलिलमपहायलवणरसपरुषपयस्युदन्वति
स्वपिति।नूनंचेदंनप्रथममासीत्सरः।येनप्रलयवराहघोणाभिघातभीताभूतधात्रीकलशयोनिपानपरिशूलितसकलसलिलंसागरमव
तीर्णा।अन्यथायद्यनागाधापातालगंभीरेऽस्मिन्निमग्नाभवेन्महाप्रलयक्षितिकिमेकेनमहावराहस्यहस्तैरपिनासादिताभवेत्।नूनंचा
स्मादेवसलिललेशमादायादायमहाप्रलयेप्रलयपयोदाःप्रलयदुर्दिनांधकारितदिशःप्लावयंतिभुवनांतरालानि।अन्येचयत्तत्सलि
लमयंब्रह्मांडरूपमादौभुवनमभवत्तदिदंपिंडीभूयसरोऽपदेशेनावस्थितमितिविचारयन्नेवतस्यशिलाशकलकर्कशवालुकाभायांवि
द्याधरोद्धृतसनालकुमुदकलापार्चितानेकचारुसैकतलिंगमरुंधतीदत्तदिनकरार्घपयःपर्यस्तरक्तकमलशोभितमुपकूलशिलातलो
पविष्टजलमानुषनिषेव्यमाणातपमभ्यर्णतयाचकैलासस्यस्नानागतमातृमंडलपदपंक्तिमुद्रांकितमवतीर्णभस्मरचितमग्नोत्थितग
लदंतेंद्रूलनमकरवगाहावतीर्णगणपतिगंडस्थलमदस्रावमलसितजलमतिप्रमाणपानानुमीयमानतटपिनाकस्यापिनीत्वंहरवताप्रमार्गंदर्शितं

१० तीरमासाद्य तुरगादवततार अवतीर्य च व्यपनीतपर्याणमिंद्रायुधमकरोत् क्षितितललुठितोत्थितं गृहीतकतिपययवसग्रासं सरोवती
र्यपीतसलिलमिच्छया स्नातं चोत्थाप्यानंतरमस्य समीपवर्तिनस्तरोर्मूलशाखायामपगतखलीनं हस्तपाशशृंखलया कनकमय्या च
रणे बध्वा कृपाणिकावलूनानुस्थिताचायनः कतिचित्सरस्तीरदूर्वाप्रवालकवलान् पुनरपि सलिलमवततार। ततश्च प्रक्षालि
तकरयुगलश्चातकइव कृत्स्नाजलमयमाहारं चकार चक्रवाकइवास्वाद्य मृणालशकलानि शिशिरांशुरिव कराग्रैः स्पृष्ट्वा कुमुदनि
फणीवाभिनंद्य जललवतरंगवातानंनगशरप्रहारातुर इवोरसि विधाय नलिनीदलोत्तरीयमरण्यगज इव शीकरार्द्रपुष्करो
पशोभितकरः सरःसलिलादुद्गात् प्रत्यग्रभग्नशिशिरैश्च समृणालकैर्जलकणिकाचितैः कमलिनीपलाशैर्लतामंडप
परिक्षिप्तशिलातले प्रस्तरमास्तीर्य निधाय शिरसि पिंडीकृतमुत्तरीयं निषसाद मुहूर्तं विश्रांतश्च तस्य सरस उत्तरे तीरप्रदेशे
समुच्चरंतमुन्मुक्तकवलेन निश्चलश्रवणपुटेन तन्मुखीभूतेनेंद्रायुधेन प्रथममाकर्णितं श्रुतिसुभगं वीणातंत्रीझंकारमिश्रममानुषं गीतशब्दमशृणोत्

श्रीवेलं

श्रुत्वा च

कुतोऽविगतमर्त्यसंपाते प्रदेशे गीतध्वनेः संभूतिरिति उपजातकौतुकः कमलिनीपत्रप्रक्षराद् उत्थाय तामेव गीतसंपातसंचितां दिशं चक्षुः
प्राहिणोत् । अतिदवीयस्तया तु तस्य प्रदेशस्य प्रयत्नव्यापृतलोचनोऽपि विलोकयन्न किंचिद् ददर्श । तमेव केवलमनवरतं गीतशब्दं शुश्राव ।
कुतूहलवशाच्च गीतध्वनिमनुवर्जिज्ञासया कृतगमनबुद्धिर्दत्तपर्याणमिंद्रायुधमारुह्याभिमुखीनैः प्रथमप्रस्थितैरप्राथितैरपि वन
हरिणैरुपदिश्यमानवर्त्मा सप्तच्छदवकुलैलाल वंगलवलीलतालोलकुसुमसुरभिपरिमलसुखायालिकुलविरुतमुखरितया तमा
लनीलया दिशा गमनदवीयस्येव पश्चिमया सरस्तीरवनलेखया निमित्तीकृत्य तं गीतध्वनिमभिप्रतस्थे । क्रमेण च संमुखागतैर्झनि
र्झरजलकणजालजनितजडिमभिर्जर्जरितभूर्जवल्कलैः धूर्जटिवृषरोमंथफेनबिंदुवाहिभिः गणमुखशिखंडिशिखाचुंबिभिः अंबिका
कर्णपूरपल्लवोल्लासनदुर्ललितैः कत्तरकुरुभामिनीकपोलस्थलप्रस्वेदलवनसेहरिभिराकंपितकंदलैर्नमेरुकुसुमपांसुपातिभिः पशुप
तिजटाबंधार्धवासुकिपरिपीतशेषैराह्लादिभिः पुण्यैः कैलाससमाकृतैरभिनंद्यमानो गत्वा च तं प्रदेशं सर्वतो मरकतहरितैः हारिहारीतकति

का.पू.
९१
91

रमणीयैर्भ्रमद्भृंगराजनखरजर्जरितजरठकुम्भैलैरुन्मदकोकिलकुलकवलीकृतसहकारकोमलाग्रपल्लवैरुन्मदखड्गरएणचक्रवा
लयाचालितविकचचूतकलिकैश्चकितचकोरचुंबितमरिचांकुरैरश्वंपकपयगपुंजपिंजरकपिंजलजग्धपिप्पलीफलैः फलभ
रनिकरनिपीडितनिबिडदाडिमीनीडप्रसुप्तकलविंकैः प्रक्रीडितचपलकपिकुलकरतलताडनतरलितनाडीपुटैरन्योन्यकल
हकुपितकपोतपक्षपालीपतितकुसुमैः कुसुमरजोराशिसारिसारिकाश्रितशिखरैः शुकशतमुखनखशिखरशकलित
फलस्फीतैर्जलधरजललुब्धविप्रलब्धमुग्धचातकध्यानमुखरतमालषंडैरलिकलभकोमलपल्लवपेशितलवलीवल
येरालीयमाननवयौवनमत्तपारावतपक्षक्षेपपर्यस्तस्तबकैरनुपवनकंपितकोमलकदलीदलवीजितैरविरलफल
निकरावनतनालिकेरवनैरकठोरपत्रपुटपूगविटपिपरिवृतैरनिवारितविहंगतुंडखंडितपिंडखर्जूरजालकैर्मस्तु
रवरमञ्जरीमधुररवविरावितांतरैराकलितकलिकाकलापदंतुरैरंतरांतराकेलासनरागिणीतरंगितसिकतिलभूमि शिवः

नील२ क२२

मार्गैर्वनदेवताकरतलनिवहनिभमलक्तकजललवसिक्तमिव किसलयनिकरमतिसुकुमारसुखहडिर्ज्यपिपर्णकयास मुदित
चमरीकुलनिषेवितमूलैः कर्पूरागुरुप्रायैर्दिशपुष्पैरिव घनावस्थानैः कुमुदैरिवादत्तदिनकरप्रवेशैः शिशिराभ्यंतरैर्दाशरथिबलै
रिवां२ र्जनैर्नलपरिगतप्रांतैः प्रासादैरिव सपारावतैर्भवननापसैरिव सन्निहितवेत्रासनैः रुद्रैरिव नागलतावबद्धपरिकरैः रुसुधि
रुत्पुलिनैरिव निरंतरोद्भिन्नप्रवाललतांकुरजालकैरभिषेकसलिलैरिव सर्वौषधिकुसुमफलकिसलयसनाथैराले
ख्यगृहैरिव ककुवर्णचित्रपटशकुनिसंघशोभितैः कुरुभिरिव सारघजंघिजोपसेवितैर्महासमरमुखैरिव पुन्नागसमाकृष्ट
शिलीमुखैर्महाकरिभिरिव प्रलंबवालपल्लवस्थपुटलैरप्रमत्तपार्थिवैरिव पर्यंतावस्थितवकुलगुल्मकैर्दृशिनेरि
वभ्रमरसंघातकवचावृतकायैः प्रमाणाभिमुखैरिव वानरकरांगुलिस्पर्शपुंजैरेव निपातश्यने विवासिंरुपादांकितनलैरावद्ध
पंचतपःक्रियैरिवोच्छ्रितशिखिमंडलपरिवृतैर्दीक्षितैरिव कृतस्थलसाररदिषाणकंडूयनैर्जरदुरुमुनिभिरिव जगन्मलवालकमंडलधरैर्दिं

द्रजालिकैरिवहरिणीभिःपादपैःपरिवृतंचंद्रप्रभंनामास्यसरसःपश्चिमेतीरेकैलासपादस्यज्योत्स्नावदातया [redacted] प्रभयाधवल
यंतंप्रदेशंभूतलमागतंसन्निविष्टंभगवतःशूलपाणेःशून्यायतनमपश्यत्तत्रचपवनोद्धूतैरितस्ततःसमापतद्भिःकेतकीगर्भधूलि
भिर्धवलीक्रियमाणकायःपशुपतिदर्शनहेतोर्बलादिवप्रतिपाद्यमानोभस्मस्नानमायतनप्रवेशपुण्येशिवपरिस्खलमानःप्रविश्याद्र
क्षीचतुःस्तंभस्फाटिकमंडपिकातलप्रतिष्ठितमचिरोद्धृतैरार्द्रैर्दलशिखरगलज्जलबिंदुभिरूर्ध्वविपाटितचंद्रबिंबदलैरिवनिजाहरण
सावयवैरिवशेषफणाशकलैरिवपांचजन्यसहोदरैरिवक्षीरोदहृदयाकारैरुपपादितमौक्तिकमुकुटविभ्रमैःशुचिभिर्मंदाकिनीपुंडरीकैःकृतार्चन
ममलमुक्ताशिलाघटितलिंगमशेषत्रिभुवनवंदितचरणंचराचरगुरुंचतुर्मुखंभगवंतंत्र्यंबकंतस्यचदक्षिणांमूर्तिमाश्रित्याभिमुखीमासीनामु
परचितब्रह्मासनामतिविस्तारिणासर्वदिङ्मुखव्यापकेनमलयविभुतक्षीरपयोधिपयःपूरपांडुरेणातिदीर्घकालसंचितेनतपोराशिनेवविसर्पता
पादपांतरैःस्त्रिस्रोतोजलनिर्मलेनपिंडीभूयवर्तुलेनदेहप्रभावितानेनसगिरिकाननंरंतमयमिवतंप्रदेशंकुर्वतीमंतर्दधुरपिलोचनपथप्रविष्टेनश्वेतिमानमि
वमनोनयंतीमतिविरलभस्मापरिगतदेहतयास्फटिकरंगतामिवदुग्धसलिलमग्नामिवप्रमन्मथेवधवलयंतीकैलासगिरिः॥विमलचीनांशुकांतरितामिवाशंतल शिन४

[redacted]

संक्रान्तामिवअभ्रकपटलतिरस्कृतामिवापरिस्फुटविभाव्यमानावयवांपंचमहाभूतमयमपहायद्व्यात्मकमंगनिष्पादनोपकरणक
लापंधवलगुणेनैवकेवलेनोत्पादितांदृश्याध्वरक्रियामिवोद्गतगलत्कुचयुगलभयोपसेवितत्र्यंबकांगतिमिवमदनदेहनिमित्तंहरप्रसादनार्थ
मागृहीतहरशराधनांक्षीरोदधिदेवतामिवसहवासपरिचितहरकंठेन्दुलेखासहस्रांमिन्दुमूर्तिमिवस्वर्भानुभयकृतत्रिनयनशरणगमनां
ऐरावतदेहच्छविमिवगजाजिनावगुंठनोत्कंठितशितिकंठचिंतितोपनतांपशुपतिदक्षिणमुखहासच्छविमिवनिर्गत्यकृतावस्थानांश
रीरिणीमिवरुद्रोद्धूलनभस्मविभूतिमाविर्भूतांज्योत्स्नामिवहरकंठांधकारविघटनोद्यमप्रवृत्तांगौरीमनःशुद्धिमिवकृतदेहपरिग्रहांकार्त्ति
केयकौमारव्रतक्रियामिवमूर्तिमतींगिरिशवृषभदेहद्युतिमिवपृथगवस्थितांआयतनतरुकुसुमसमृद्धिमिवशंकराभ्यर्चनायस्व
यमुद्यतांपितामहतपःसिद्धिमिवमहीतलमवतीर्णांआदियुगप्रजापतिकीर्तिमिवसप्तलोकभ्रमणखेदविश्रांतांत्रयीमिवकलियुगाध्व
स्तधर्मशोकगृहीतवनवासांआगामिकृतयुगबीजकलामिवप्रमदारूपेणावस्थितांदेहवतीमिवमुनिजनध्यानसंपदंअमरगजवीथीमि

वाम्भगंगाप्रवाहवेग पतितां कैलासश्रियमिव हरमुखोच्चलनक्षोभनिपतितां श्वेतद्वीपलक्ष्मीमिवान्यद्वीपांतरावलोकनकुतूहलागतां
काशकुसुमविकाशकांतिमिव शरत्समयमनुरोधमालां शेषशरीरच्छायामिव रसातलमपहाय निर्गतां मुसलायुधप्रभामिव मधुमदविघूर्ण-
नायासविगलितां शुक्लपक्षपरंपरामिव पुंजीकृतां सर्वहंसैरिव धवलतयाकृतसंविभागां धर्महृदयादिव निर्गतां शंखादिवोत्की-
र्णां मुक्ताफलादिवावकृष्टां मृणालैरिव विरचितावयवां दंतदलैरिव घटितामिंदुकरकूर्चैरिव प्रक्षालितां वर्णसुधाछटाभिरि-
वच्छुरिताममृतफेनपिंडैरिव पांडुरीकृतां पारदधाराभिरिव धौतां रजतद्रवेणेव निर्मृष्टां चंद्रमंडलादिवोत्कीर्णां कुटजकुंद-
सिंदुवारकुसुमच्छविभिरिवोल्लासितामियत्तामिव धवलिम्नः स्कंधावलंबिनीभिरुद्यतस्ताम्रार्कबिंबादुद्गस्य बालरश्मिप्रताभि-
रिव निर्मिताभिरुन्मिषत्तडित्तरलतेजस्ताम्राभिरचिरस्नानावस्थितविरलवारिकणतया प्रणामलग्नपशुपतिचरणभस्मचूर्णाभि-
रिव जटाभिरुद्भासितशिरोभागां जपपाश्रयधृतमुत्तमांगेन मणिमयनामांकमीश्वरचरणद्वयमनुवहंतीं रविरथतुरगखुरसुमनेक्ष

त्क्षोदविशदेनभस्मनाकृतललाटपट्टिकांशिखरशिलाश्लिष्टशशांककलामिवशैलराजमेखलामनुलग्नांकिंप्रसाधितयालक्ष्मीकृतलिं
गयाद्वितीययेवपुंडरीकमालयादृष्ट्यासंभावयंतीमृतनापमनवरतगीतपरिस्फुरिताधरपुटप्रवणादंतिश्रुचिभिःशुक्लहृदयमयूखै
रिवगीतगुणैरिवस्वरैरिवश्रुतिवर्णैरिवमूर्तिमद्भिर्मुखान्निष्पतद्भिर्दशनांशुभिःपुनरिवस्नपयंतीगौरीपतिमतिविमलैश्चैवहारैरिव
साक्षात्सितामरमुखादाकृष्टैर्गायत्रीवर्णैरिवस्वयंग्रथितामुपगतेनारायणनाभिपुंडरीकैरिवोद्धृतैःसप्तर्षिभिरिवकरस्पर्शपूतनाक्षमा
नमिषद्भिःस्फारकारूपेणागतेनामलकीफलस्थूलैर्मुक्ताफलैरुपचितेनाक्षवलयेनाधिष्ठितकंठभागांपरिवेषपरिगतचंद्रमंडला
मिवपौर्णमासीमधोमुखहरशिरःकपालमंडलाकारेणमोक्षद्वारकलशकांतिनास्तनयुगलेनैकहंसमिथुनसनाथामिवश्वेतगं
गांगोरीसिंहसटामयेनेवचामरचीरकृतिनास्तनयुगलमध्यनिबद्धग्रंथिनाकल्पतरुलतावल्कलेनकृतोत्तरीयकसामयुग्मलो
चनसकाशात्प्रसादलब्धेनचूडामणिचंद्रमयूखजालेनेवमंडलीकृतेनब्रह्मसूत्रेणपवित्रीकृतकायामाप्रपदीनेनवस्त्रमावसितेना

पिंगलासनबंधोत्तानचरणतलप्रणायिभिरंगाङ्कोरितायमानेनदुकूलपटेनप्रावृतनितंबांयौवनेनापिस्वकालोपसर्पिणानिर्विकारविनी
तेनशिष्येणेवोपास्यमानांलावण्येनापिकृतपुण्येनेवस्वच्छात्मनापरिगृहीतांरूपेणापिरुचिरलोचनेनविगतचापलेनायतनमृगेणे
वनिषेवितामुत्संगगतांचसुतामिवस्वच्छमयोंखघटितांगुलीकमूलांगुलिनात्रिपुंड्रकावशेषधवलस्पर्शपांडुरेणप्रकोष्ठकटुशंखखंडकेनन
खमयूखदंतुरतयागृहीतदंतकोणेनेवदंतमय्यादक्षिणकरेणवीणामास्फालयंतीप्रत्यक्षामिवगंधर्वविद्यांमणिमंडपिकास्तंभलग्ना
भिरात्मानुरूपाभिःसहचरीभिरिवसवीणाभिःप्रतिमाभिरुपेतांस्नपनार्द्रलिंगसंक्रांतप्रतिबिंबतयातिप्रबलभक्त्याराधितस्यहृदय
मिवप्रविष्टांहरस्यहारलेखयेवप्राप्तकंठयोग[redacted]याग्ररूपंक्त्येवऋक्प्रतिबद्धयाकुंठयेवरक्तमुखवर्णयामत्तयेवघूर्णितमंद्रतार
योन्मत्तयेवानेककृततालयामीमांसयेवानेकभावनानुविरूपागीत्यास्वैर्विरूपाक्षमुपवीणयंतीमतिमधुरगीतावकृष्टैर्ध्या
नमिवाभ्यस्यद्भिर्निश्चलकर्णपुटैर्मृगवराहवानरवारणशरभसिंहप्रभृतिभिर्वनचरैराबद्धमंडलैराकर्ण्यमानगीतानुविद्धविपंची

=अमरापगामिवेति पाठांतरं·१=

शरदशलाकामिवतेजोमयीं पीनामृतामिव विगतत सांईश्वर १

घोषाममरावतीं गामिव नन्दनसोवतीर्णां दीक्षितवाचमिव प्राकृतां त्रिपुरारिशिरःशशिकलामिवानुपजातरागाम मंथितोदधिजलसं
पर्कमिवांतःप्रसन्नाम समस्तपरस्वक्तिमिवाद्वैतां बौद्धबुद्धिमिव निरालंबनां वैदेहीमिव प्राप्तज्योतिःप्रवेशां द्यूतकलाकुशलामिव वशी
कृताक्षहृदयां महीमिव जलमध्यनवदेशां हिमसमयदिनमुखलक्ष्मीमिव परिपीतभास्करातपां मार्यामिव समुपात्तयतिगणोचित
मात्रामालिखितामिवाचलावस्थानां संस्तुनमीमिव लनुच्छायां तुलितमञ्जुलत्वां निर्मलां निरहंकारां निर्मत्सरममानुषाकृतिं
दिव्यत्वादयत्निज्ञायमानवयःपरिमाणामष्टादशवर्षदेशीयामिवोपलक्ष्यमाणां प्रतिपन्नपाशुपतव्रतां कन्यकां ददर्श·त
तोवतीर्य तरुशाखायां बध्वा तुरंगमनुपसृत्य भगवते भक्त्या प्रणम्य त्रिलोचनाय तामेव दिव्ययोषितमनिमिषपक्ष्मणा निश्च
लनिकटलस्येण चक्षुषा पुनर्निरूपयामास·उत्पादितविस्मयतस्या रूपसंपदा कांत्या प्रशंसाचा विर्भूतविस्मयस्य मन
सि·अहो जगति जंतूनामसमर्थितोपनतान्यापतंति वृत्तांतांतराणि·तथाहि·मयायमृगयायां [redacted] यदृच्छया

८५ निरर्थकमनुबध्नता तुरगमुखमिथुनं अयमतिमनोहरो मानवानामगम्यो दिव्यजनसंचरणोचितः प्रदेशो वीक्षितः क्षितेः। अच्छं च सलिलमन्वे
षमाणेन हृदयहारि सिद्धजनोपस्पृष्टजलं सरो दृष्टं तत्तीरलेखाविश्रांतेन चामानुषं गीतमाकर्णितं तच्चानुसरता मानुषदुर्लभदर्शना दिव्य
95 कन्यकेयमालोकिता। न हि मे संशीतिरस्याः दिव्यतां प्रति आकृतिरेवानुमापयत्यमानुषतां कुतश्च मर्त्यलोके संभूतिरेवंविधानां गंधर्वध्वनेर्वि
शेषेण तद्यदि मे सहसा दर्शनपथान्नापयाति नारोहति वा कैलासशिखरं नोत्पतति वा गगनतलं ततः का त्वं किमभिधाना वा किमर्थं वा प्रथमे
वयसि प्रतिपन्नाव्रतमिति सर्वमेतदेनामुपसृत्य पृच्छामि अतिमहानयमवकाश आश्चर्याणामिवधार्य तस्यामेव स्फटिकमंडपिकायामन्यत
मं स्तंभमाश्रित्य समुपविष्टो गीतसमाप्त्यवसरं प्रतीक्षमाणस्तस्थौ। अथ गीतावसाने मूकीभूतवीणा शांतमधुकरमधुरकलेव कुमुदिनी सा
कन्यका समुत्थाय प्रदक्षिणीकृत्य कृतहरप्रणामा परिवृत्य स्वभावधवलया तपःप्रभावप्रगल्भया दृष्ट्या समाश्वासयंतीव पुण्यैरिव स्पृशंतीती शिवः
र्थजलैरिव प्रक्षालयंतीव तपोभिरिव पावयंती शुद्धिमिव कुर्वाणा वरप्रदानमिवोपपादयंती पवित्रतामिव नयंती चंद्रापीडमाबभाषे। स्वा [redacted] ८५

गतमतिधन्येकथमिमांजनमिमंतुप्राप्तोमहाभागस्तदुत्तिष्ठानुगम्यतामनुभूयतामतिथिसत्कारइति·एवमुक्तस्तुतयासंभाषणमात्रे
णैवानुगृहीतमात्मानंमन्यमानउत्थायभक्त्याकृतप्रणामोभगवतियथाज्ञापयसीत्यभिधायदर्शितविनयःशिष्यइवतांव्रजंतीमनुव
व्राज·व्रजंश्चसमर्थयामासहंततावदेयंमांदृष्ट्वातिरोभूतारूढंहिमेकुतूहलेनप्रश्नावसरंयाहृदिपदंयथाचेयमस्यास्तपस्विजन
दुर्लभदिव्यरूपायाअपिदाक्षिण्यातिशयप्रतिपत्तिरनिजानाविभाव्यतेतत्तथासंभावयामिनियतमिममखिलमात्मोदंतम
भ्यर्थ्यमानामयाकथयिष्यतीत्येवंकृतमतिःपश्चात्तमात्रमिवगत्वानिरंतरैर्दिवापिरजनीसमयमिवदर्शयद्भिस्तमालतरुभि
रंधकारितपुरोभागामुकुलकुसुमेषुलतानिकुंजेषुकूजतांमंदमंदमदमत्तमधुलिहांविरुतैर्मुखरीकृतपर्यंतामतिहर
पातिनीनांचधवलशिलातलप्रतिघातोल्लसत्फेनिलानामपांप्रस्रवणैरुत्कोटिप्यावविटंकविपाट्यमानैरुच्चरद्ध्वनिभि
रवकीर्यमाणतुषारशिशिरसीकरासारैरावध्यमाननीहारंहिमहारहरहासधवलैश्चामयतःस्फुरद्भिर्निर्झरैर्धीयवलंबित

का॰पू॰
९६
96

चलच्चामरकलापामिवोपलक्ष्यमाणामंतःस्थापितमणिकमंडलुमंडलामेकांसावलंबितयोगपट्टिकां विशाखिकाशिखरनिबद्धनारिके
लीफलवल्कलमयधौतोपानद्युगोपेतामवशीर्णगजस्य धूसरवल्कलशयनीयस्तनाध्यैकदेशामिंदुमंडलेनेव टंकोत्कीर्णेन शंखमये
न भिक्षाकपालेनाधिष्ठितां सन्निहितस्फटिकालाबुकां गुहामद्राक्षीत्· तस्याश्च द्वारि शिलातले समुपविष्टो वल्कलशयनशिरोभागवि
न्यस्तवीणानन्तरः पर्णपुटेन निर्झरजलगृहीतार्घसलिलमादाय तां कन्यकां समुपस्थितामल्लमतिमंत्रणापाकृतमतिप्रसादेन
भगवति प्रसीद विमुच्यतामयमस्मादरस्त्वदीयमालोकनमपि सर्वपापप्रशमनमघमर्षणमिव पवित्रीकरणायालमास्यता
मित्यब्रवीत्· अनुबध्यमानश्च तया तां सर्वामतिथिसपर्यामतिदूरावनतेन शिरसा सप्रश्रयं जग्राह· कृतातिथ्यपाच
तया द्वितीयशिलातलोपविष्टयाक्षणमिव तूष्णीं स्थित्वा क्रमेण परिशिष्टो हरिणविजयादारभ्य किन्नरमिथुनानुसरणप्रसंगेना
गमनमात्मनः सर्वमाचचक्षे· विदितवृत्तांता चोत्थाय सा कन्यका भिक्षाकपालमादाय तेषामायतनतरूणां तलेषु विचचार· अ

शिवः
९६

चिरेण तस्याः स्वयं पतितैः फलैरपूर्यत भिक्षाभाजनं· आगत्य च तेषां फलानामुपयोगाय नियुक्तवती चंद्रापीडं· आसीच्च तस्य चेतसि नास्ति खल्व
साध्यं नाम तपसां किमतः परमाश्चर्यं यत्र व्यपगतचेतनाः सचेतना इवास्यै भगवत्यै समतिसृजंतः फलान्यात्मानुग्रहमुपपादयंति वनस्पतयः
चित्रमिदमालोकितमस्माभिरदृष्टपूर्वमित्यधिकतरोपजातविस्मयश्चोत्थाय तमेव प्रदेशमिंद्रायुधमानीय व्यपनीतपर्याणं नातिदूरे संयम्यनि
र्झरजलनिर्वर्तितस्नानविधिस्तान्यमृतरसस्वादून्युपयुज्य फलानि पीत्वा च तुषारशिशिरं प्रस्रवणजलमुपस्पृश्यैकान्ते तावदवतस्थे याव
त्तयापि कन्यकया कृतः फलमूलमये आहारे प्रणयः· इति परिसमापिताहारां निर्वर्तितसंध्योचिताचारां शिलातले विस्रब्धमुपविष्टां निभृत
विनीतमुपसृत्य नातिदूरे समुपविश्य मुहूर्तमिव स्थित्वा चंद्रापीडः सविनयमवादीत् भगवति त्वत्प्रसादप्राप्तिप्रोत्साहितेन कुतूहलेनाकु
लीक्रियमाणो मानुषतासुलभो लघिमा बलादनिच्छंतमपि मां प्रश्नकर्मणि नियोजयति· जनयति हि प्रभुप्रसादलवोपि प्रागल्भ्य
मधीरप्रकृतेः स्वल्पाप्येकदेशावस्थानेकालकलापरिचयमनु लादयति· अणुरप्युपचारपरिग्रहः प्रणयमारोपयति तद्य

का॰पू॰

२७ दिनातिखेदकरमिवततःकथमनेनात्मानमनुग्राहय मिष्यामि·अतिमहांश्चभवद्दर्शनात्प्रभृतिमेकौतुकमस्मिन्विषयेकतरन्मरुता

मृषीणांगंधर्वाणांगुह्यकानामप्सरसांवाकुलमनुगृहीतंभगवत्याजन्मनाकिमर्थंवास्मिन्कुसुमसुकुमारेनववयसिव्र

97 तग्रहणंक्वेदंवयःक्वेयमाकृतिःक्वचायंलावण्यातिशयःक्वेयमिंद्रियाणामुपशांतिरद्भुतमिवमेप्रतिभातिकिंनिमि

त्तंचानेकसिद्धसाध्यसंबाधानिसुरलोकसुलभान्युपेक्ष्यदिव्याश्रमपदानिएकाकिनीवनमिदममानुषमधिवस

सिकश्चायंप्रकारोयत्तैरेवपंचभिर्महाभूतैरारब्धमीदृशींधवलतांधत्तेशरीरंनेदमस्माभिरन्यत्रदृष्टश्रुतपूर्वमप

पनयतुनःकौतुकमावेदयतुभवतीसर्वमिदमित्येवमभिहितासाकिमप्यध्यायंतीतूष्णींमुहूर्त्तमिवस्थित्वास्थूलस्थू

लैरंतर्गतांहृदयशुद्धिमिवादायनिर्गच्छद्भिरिंद्रियप्रसादमिववर्षद्भिरश्रुपूरै सनिस्पंदमिवस्तवद्भिर्लोचनविषयं

धवलिमानमिवद्रवीकृत्यपातयद्भिरच्छाच्छैरमलकपोलस्थलस्खलितैरवशीर्णहारमुक्तमुक्ताफलतरलपातैरनु शिवः

२७

वद्धविंदुभिर्वल्कलावृतकुचशिखरजर्जरितशीकरैरस्रुभिरुन्मीलितलोचनानिःशब्दंरोदितुमारेभे॥ तांचप्ररुदितांदृष्ट्वाचंद्रापीड
स्तस्याःक्षणमचिंतयत्॥ अहोदुर्निवारतान्यसनोपनिपातानांयदीदृशीमप्याकृतिमनभिभवनीयामालीपांकुर्वंतिसर्वथानकंच
नस्पृशंतिशरीरधर्माणमुपतापाःबलवतीहिद्वंद्वानांप्रवृत्तिः इत्थमपरमधिकतरमुपजनितमतिमहन्मनसिमेकौतुकम
स्यावाष्पसलिलपातेननखल्वल्पीयसाशोककारणेनस्त्रीक्रियंतएवंविधामूर्त्तयः नहिक्षुद्रनिर्घातपातैरभिहन्यतेच
लतिवसुधेतिसंवर्द्धितकुतूहलश्चशोकस्मरणहेतुतामुपगतमपराधिनमिवात्मानमवगच्छन्नुत्थायप्रस्रवणादंज
लिनामुखप्रक्षालनोदकमुपानिन्ये॥ सातुतदनुरोधादविच्छिन्नबाष्पजलधारासंतानापिकिंचित्कषायितोदरेप्र
क्षाल्यनेत्रेवल्कलोपांतेनवदनमपमृज्यदीर्घमुष्णंचनिःश्वस्यशनैःशनैःप्रत्यवादीत्॥ राजपुत्रकिमनेनातिनिर्घृण
हृदयायामंदभाग्यायाःपापायाजन्मनःप्रभृतिवैराग्यवृत्तांते नाश्रवणीयेनश्रुतेनतथापियदिमहत्कुतूहलंतत्क

का॰पू॰
९८
98

पयाभिश्रूयतामेतत्प्रायेणकल्याणाभिनिवेशिनःश्रुतिविषममापतितमेवयथाविबुधसमन्यप्सरसोनामकन्यकाःसंतितासां
चतुर्दशकुलानिएकंभगवतःकमलयोनेर्मनसःसमुत्पन्नमन्यद्वेदेभ्यःसंजातमन्यदग्नेरुत्पन्नमन्यत्पवनात्संभूतमन्य
दमृतान्मथ्यमानादुत्थितमन्यज्जलाज्जातमन्यदर्ककिरणेभ्योनिर्गतमन्यत्सोमरश्मिभ्योनिःपतितमन्यद्भूमेरुत्पन्न
मन्यत्सौदामनीभ्यःप्रवृत्तमन्यन्मृत्युनानिर्मितमपरंमकरकेतुनासमुत्पादितमन्यत्तुदक्षस्यप्रजापतेरतिप्रभूता
नांसुतानांमध्येद्वेसुतेमुनिररिष्टाचबभूवतुस्ताभ्यांगंधर्वैःसहकुलद्वयंजातमेवमेतान्येकत्रचतुर्दशाकुलानिगंध
र्वाणांतुदक्षात्मजाद्वितयसंभूतंतदेवकुलद्वयंतत्रमुनेस्तनयश्चित्रसेनादीनांपंचदशानांभ्रातॄणामधिकोगुणैःषोडश
श्चित्ररथोनामसमुत्पन्नःसकिलत्रिभुवनप्रख्यातपराक्रमोभगवतासमस्तसुरमौलिमालालालितचरणनलिने
नाखंडलेनसुहृच्छब्दोपबृंहितप्रभावःसर्वेषांगंधर्वाणामाधिपत्यमसिलतामरीचिनिचयमेचकितेनबाहुनासमुपा
र्जितंशैशवएवासवान्‌ःइतश्चनातिदूरेतस्यास्माद्भारतवर्षादुत्तरेणानंतरेकिंपुरुषनाम्निवर्षेवर्षपर्वतोहेमकूटोनामनिवासः।तत्र शिवः
९८

चतुर्भुजयुगपरिपालितान्यनेकानि गंधर्वशतसहस्राणि प्रतिवसंति॰ते नैवचेदं चैत्ररथं नामातिमनोहरं काननं निर्मितमिदं चाछोदाभि
धानमतिमहत्सरः खानितं॰अयं च भवानीपतिरूपरचितो भगवान्।अरिष्टायास्तु पुत्रास्तुंबुरुप्रभृतीनां सोदर्याणां षण्णां ज्येष्ठो हंसो नाम
जगद्विदितो गंधर्वस्तस्मिन्द्वितीये गंधर्वकुले गंधर्वराजेन चित्ररथेनाभिषिक्तो बाल एव राज्यपदमासादितवान्।अपरिमितगंधर्वब
लपरिवारस्य तस्यापि स एव गिरिरधिवासः।यत्तु तत्सोमरश्मिसंभवानामप्सरसां कुलं तस्मात्किरणजलानुसारगलितेन सकलेनेव
रजनिकरकिरणलावण्यात्वर्णोन्यम्लाप्रसूता॰ तां च द्वितीयगंधर्वकुलाधिपतिर्हंसो मंदाकिनीमिव क्षीरसागरः प्रणयिनीमकरोत्।सा
सुभगवता मकरकेतनेनेव रतिः शरत्समयेनेव कमलिनी हंसेन संयोजिता सदृशसमागमोपजनितामतिमहतीं मुदमुपगतवती निखि
लांतःपुरस्वामिनी च तस्याभवत्।तयोश्च तादृशयोर्महात्मनोरहमीदृशी विगलितं लोकाशो कायक्लेबलमकं दुःसहस्रभाजनमवैकात्म सव२
जा समुत्पन्ना॰ तातस्त्वनपत्यतया सुतजन्मातिरिक्तेन महोत्सवेन मज्जन्माभिनंदितवान्।अथ प्राप्ते च दशमेहनि कृतयथोचितसमाचारो
×कुरकुलाकलापलावण्येन निर्मिता त्रिभुवननयनाभि रामा भगवती द्वितीयेव गौरी गौरीति नाम्ना हिम×४
जै२

महाश्वेतेतियथार्थमेवंनामकृतवान्: साहंपितृभवनेबालतयाकलमधुरप्रलापिनीवीणेवगंधर्वाणामंकादंकंसंचरंतीअविदितक्ले
शाकौमारमतिनीतवती· क्रमेणचकृतंमेवपुषिवसंतइवमधुमासेनमधुमासइवनवपल्लवेननवपल्लव
इवकुसुमेनकुसुमइवमधुकरेणमधुकरइवमदेननवयौवनेनपदं· अथविजृंभमाणनवनलिनवनेषुकठोरचूतक
का॰ लिकाकलापकृतकार्मुकोत्कलिकेषुकोमलमलयमारुतावतारतरंगितानंगध्वजांशुकेषुमदकलितकामिनीगंडूषसी
धुसेकपुलकितबकुलेषुमधुकरकुलकलंकितका लीकृतकालेयककुसुमकुड्मलेषुअशोकतरुताडनरणितरमणीय
मणिनूपुरझंकारसहस्रमुखरेषुमुकुलपरिमलपुंजितालिजालमंजुसिंजितसुभगसहकारेषुअविरलकुसुमधूलिवालु
कापुलिनधवलितधरातलेषुमधुमदविडंबितमधुकरकदंबकसंवाह्यमानलतादोलेषुउत्फुल्लपल्लववल्लीलीयमा
नमत्तकोकिलोल्लासितमधुसीकरेषुमदकुर्दितमुग्धविलजनजायाजीवोपहारेषुमन्मथेषुमन्मथास्फालितचापरवं शिवः

विकसत्त्रु

मार्गेष्विव किंशुकसमाकीर्ण

९५।२

यस्फुटितपथिकहृदयरुधिरैर्मार्गेषु अविरतपतत्कुसुमशरपतत्रिपत्रत्कारबधिरीकृतदिङ्मुखेषु दिवापिप्रवृत्तांतर्मदन
रागांधाभिसारिकासार्थसंकुलेषु उद्वेलरतिरससागरपरप्लावितेषु सकलजीवलोकहृदयानंदकेषु मधुमासदिवसेषु एकदा
हमंबया सह मधुमासविस्तारितशोभं प्रोत्फुल्लनवनलिनकुमुदकुवलयकह्लारं निरमच्छोदं सरः स्नातुमभ्यागमं अत्र च स्ना
त्वा भगवत्या पार्वत्या तटशिलातलेषु विलिखितानि सभृंगिरिटीनि पांसुनिमग्नकेशपदमंडलानुमितसुनिश्चलानि प्र
म२४ दक्षिणानि त्र्यंबकप्रतिबिंबकानि वंदमाना भ्रमरकुलगर्भकेसरजर्जरकुसुमोपहाररम्योपलतामंडपपर्यंततरुनखकोटिपाटि
तकुड्मलनालविवरविगलितमधुनिकरः सुसुप्सिलोयंतरुः उन्मदमयूरकलकलभीतभुजंगमुक्तलताशिशिरेषु चंदन
वनवीथिकाविकचकुसुमपुंजपातरचितवनदेवताप्रेंखोलनशोभनेषु लताहेलाबकुलकुसुमरजःपटलमग्नकल
हंसपदलेखमतिरमणीयमिदं तीरतरुतलमितिस्निग्धमनोहरतरे देशदर्शनलोभाक्षिप्तहृदया सह सखीजनेन व्यचरं एक

तर्पयंतमिव२ म२

स्मिंश्चप्रदेशेऽगितिवनानिलेनोपनीतंनिर्भरविकसितेपिकाननेभिभूतान्यकुसुमपरिमलंविसर्पंतमतिसुरभितयानुलिंपंतमि
वासयंतमिवघ्राणेंद्रियमहमहमिकयामधुकरैरनुबध्यमानमनाघ्रातपूर्वममनुष्यलोकोचितंकुसुमगंधमाजिघ्रं कुतोय
मितिसमुपारूढकुतूहला मुकुलितलोचना तेनकुसुमगंधेनमधुकरीवाकृष्यमाणाकौतुकतरलाभ्यधिकतरमुपजातनूपुररणि
झंकाराकृष्टसरःकलहंसानिकतिचित्पदानिगत्वाहरहुताशनेंधनीकृतमदनशोकविधुरंवसंतमिवतपस्यंतमखिलमंड
लभ्रांत्यर्थमीशानशिरःशशांकमिवधृतव्रतमयुग्मलोचनंवशीकर्तुकामंकाममिवसनियममतितेजस्वितयाप्रचलत्तडि
ल्लतापंजरमध्यगतमिवग्रीष्मदिवसकरमंडलोदरप्रविष्टमिवज्वलज्ज्वलनज्वालाकलापमध्यस्थितमिवविभाव्यमा
नमुन्मिषंत्याबहलबहलयादीपकालोकपिंगलयादेहप्रभयाकपिलीकृतकाननंकनकमयमिवतंप्रदेशंकुर्वाणंरोचना
रसलुलितप्रतिसरसमानसुकुमारपिंगलजटंपुण्यपताकायमानयासरस्वतीसमागमोत्कंठाहृतचंदनलेखयेवभस्मल

यतालक्ष्मीलीलावासभवनानिकमलानिसृजताप्रजापतिनाप्रथममेतदाननाकारकरणकौशलमभ्यासएवकृतः अन्यथाकिमिवहिसह
शवक्तुविरचनायांकारणमलीकंचेदेतद्यथाकिंनसकलाःकलावतोबकुलपक्षेक्षीयमाणस्यसुषुम्नानाम्नारश्मिनारविरापिबतीति
ताःखल्वस्यगभस्तयःसमस्तावपुराविशंतीतिकुतोन्यथास्यपापहारिणिक्लेशबकुलेतपसिवर्त्तमानस्येदृशलावण्यमितिविचिं
तयंतीमामविचारितगुणदोष रूपैकपक्षपातीनवयौवनसुलभःकुसुमायुधःकुसुमासवमदस्वनमधुकरीपरवशामकरो
त्उच्छ्वसितैःसहविस्मृतनिमेषेणकिंचिन्मुकुलितपक्ष्मणाजिह्मिततरलतारशारोदरेणदक्षिणेनचक्षुषातस्यरूपमापिबंती
वकिमपियाचमानेवलखदायत्तास्मीतिवदंतीवाभिमुखंहृदयमर्पयंतीवसर्वात्मनानुप्रविशंतीवतन्मयतामिवगंतुमीहमानाम
नोभवाभिभूतांत्रायस्वेतिशरणमिवोपयांतीदेहिहृदयेवकाशमिस्पर्धितामिवदर्शयंतीहाहाकिमिदमसांप्रतमातिरूपणमकु
लकुमारीजनोचितमिदंमयाप्रस्तुतमितिजानानाप्यप्रभवंतीकरणानांस्तंभितेवालिखितेवोत्कीर्णेवसंयतेवमूर्छितेवकेनापि
विधृतेवनिस्पंदसकलावयवातत्कालाविर्भूतेनाकथितशिक्षितेनानाख्येयेनस्वसंवेद्येनकेवलंनविभाव्यतेकिंतद्रूपसंपदाकिं

म
नसाकिंमनसिजेनकिमभिनवयौवनेनकिमनुरागेणैवोपदिश्यमानेनकिमन्येनैवकेनापिप्रकारेणाऽदृष्टमपिनजानामिकथंकथमितित
मतिचिरंव्यालोकयं·उत्क्षिप्यनीयमानेवतत्समीपमिंद्रियैःपुरस्तादाकृष्यमाणेवहृदयेनपृष्ठतःप्रेर्यमाणेवपुष्पधन्वनाकथमपि
मुक्तप्रयत्नमात्मानमप्यधारयं·अनंतरंचमेंतर्मदनावकाशमिवदातुमाहितसंतानानिरीयुःश्वासमरुतःसाभिलाषंहृदयमा
ख्यातुकाममिवस्फुरितमुरसमनंतरंकुचयुगलंस्वेदसलिलजललवलेखाक्षालितेवागलल्लज्जामकरध्वजशरनिकरपातत्रस्तेवा
कंपतगात्रयष्टिःतद्रूपातिशयंद्रष्टुमिवकुतूहलादालिंगनलालसेभ्योंगेभ्योनिरगाद्रोमांचजालकमशेषतःस्वेदांभसाधौतश्च
रणयुगलादिवहृदयमविशद्रागःआसीच्चममममनसिशंतात्मनिदूरीकृतसुरतव्यतिकरेस्मिन्जनेमांनिक्षिपताकिमिदमना
र्येणासदृशमारब्धंमनसिजेन·एवंचनामातिमूढंहृदयमंगनाजनस्ययदनुरागविषययोग्यतामपिविचारयितुंनालंकोस्मति
भास्करंधामतेजसांतपसांचक्वचप्राकृतजनाभिनंदितानिमन्मथपरिस्पंदितानिनियतमयंमामेवंमकरलांछनेनविडंब्यमा
नामुपहसतिमनसाचित्रंचेदंयदेवमवगच्छंत्यपिनशक्नोम्यात्मनोविकारमुपसंहर्तुमन्याअपिकन्यकास्त्रपामपहायस्वयमुपया

ताःपतीनन्याश्रयेणेनदुर्विनीतेनमन्मथेनोन्मत्ततांनीतानार्येनपुनरहमेकायथाकथमनेनक्षणेनाकारमात्रालोकनाकुलीकृतमेवमस्व
तंत्रतामुपेसंतःकरणंकालोहिगुणाश्चदुर्निवारतामारोपयंतिमदनस्यसर्वथायावदेवसचेतनास्मियावदेवचनपरिस्फुटमनेन
विभाव्यतेमेमदनकृतंश्चेष्टितलाघवमेतत्तावदेवास्मात्प्रदेशादपसर्पणंश्रेयःकदाचिदनभिमतस्मरविकारदर्शनकुपितोयंशापाभि
=भूतां=८ शंकरोतिमामहरेकोपाहिमुनिजनप्रकृतिरित्यवधार्यापसर्पणाभिलाषिण्यहमभवं।अशेषजनपूजनीयाचेयंजातिरितिकृत्वा
तस्यनातिदृष्टिप्रसरमचलितपक्ष्ममाल मदृष्टपूर्वलमीवबहुलासितकर्णपल्लवोल्लुक्ककपोलमंडलमालोलना लक
लतालसत्कुसुमावतंसमंसदेशदोलायितमणिकुंडलमस्मैप्रणाममकरवं।अथकृतप्रणामायांमयितुर्णेंध्यशासनतयामनोभु
वोमदजननतयामधुमासस्यरमणीयतयाचतस्यप्रदेशस्यअविनयबहुलतयाचाभिनवयौवनस्यचंचलप्रकृतितया
चेंद्रियाणांदुर्निवारतयाचविषयाभिलाषाणांचपलतयाचमनोवृत्तेस्तथाभवितव्यतयाचतस्यतस्यवस्तुनःकिंबहुनाममम
यादौरात्म्यादस्यचेहप्रश्नस्यक्लेशस्यविहितत्वात्तमपिमद्विकारदर्शनापहृतधैर्यप्रदीपमिवपवनस्तरलतामनयदनंगः।तदातस्याप्य

भाग्या०

का॰पू॰

१०३

103

प्रादुरभवत्.१

भिनवागतंमदनंप्रसुप्तं न्निवरोमोद्गमैःमत्तकाशमभिप्रस्थितस्यमनसोमार्गमिवोपदिशन्पुरःसरत्तं श्वासैर्वेपथुगृहीताग्रतनमंग
शीतेनेवाकंपतकरतलगताक्षमालाद्वितीयेवकर्णावसक्तकुसुममंजरीकपोलतलासंगिनीसमदृश्यतस्वेदसलिलसीकरजालि
कामदर्शनप्रीतिविस्तारितस्यचोत्तानतारकस्यपुंडरीकमयमिवतन्मुखेशुपदर्शयतोलोचनयुगलस्यविसर्पिभिरंशुसंता
नैर्यहृदयाछोदसलिलमपहायविकचकुवलयवनैरिवगगनतलमस्तृणतितैरस्तध्यंतदशदिशः। तयातुतस्यातिप्रकट
[redacted] याविकृत्याद्विगुणीकृतमदनावेशानक्षणमष्ट्रमवर्णनयोग्यांकामप्यवस्थामन्वभवं। इदंचमनस्यकरवं अनेककु
रतसमागमलास्यलीलोपदेशोपाध्यायोमकरकेतुरेवविलासानुपदिशतिअन्यथाविविधरसासंगललितेषीदृशेषुव्यति
करेध्वप्रविष्टबुद्धेरस्यजनस्यकुतइयमनभ्यस्ताकृतीरतिरसनिष्यंदमिवक्षरंतीअमृतमिववर्षंतीमदनुकूलितेवरवेहालसे
वनिद्रायडेवानंदजनरमंथरतरतारसंचारिणीअनिमित्तक्लतालालसिनीदृष्टिः कुतश्चेयमतितेपुण्यपक्षचलितेवानक्षरमेवमं शिवः

१०३

मीषत्र

तर्गतो हृद्याभिलाषः कथ्यते प्राप्तप्रसरे वैापस्त्तस्तं द्वितीयमस्य सहचरं मुनिबालकं प्रणामपूर्वकमपृछं· भगवान्किमभिधानः कस्य चा
यं तपोधनस्य युवा किं नाम्नस्तरोरियमाननावतंसीकृता कुसुममंजरी जनयति हि मेमनसि महत्कौतुकमस्याः सत्तुत्तर्पर्पलसाधा
रणः सौरभो यमनाघ्रातपूर्वोगंध इति· सतु मां विहस्याब्रवीत्· बाले किमनेनपृष्टेन प्रयोजनमथ कौतुकमावेदयामि श्रूयतां· अस्ति
खलु सकलत्रिभुवनप्रख्यातकीर्तिरुदारतया सुरासुरसिद्धवृंदवंदितचरणयुगलो महामुनिर्दिव्यलोकनिवासी श्वेतके
तुर्नाम· तस्य भगवतः सुरासुरलोकसुंदरीहृदयानंदकरमशेषत्रिभुवनसुंदरमतिशायितनलकूबरं रूपमासीत्· सकदा
चिद्देवतार्चन कमलान्युद्धर्तुमैरावतमदबिंदुबद्धचंद्रकशतखचितजलां हरहसित सितस्रोतसं मंदाकिनीमवततार
अवतरंतं च तस्मात्कमलवनेषु संततसन्निहिताविकचसहस्रपत्रपुण्डरीकोपविष्टा देवी लक्ष्मीर्ददर्श· तस्यास्तु तमवलोकयं
त्याः प्रेममंदमुकुलितेनानंदबाष्पभरतरंगतरलतारेणलोचनयुगलेन रूपमास्वादयंत्या जृंभिकारं मन्मथरसुखविन्यस्तह

सपत्नवायामन्मथविकृतं मन आसीत्·आलोकनमात्रेण च समासादितसुरतावसानायां तस्मिन्नेवासनीकृते पुंडरीके कृतार्थता आसीत्·
तस्माच्च कुमारः समुदपादि·ततस्तमुत्संगेनादाय सा भगवन्गृहाणायमात्मज इत्युक्त्वा तस्मै श्वेतकेतवे ददौ·असावपि बा
लजनोचिताः सर्वाः क्रियाः कृत्वा तस्य पुंडरीकसंभवतया तदेव पुंडरीक इति नाम चक्रे·प्रतिपादितव्रतं च तमागृहीतसकलवि
द्याकलापमकार्षीत्सोयं·इयं च सुरासुरैर्मथ्यमानात्क्षीरसागरादुद्गतः पारिजातनामा पादपस्तस्य मंजरी·यथा चैषा व्रतवि
रुद्धमस्याः श्रवणसंसर्गमासादितवती तदपि कथयामि·अद्य चतुर्दशीति भगवंतमंबिकापतिं कैलासगतमुपासितुममरलोका
न्मयासह नंदनवनसमीपेनायमनुसरन्निर्गतः साक्षान्मधुमासलक्ष्मीदत्तललितहस्तावलंबया बकुलमालिकामेखलया कु
सुमपक्षवग्राधिनाभिराजानुलंबिनीभिः कंठमालिकाभिर्निरंतरमाच्छादितविग्रहया नवचूतांकुरकर्णपूरया पुष्पासवपानमत्त
यानंदनवनदेवतया पारिजातकुसुममंजरीमिमामादाय प्रणम्याभिहितो भगवन्सकलत्रिभुवनदर्शनाभिरामायास्तवाकृतेरस्या

:सदृशोयमलंकारः असीदक्रियतामियमवतंसविलासदुर्ललितासमारोप्यतांश्रवणशिखरंव्रजतुसफलतांजन्मपारिजातस्य
सेवमभिदधानांच अयमात्मरूपस्तुतिवादत्रपावनमितलोचनस्तामनादृत्यैवगंतुंप्रवृत्तः मयातुतामनुयांतीमालोक्यकोदे
यःसखेक्रियतामस्याःप्रणयपरिग्रहइत्यभिधायबलादियमनिच्छतोप्यस्यकर्णपूरीकृता।तदेतत्कार्त्स्न्येनयोयंयाचेयं
यथाचास्यश्रवणशिखरंसमारूढंतत्सर्वमावेदितमित्युक्तवतितस्मिन्नहंतपोधनयुवाकिंचिदुपदर्शितस्मितोमामवोचत्कुतू गी
हलिनिकिमनेनप्रयासेनयदिसुरभिपरिमलाग्रहतामित्युक्त्वासमुपसृत्यात्मीयाच्छ्रवणादपनीयकलैरलिकुलक्वणितै
:प्रारब्धरतिसमागमप्रार्थनामिवमदीयेश्रवणपुटेतामकरोत्।ममतुतत्करस्पर्शलोभेनतत्क्षणमपरमिवपारिजातकुसु
ममवतंसस्थानेहृदयमासीत्।सचमत्कपोलस्पर्शसुखेनतरलीकृतांगुलिजालःकालकरतलादक्षमालांलज्जयासहग
लितामपिनाज्ञासीत्।अथाहंतामसंप्राप्तामेवक्षमालांगृहीत्वासलीलंतभुजपाशसंदानितकंठग्रहसुखमिवा

कुमवंतीदर्शितापूर्वंहरलताली लांकंठाभरणतामनयं॥ इत्येवंच व्यतिकरे छत्रधारिणीनामवाचाला भर्तृदारिके स्नातादेवी
प्रसासीदति गृहगमनकालस्तत्क्रियतांमज्जनविधिरिति॥ अहंतु तेन तस्यावचनेन नवग्रहणकरिणीव प्रथमांकुशपातेनानिच्छ
याकथंकथमपिसमाकृष्यमाणं तन्मुखात्लावण्यामृतपंकमग्नामिवकपोलपुलककंटकजालग्नामिवमदनशरश
लाकाकीलितामिवसौभाग्यगुणस्यूतामिवातिकृच्छ्रेणदृष्टिमाकृष्यस्नातुमुच्चलं उच्चलितायांचमयिद्वितीयोमुनिदारकस्तथा
विधस्तस्यधैर्यस्खलनमालोक्य किंचित्सप्रणयकोपइवावादीत्॥ सखेपुंडरीकनैतदनुरूपंभवतः क्षुद्रजनक्षुण्णः
एषमार्गोधैर्यधनाहिसाधवः किंयःकश्चित्प्राकृतइवविक्लवीभवंतमात्मानंनरुणत्सि कुतस्तवापूर्वोयमिंद्रियोपप्ल
वोयेनास्येवंकृतः क्वतेतद्धैर्यं क्वासाविंद्रियजयः क्वतद्वशित्वंचेतसः क्वसाप्रशांतिः क्वतत्कुलक्रमागतंब्रह्मचर्यं क्वसासर्व
विषयनिस्पृहता क्वतेगुरूपदेशाः क्वतानिश्रुतानि क्वतावैराग्यबुद्धयः क्वतदुपभोगविद्वेषित्वं क्वसासुखपराङ्मुखता क्वासौ

तपस्विनि निवेशः क्व सा भोगानामुपर्यरुचिः क्व तद्यौवनानुशासनं सर्वथा निष्फला प्रज्ञा निर्गुणो धर्मशास्त्राभ्यासो निरर्थकः संसारो निरूप
कारको गुरूपदेशः विवेको निःप्रयोजना प्रबुद्धता निःकारणं ज्ञानं यदत्र भवादृशा अपि रागाभिषंगैः कलुषीक्रियंते प्रमादैश्चाभिभूयं
ते कथं करतलाद्गलितामपहृतामक्षमालामपि न लक्षयसि अहो विगतचेतनत्वमपहृतज्ञानानेयानिदमपि तावद्विप्रमाणम
नयानार्यया निवार्यतां हृदयमित्येवमभिधीयमानश्च तेन किंचिदुपजातलज्जा इव प्रत्यवादीत् सखे कपिंज ल किं मामन्य
थासंभावयसि नाहमेवमस्या दुर्विनीतकन्यकाया मर्षयाम्यक्षमालाग्रहणापराधमित्यभिधाय अलीककोपकांतेन प्र
यत्नविरचितभीषणभ्रुकुटिमुखेन चुंबनाभिलाषस्फुरिताधरेण मुखेंदुना मामवदत् चपले अप्रदेशादस्मादिमामक्ष
मालामदत्त्वा पदात्पदमपि न गंतव्यमिति तच्च श्रुत्वाहमात्मकंठादुन्मकरध्वजलास्यारंभलीलापुष्पांजलिमेकावलीं भगव
ता ग्रहतामक्षमालेति मन्मुखासक्तदृष्टेः शून्यहृदयस्यास्य प्रसारिते पाणौ निधाय स्वेदसलिलस्नातापि पुनः स्नातुमवात

रं॰ उत्थाय च कथमपि प्रयत्नेन निम्नगेव प्रतीपं नीयमाना सखीजनेन बलादंबया सह तमेव चिंतयंती स्वभवनमयासिषं॰ गत्वा च प्रविश्य कन्यां
तःपुरं ततः प्रभृति न द्विरहविधुरा किमागतास्मि किं तत्रैव स्थितास्मि किमेकाकिन्यस्मि किं तूष्णीमस्मि किं प्रस्तुतालापास्मि किं जागर्मि किं
सुप्तास्मि किं रोदिमि किं न रोदिमि किं दुःखमिदं किं सुखमिदं किमुत्कंठेयं किं व्याधिरयं किं व्यसनमिदं किमुत्सवोयं किं दिवस एषः किं
निशेयं कानि रम्याणि कानि नरम्या[illegible]णीति सर्वं नावगच्छं॰ अविज्ञातमदनवृत्तांता च क गच्छामि किं करोमि किं शृणोमि किं पश्यामि
किमालपामि कस्य कथयामि कोस्य प्रतीकार इति सर्वं न जानासिषं॰ केवलमारुह्य कुमारीपुरप्रासादं विसर्ज्य च सखीजनं
द्वारि निवारिताशेषपरिजनप्रवेशा सर्वव्यापारानुत्सृज्यैकाकिनी मणिजालगवाक्षनिक्षिप्तमुखी तामेव दिशं तत्सनाथत
याप्रसाधितामिव कुसुमितामिव महारत्ननिधानाधिष्ठितामिव अमृतरससागरपरिप्लावितामिव पूर्णचंद्रोदयालंकृता
मिव दर्शनसुभगामीक्षमाणा तस्माद्दिगंतरादागच्छंतमनिलमपि वनकुसुमपरिमलमपि शकुनिध्वनिमपि तद्वार्त्तां प्रष्टुमीहमाना शिवः

वि
तद्दल्लभतया तपःपरिक्लेशायास्य हृदयं नीलम्भीयेव गृहीतमौनव्रतास्मरजनितपक्षपाताच्च तत्परिग्रहान्मुनिवेशस्यासाम्यतां तदास्य
दतपायौवनस्य चारुतां तच्छ्रवणसंपर्कात्पारिजातकुसुमस्य मनोहरतां तन्निवासात्सुरलोकस्य रम्यतां तद्रूपसंपदा कुसुमायु
धस्य दुर्ज्जयतामध्यारोपयंती दूरतः कमलिनीव सवितुः सागरवेलेव चंद्रमसो मयूरीव जलधरस्य तस्यैवाभिमुखी तथैव तांत
द्विरहानुरजीवितोऽमरक्षावलीमिवाक्षावलीं कंठेनोद्वहंती तथैव च तयाप्रस्तुतेन रहस्यालापयेव कर्णलग्नया पारिजातमंज
र्या तथैव तेन तत्करतलस्पर्शसुखजन्मना कदंबमुकुलकर्णपूरायमाणेन रोमांचजालेन कंटकितैककपोलफलकातिष्ठं
दमतिष्ठं· अथ तांबूलकरंडवाहिनी मदीया तरलिका नाम मयैव सहागता स्नातुमासीत्· सा पश्चाच्चिरादिवागत्य तथावस्थितां
शनैर्मामवादीत्· भर्त्तृदारिके पोतो तापसकुमारकौ दिव्याकारावस्माभिरच्छोदसरस्तीरे दृष्टौ तयोरेकोयेन भर्त्तृदुहितुरियमव
तंसीकृता सुरतरुकुसुममंजरी स तस्मादात्मनो रक्षन्दर्शनमतिनिभृतपदः कुसुमितलतासंतानगहनांतरेणोपसृत्यमा

का०प्र०
१०७
107

मागच्छंती पृष्ठवती भर्त्तृदारिकामुद्दिश्य प्रस्थितासीत् बालिके केयं कन्यका कस्य वा पत्नी किमभिधाना क्व गच्छसीति मयोक्ते एषा खलु भगवतः श्वेतभा
नोरंशुसंभृतायामप्सरसि गौर्यां समुत्पन्नाद्देवस्य सकलगंधर्वमुकुटमणिशलाकाशिखरोल्लेखमसृणितचरणनखचक्रस्य गण
यमस्तुग गंधर्वकामिनीकपोलपत्रलतालांछितभुजतरुशिखरस्य पादपीठीकृततलच्छी करकमलस्य गंधर्वाधिपतेर्हंसस्य दु
हिता महाश्वेता नाम गंधर्वाधिवासं हेमकूटमचलवरमभिप्रस्थितेति कथिते त्वमपाक्रिमपि चिंतयन्मुहूर्त्तमिव तूष्णीं स्थित्वावि
गतनिमेषेण चक्षुषा चिरमिव वीक्षमाणो मां सानुनयमर्थितामिव दर्शयन्पुनराह॰ बालिके कल्याणिनी तवाविसंवादिन्यचपलाबा
लभावेप्याकृतिरियं तत्करोषि मे वचनमेकमभ्यर्थ्यमानेति ततो मया सविनयमुपरचितांजलिपुटया दर्शितादरमभिहितो भगवन्कु
स्मादेवमभिधत्से कहं महात्मानः सकलत्रिभुवनपूजनीयास्त्वादृशाः पुण्यैर्विना निखिलकल्मषपापहारिणीमस्मद्विधेषु दृष्टिमपि न
पातयंति किं पुनराज्ञां तद्विस्रब्धमादिश्यतां कर्त्तव्यं अनुगृहीतामयं जन इति एवमुक्तश्च मयासौ सहसखी मिवोपकारिणीमिव माणम

शिवः
१०७

रामिव दृष्ट्वा मामभिमुखं निकटवर्त्तिनस्तमालपादपात्पल्लवमादाय। निष्पीडनच्छिन्नतलेन गंधगजमदसुरभिपरिमलेन रसेनोत्त
रीयवल्कलैकदेशाद्विपाट्य पट्टिकां स्वहस्तकमलकनिष्ठिकानखशिखरेणाभिलिख्येयं पत्रिका तया तस्यै कन्यकायै प्रच्छन्नमेका
किन्यै देयेत्यभिधायार्पितवानित्युक्त्वा च सा तांबूलभाजनादाकृष्य मामदर्शयत्। अहं तु तेन तत्संबंधिनालापेन शब्दमयेनापि
स्पर्शसुखमिवानुजनयता श्रोत्रविषयेणापि रोमोद्गमानुसर्वांगानुप्रवेशेन मदनावेशमंगेनावेक्ष्यमाना तस्याः करतलादादा मि०८
यतां वल्कलपत्रिकां तस्यामिमामभिलिखितामार्यामपश्यं। दूरं मुक्तालतया बिससितया विप्रलोभ्यमानो मे। हंस इव दर्शिता
शो मानसजन्मा त्वयानीतः।१। अनया च दृष्ट्या दिग्मोहभ्रांतेव प्रणष्टवर्त्मनो बकुलनिश्चयेवांधस्य जिह्वोच्छित्तेव मूकस्यैं
द्रजालिकपिच्छिकयेवातत्त्वदर्शिनी ज्वरप्रलापप्रवृत्त्येवासंबद्धाभिधायिनी पुष्टनिद्रेव विषविकलस्य लोकायतिकविद्येवा
धर्मरुचेर्मदिरयेवोन्मत्तस्य दुरावेशक्रिययेव पिशाचग्रहस्य दोषविकारेण पञ्चतां च यः स्तुत रोम क्रियत स्मरातुरस्य मे मनसः प्रेना

तस्य

कुलीक्रियमाणासरिदिव पूरेणविपुलतामगमत्। तां च द्वितीयदर्शनेनैकतमहापुण्यामिवानुमतसुरलोकवासामिवदेवताधिष्ठिता
मिवलब्धवराभिवपीतामृतामिवसमासादितत्रैलोक्यराज्याभिषेकामिवमन्यमानासततसन्निहितामपिदुर्लभदर्शनामिवातिप
रिचितामप्यपूर्वामिवसादरमाजायमानासर्वलोकस्योपर्यवस्थितामिवपश्यंतीकपोलयोरलकलताभंगेषुचस्तोपयहंस्पृशं
तीविपरीतमिवपरिजनस्यामिसंबंधमुपदर्शयंतीतरलिकेकथयकथंदृष्टः किं किमभिहितासितेनकियंतंकालमवस्थिता
मितत्राकियदनुसरलस्मानसावागतइतिपुनःपुनःपर्यपृच्छत्। अनयैवचकथयातयासहतस्मिन्नेवप्रासादेतथैवप्रतिविरुद्ध
शेषपरिजनप्रवेशादिवसमत्यवाहयत्। अथमदीयेनेवहृदयेनरुलरागसंविभागेलोहितायतिगगनतलोपांतावलंबिनिरवि
बिंबेसरागदिवसकरदर्शनानुरक्तायांकृत[redacted]कमलध्ययनायामनंगातुरायामिवपांडुतांव्रजंत्यामातपलक्ष्म्यांगैरिकागिरि
सलिलप्रपातपाटलेषुकमलवनेभ्यःसमुत्थायवनगजयूथेष्विवपुंजीभवत्सुभास्करकिरणेषुगगनावतारविश्रामलालसा शिवः

वं२

नांरविरमवाजिनां हर्षहेषारवसनिशब्दकेन सरविशति मेरुगिरिगह्वरं वा सरेसु कुलितरक्तपंकजपुटप्रविष्टमधुकरावलीषु विरहमूर्छां
धकारितहृदयास्विव प्रारब्धनिमीलनासु पद्मिनीषु वासीकृतसामान्यमृणालकलताविवरसंक्रामितानीव परस्परहृदयान्याछिद्य
विघटमानेषु रथांगनाम्नां युगलेषु साछत्रग्राहिणी समागत्याकथयत्: भर्तृदारिके तयोर्मुनिकुमारयोरन्यतरो द्वारि तिष्ठति
कथयति चाक्षमालामनुपयाचितुमागतोस्मीति: अहं तु तु मुनिकुमारनामग्रहणादेव स्थानस्थिता पिगतेव द्वारदेशं समुपजाततं
दागमनशंका समाहूयान्यतमं कंचुकिनं गच्छ प्रवेशयैनमित्यादिश्य प्राहिणवं: अथ मुहूर्तादिव तेन सरूपस्येव यौवनं
यौवनस्येव मकरकेतनं मकरकेतनस्येव वसंतं वसंतसमयस्येव दक्षिणानिलमनुरूपं सखायं मुनिकुमारं क
पिंजलनामानं जराधवलस्य कंचुकिनोनुमार्गेण चागतं तपस्येव बालातपमागच्छंतमपश्यं: अंतिकमुपगतस्य चास्य प
र्याकुलमिव सविषादमिव शून्यमिवार्थिनमिवानुपरताकृतमाकारमलक्षयं उत्थाय च कृतप्रणामा सादरं स्वयमासनमुपा
हरं: उपविष्टस्य च बलान्निष्क्रान्तो प्रक्षाल्य चरणावुपगृह्य चोत्तरीयांशुकपल्लवेनाव्यवधानायां भूमावेव तस्यांतिके समुपावि

शं॰ अथमुहूर्त्तमिवस्थित्वाकिमपिविवक्षुरिवसातस्यांमत्समीपोपविष्टायांतरलिकायांचक्षुरपातयत्॰ अहंतुविदिताभिप्रायातद
ष्ट्येवभगवन्नत्यतिरिक्तेयमस्मच्छरीरादस्यांकिलमामभिधीयतामित्यवोचं॰ एवमुक्तश्चमयाकपिंजलःप्रत्यवादीत्॰ राजपुत्रिकिंब्र
वीमिवागेवमेनामभिधेयविषयमवतरतित्रपयाकंदमूलफलाशीशांतोवनाभिरतोमुनिजनःकाम्यमनुपशांतजनोचितोवि
षयोपभोगाभिलाषकलुषोमन्मथविविधविलाससंकटोरागप्रायःप्रपंचः।सर्वमेवानुपपन्नमालोकयकिमारब्धंदैवेन॰ अ
नै५ यत्नेनैवखल्वपहास्यतामीश्वरोनयतिजनंनजानेकिमिदंवल्कलानांसदृशमुताहोजटानांसमुचितंकिंतपसोनुरूपमा
होस्विद्धर्मोपदेशांगमिदमपूर्वेयंविडंबनाकेवलमवश्यंकथनीयमिदमपरउपायोनदृश्यतेऽन्याप्रतिक्रियानोपलभ्यतेऽ
न्यच्छरणंनालोक्यतेऽन्यागतिर्नास्त्यकथ्यमानेचमहाननर्थोपनिपातोजायतेप्राणपरित्यागेनापिरक्षणीयाःसुहृदसवः
तिकथयामि॰ अस्तिनवसाःसमक्षमेवसमयातथानिष्ठुरमुपदर्शितकोपेनाभिहितस्तयाचाभिधायपरित्यज्यतंतस्मात्प्रदे
शात्कुसुमप्रजालमनुसरत्स्वैककुसुमावचयोन्यप्रदेशमगमं॰ अपयातायांचतस्यांमुहूर्त्तमिवस्थित्वैकाकीकिमिदानीमाचरतीति शिवः

संजातवितर्कःप्रतिनिवृत्यविस्मयानागतविग्रहस्तंप्रदेशंमवलोकयं·यावत्तत्रतंनाद्राक्षमासीच्चमेमनस्येवंकिलमदनपरायत्तचित्तवृ
त्तिस्तामेवानुसरन्नतोभवेत्तायांचतस्यांलब्धचेतनोलज्जमानोनशक्नोतिमेदर्शनपथमुपगंतुमाहोस्वित्कुपितःपरित्यज्यमां
गतउतान्वेषमाणोमामेवप्रदेशमन्यमितःसमाश्रितःस्यादित्येवंविकल्पयन्कंचित्कालमतिष्ठं·तेनतुजन्मनःप्रभृत्यनभ्यस्तेनतस्य
क्षणमप्यदर्शनेनदूयमानःपुनरचिंतयं·कदाचिदेवैर्यस्खलनविलक्षःकिंचिदनिष्टमपिसमाचरेत्नहिकिंचिन्नक्रियेतह्रि
यातन्नयुक्तमेकाकिनंकर्तुमित्यवधार्यान्वेषणमादरमकरवं·अन्वेषमाणश्चयथायथानापश्यंतंतथातथासुहृत्स्नेहकातरेण
मनसातत्तदशोभनमाशंकमानस्तरुलतागहनानिचंदनवीथिकालतामंडपान्सरःकूलानिचवीक्षमाणोनिपुणमितस्ततोद
त्तदृष्टिःसुचिरंव्यचरं·अथैकस्मिन्सरःसमीपवर्त्तिनिनिरंतरतयाकुसुममयमिवमधुकरमयमिवपरभृतमयमिवमयूरम
यमिवातिमनोहरेवसंतजन्मभूमिभूतेलतागहनेकृतावस्थानमुत्सृष्टसकलव्यापारतयालिखितमिवोत्कीर्णमिवस्तंभितमिवो

परतमिवप्रसुप्तमिवयोगसमाधिस्थमिवनिश्चलमपिस्वहृत्ताच्चलितमेकाकिनमपिमन्मथाधिष्ठितंसानुरागमपिपांडुतामावहंतं
शून्यांतःकरणमपिहृदयनिवासिदर्शयितंतूष्णीकमपिकथितमदनवेदनातिशयंशिलातलोपविष्टमपिमरणेव्यवस्थितंशापप्रदान
भयादिवादत्तदर्शनेनकुसुमायुधेनसंताप्यमानमतिनिष्पंदतयाहृदयनिवासिनींप्रियांद्रष्टुमंतःप्रविष्टैरिवासह्यसंतापसंचा
सभयलीनैरिवमनःक्षोभप्रकुपितैरिवोन्मुच्यगतैरिंद्रियैःशून्यीकृतशरीरंनिष्पंदमीलितेनांतर्ज्वलन्मदनदहनधूमाकुलिताभ्यं
तरेणेवपक्ष्मांतविवरवांतानेकधारमनवरतमीक्षणयुगलेनबाष्पजलदुर्दिनमुत्सृजंतमालोहिनीमधरमणिनामनंगाग्नेःप्र
दहतोहृदयमूर्ध्वसंसर्पिणींशिखामिवाद्रायनिःपतद्भिरुच्छ्वासैस्तरलीकृतासन्नलताकुसुमकेसरंवामकपोलस्थापिनीकृतक
रतलतयासमुत्सर्पद्भिरमलैर्नखांशुभिर्विमलीकृतमच्छाच्छचंदनरसरचितललाटिकमिवललाटमुद्वहंतमचिरापनीतपा
रिजातकुसुमकर्णपूरतयासशेषपरिमलामोदलोभोपसर्पिणालिकुलविरुतच्छलेनमदनसंमोहनमंत्रमिवजपतामधुकरकु

लेनसनीलोत्पलमिवसतमालपल्लवमिवप्रवालदंशंध्यानमुत्कंठाज्वररोमांचव्याजेनप्रतिरोमकूपनिपतितानांमदनशराणांकुसुम
शरकेसरशल्यशकलनिकरमिवांगलग्नंबिभ्राणंदक्षिणकरेणचस्फुरितकिरणनिकरांकरतलस्पर्शसुखकंटकितामिवमुक्ता
वलीमविनयपताकामुरसिधारयंतंमदनवशीकरणचूर्णेनेवकुसुमरेणुनानस्रमभिहन्यमानमात्माराममिवसंक्रामयद्भिरास
न्नैरनिलचलितैरशोकपल्लवैःस्पृश्यमानंसुरताभिषेकसलिलैरिवाभिनवपुष्पस्तबकमधुसीकरैर्वनश्रियाभिषिच्यमानमलि
निवहनिपीयमानपरिमलैरुपरिपतद्भिश्चंपककुड्मलैरुलसमारशल्यकैरिवसधूमैःकुसुमशरेणताड्यमानमतिबहलवना
मोदमत्तमधुकरनिकरझंकारनिस्वनैर्हुंकारैरिवदक्षिणानिलेननिर्भर्त्स्यमानंमदकलकोकिलकुलकोलाहलैर्वसंतजयश
ब्दकलकलैरिवमधुमासेनाकुलीक्रियमाणंप्रभातचंद्रमिवपांडुतयापरिगृहीतंनिदाघगंगाप्रवाहमिवकृशिमानमागतमंतर्ग
तानलंचंदनविटपमिवम्लायंतमन्यमिवादृष्टपूर्वमिवापरिचितमिवजन्मांतरमिवोपगतंरूपांतरेणेवपरिणतमाविष्टमिवग्रह

का॰पू॰

१११ गृहीतमिवोन्मत्तमिव छलितमिवांधमिव बधिरमिव मूकमिव विलासमयमिव मदनमयमिव परायत्तचित्तवृत्तिं परां कोटिमारूढस्य मन्मथावे
शस्यानभिज्ञेयपूर्वाकारं तमहमद्राक्षं॰ अपगतनिमेषेण तदवस्थं चिरमुद्वीक्ष्य समुपजातविषादा वेपमानेन हृदयेनाचिंतयं॰ एवं नामायमतिदुर्वि
||| षहवेगो मकरकेतुर्येनानेन स्खलितेनायमीदृशमवस्थांतरमुपनीतः॰ कथमेवमेकपदेयमूर्जितवेदैवंविधो ज्ञानराशिरहो वनमहर्षि
त्रं नयानामायमाशैशवादीरप्रकृतिरस्खलितवृत्तिर्मम चान्येषां च मुनिकुमारकाणां स्पृहणीयचरित्र आसीत्॰ अयमितर इव परित्
पा४ यज्ञानमवगणय्य तपःप्रभावमुन्मूल्य गांभीर्यमन्मथेन जडीकृतः सर्वदुर्लभं यौवनमस्खलितमिति॰ उपविश्य च तस्मिन्नेव शिलातले क
पार्श्वे समुपविश्यांसदेशावसक्तपाणिस्तलमनुन्मीलितलोचनमेव सस्वेदपुंडरीक कथय किमिदमित्यपृच्छं॰ अथ सुचिरसम्मील
नालग्नमिव कथमपि प्रयत्नेनानवरतरोदनेव शणरुपजातारुणभावमश्रुजलपूरप्लावितमुत्स्नापितमिव सवेदनमिव स्वच्छांशु
कांतरितरक्तकमलवनच्छायं चक्षुरुन्मील्य मंथरमंथरया दृष्ट्या सुचिरं विलोक्य मामायततरं निःश्वस्य लज्जाविशीर्यमाणविरलाक्ष शिवः

रं सखे कपिंजल विदितवृत्तांतोपि किं मां पृच्छसीति कृच्छ्रेण शनैरवदत् । अहं तु तस्याकल्पकाल्यावस्थायैवाप्रतीकारविकारोयंत
थापि सुहृदा सुहृदसन्मार्गप्रवृत्तो यावच्छक्तितः सर्वात्मना निवारणीय इति मनसावधार्याब्रुवम् । सखे पुण्डरीक सुविदित
मेतन्मम केवलमिदमेव पृच्छामि यदेतदारब्धं भवता किमिदं गुरुभिरुपदिष्टमुत धर्मशास्त्रेषु पठितमुत धर्मार्जनोपायो
यमुतापरस्तपसां प्रकारः उत स्वर्गगमनमार्गोयमुत व्रतरहस्यमिदमुत मोक्षप्राप्तियुक्तिरियमाहोस्विदन्यो नियमप्रका
रः कथमेतद्युक्तं भवतो मनसापि चिंतयितुं किं पुनराख्यातुमीक्षितुं वा किमप्रबुद्ध इवानेन मन्मथहतकेनोपहासास्प
दतां नीयमानमात्मानं नावबुध्यसे मूढो हि म दनेनायास्यते वा सुखाशासाधुजननिंदितेष्वेवंविधेषु प्राकृतजनबहु
मतेषु विषयेषु भवतः सखे खलु धर्मबुध्या विषलतामिव वनं सिंचति कुवलयमालेति निस्त्रिंशलतामालिंगति कृष्णागुरुधूमले
खेति कृष्णसर्पमवगूहते रत्नमिति ज्वलंतमंगारमभिस्पृशति मृणालमिति दुष्टवारणदंतमुसलमुन्मूलयति मूढो विषयो

का.प्र.
११२
112

पभोगेषुनिष्ठानुबंधिषुयः सुखबुद्धिमारोपयतिअधिगतविषयतत्वोपिकस्मात्त्वंपोतइवप्लोतिनिर्वीर्यमिदंज्ञानमुद्वहसियतो
ननिवारयसिप्रबलरजःप्रसरकलुषितानिस्रोतांसीवोन्मार्गप्रस्थितानींद्रियाणिननियमयसिचक्षुभितंमनःकोयमनंगोनाम
धैर्यमवलंब्यनिर्भर्त्स्यतामयंदुराचारइत्येवंवदतएवमेवचनमाक्षिप्यप्रतिपक्ष्मांतरालप्रवृत्तबाष्पवेलिकंप्रमृज्यचक्षुःकरतले
नपाणिनामामवलंब्यावोचत्सखेकिंबहुनोक्तेनसर्वथास्वस्थोसिआशीविषविषवेगविषमाणामेतेषांकुसुमचापसायकानांप
तितोसिनगोचरेसुखमुपदिश्यतेपरस्ययस्यचेंद्रियाणिसंतिमनोवाविद्यतेयःपश्यतिवाशृणोतिवाश्रुतमवधारयतिवायो
वाशुभमिदंनशुभमिदमितिविवेकुमलंसखलूपदेशमर्हतिमयातुसर्वमिवेदमतिदूरापेतंअद्यएवंभोज्ञानंधैर्यंप्रतिसंख्यानमि
त्यस्तमितेषाकथाकथमप्येवमेवायलविष्टमात्तिष्ठंत्यसवोदूरातीतःखलूपदेशकालःसमतिक्रांतोधैर्यावसरोगताःप्रतिसंख्या शिवः
नवेलाअतीतोज्ञानावष्टंभसमयःकेनवान्येनास्मिन्समयेभवंतमपहायोपदेष्टव्यमुन्मार्गप्रवृत्तिर्निवारणंवाकरणीयंकस्यान्यस्य ११२

वावंचयित्स्थातव्यं को वा परित्राणसमर्थो मे जगति बंधुः किं करोमि यन्न शक्नोमि निवारयितुमात्मानं नियमनेनैव क्षणेन भवता दृष्टा ऽवस्था
तदंतरमिदानीमुपदेशकालो यावदस्माणि मितावदस्य कलांतो दित द्वादशादिनकरकिरणातपतीव्रस्य मदनसंतापस्य प्रतिक्रियां क्रिय
माणामिच्छामि पच्यन्त इव मे गात्राणि उत्कथ्यत इव हृदयं प्लुष्यत इव दृष्टिः ज्वलतीव शरीरं अत्र यत्प्राप्तकालं तत्करोतु भवानित्यभिधा
यतत्स्थीमभवत्। एवमुक्ते प्यहमेनं प्रबोधयं पुनः पुनर्यदा शास्त्रोपदेशविशदैः सनिदर्शनैः सेतिहासैश्च वचोभिः सानुनयं सोप
ग्रहं चाभिधीयमानोपि यदा नाकरोत्कर्णे तदाहमचिंतयमतिभूमिमयं गतो न शक्यते निवर्तयितुमिति। इदानीं निरर्थकाः खलूपदेशाः।
तत्प्राणपरिरक्षणे पि तावदस्य यत्नमाचरामीति कृतमतिरुत्थाय गत्वा तस्मात्सरसः सरसाम्रणालिकाः समुद्धृत्य कमलिनीपलाशा
निजललवलांछितानि आदाय गर्भधूलिकषायपरिमलमनोहराणि च कुमुदकुवलयकमलानि गृहीत्वागत्य तस्मिन्नेव लतागृह
शिलातले शयनमस्याकल्पयं। तत्र च सुखनिषण्णस्य प्रत्यासन्नवर्त्तिनां चंदनविटपादीनां म्रदूनि किसलयानि निःपीड्य तेनस्व

११३ भावसुरभिणातुषारशिशिरेणरसेनललाटिकामकल्पयं·आचरणतलादंगचर्चांचारचयं·अभ्यर्णपादपस्फुटितवल्कलविवरसी

र्णेनचकररसंचलितेनकर्पूररेणुनास्वेदप्रतीकारमकरवं·उरोनिहितचंदनद्रवार्द्रवल्कलस्यस्वच्छसलिलसीकरनिकरश्राविलाकद

113 लीदलेनौष्म्यशाम न्वतिष्ठं·एवंचमुकुरन्यदन्यन्नलिनीदलशयनमुपकल्पयतोमुहुश्चंदनचर्चामारचयतोमुहुर्मुहुश्चस्वेदप्र

तिक्रियांकुर्वतःकदलीदलेनचानवरतंवीजयतःसमुदभून्मेमनसिचिंतानास्तिखल्वसाध्यंनामभगवतोमनोभुवःकायंहरि

णकवनवासनिरतःस्वभावमुग्धोजनःक च विविधविलासरसराशिर्गंधर्व राजपुत्रीमहाश्वेतासर्वथानहिकिंचिदस्यदुर्घ

टंदुष्करमनायत्तमकर्तव्यंवाजगतिदुःखाप्येष्यंधमनवज्ञयाविचरतिनचायंकेनापिप्रतिकूलयितुंशक्यतेकावागणनाससचेतनेषु

पगतचेतनानामपिसंघट्टयितुमलंयद्यस्मैरोचतेतत्कुमुदिन्यपिदिनकरकरानुरागिणीभवतिकमलिन्यपिशशधरद्वेष

मुञ्चतिनिशापिवासरेणसहनिम्मनामेतिज्योत्स्नाप्यंधकारमनुवर्त्ततेछायापिप्रदीपाभिमुखमवतिष्ठतेतडिदपिजलदे शिव:

=दुरूपपादेष्वप्यर्थेषु=पाठांतरं ३

स्थिरतांव्रजतिजरसापिष्टोवनेनसंचारिणीभवतिकिंवातस्यदुःसाध्यमपरमेवंविधोयेनायमगाधगांभीर्यसागरस्तृणलववल्लघुतामुप
नीतःक्वतत्तपःक्वेयमवस्थासर्वथानिःप्रतीकारेयमापदुपस्थिताकिमिदानींकर्त्तव्यंकिमाचेष्टितव्यंकंदेशंप्रतिगंतव्यंकिंशरणंको
वाउपायःकःसहायःकःप्रकारःकायुक्तिःकःसमाश्रयोयेनास्यासवःसंधार्यंतेकेनवाकौशलेनकतमयावायुक्त्याकतरेणवाप्रका
रेणकेनवावष्टंभेनकयाप्रज्ञयाकतमेनवासमाश्वासनेनायंजीवेदित्येतानिचान्यानिचमेविचलतोहृदयस्यसंकल्पाःप्रादुरा
सन्।पुनश्चाचिंतयंकिमनयाध्यानतयानिःप्रयोजनयाचिंतयाप्राणास्तावदस्ययेनकेनचिदुपायेनशुभेनाशुभेनवारक्षणी
यास्तेषांचतत्समागममेकमपहायनास्त्यपरःसंरक्षणोपायोबालभावादप्रगल्भतयाचतपोविरुद्धमनुचितमुपनतमुपहास
मिवात्मनोमदनव्यतिकरंमन्यमानोनियतमेकोच्छ्वासावशेषजीवितोपिनायंतस्याःस्वयमभिगमनेनपूरयतिमनोरथमका
लांतरक्षममस्यायमस्यमदनविकारःसततमतिगर्हितेनाकृत्येनापिरक्षणीयान्मन्यंतेसुहृदसून्साधवःतदतिह्रेपणमकर्त्तव्यम

११४ येतदस्माकमवश्यकर्त्तव्यतामापतितं।किंवान्यत्क्रियतेकान्यागतिःसर्वथाप्रभातितस्याःसकाशमावेदयाम्येतामवस्थामिति चिंत
यंचकदाचिदेतच्चिंताव्यापारप्रवृत्तंमांविज्ञायसंजातलज्जोनिवारयेदित्यनिवेद्यतस्मैतत्प्रदेशान्तसमाजगमुस्वायागतोऽहंतदेव
मवस्थितेयस्त्वावसरप्राप्तमीदृशस्यचानुरागस्यसदृशमस्यरागमनस्यचानुरूपमात्मनोवासमुचितंतत्रभवतीभवती
त्यभिधायकिमियंवक्ष्यतीतिमन्मुखासक्तदृष्टिस्तूष्णीमासीत्।अहंतुतदाकर्ण्यमुखामृतमयेह्रदइवनिमग्नारतिरससमय
मुदधिमिवावतीर्णासर्वानंदानामुपरिवर्त्तमानासर्वमनोरथानामग्रमिवाधिरूढासर्वोत्सवानामतिभूमिमिवाधिरोप्यमाना
तत्कालोपजातयालज्जयाकिंचिदवनम्यमानवदनतात्स्पृष्टकपोलोदरैर्गंधितैःशिरोपर्युपरिपतनानुबंधदर्शितमाला
क्रमैरप्राप्तपक्ष्मसंश्लेषतयोपजातप्रथिमभिस्तैरमलैरानंदवाष्पजलबिंदुभिःप्रस्रवद्भिरावेद्यप्रवृत्त[redacted]प्रसंगात्तत्क्षणमचिंत
यं॰दिष्ट्यातावदयमनंगोमामिवतमप्यनुबध्नातियत्सत्यमनेनमेसंतापयताकियताप्यंशेनदर्शितौयदिचससमिवतस्येह श्रिवः

तुकूलता

शीलत्वात्ततः किमिव नोपकृतमनेन किं वा नोपपादितं को वानेनापरः समानो बंधुः कथं वा कपिंजलस्य स्वप्ने पि वितथा भारती प्रशांता केतर
स्या हृदयानन्दिः काम तिष्ठत्यन्ते किं मया प्रतिपत्तव्यं तस्य वा पुरः किमभिधातव्यमित्येवं विचारयंत्या एव प्रविश्य ससंभ्रमा प्रतीहारी
ममाकथयत् भर्तृदारिके त्वमस्वस्थशरीरेति परिजनादुपलभ्य महादेवी प्राप्तेति तच्छ्रुत्वा कपिंजलो महाजनसंमर्दभीरुः सत्व
रमुत्थाय राजपुत्रि महानयमुपस्थितः कालातिपातो भगवांश्च भुवनत्रयचूडामणिरस्तमुपगच्छति दिवसकरस्तद्गच्छा
मि सर्वथाभिमतसुहृत्प्राणरक्षादक्षिणार्थमयमुपरचितोंजलिरेष मे परमो विभवः इत्यभिधाय प्रतिवचनकालमप्रतीक्ष्ये
व पुरोयायिनां बाधाः प्रविशता कनकवेत्रलताकरेण प्रतीहारीजनेन कंचुकिलोकेन च गृहीततांबूलकुसुमपटवासांगरागे
ण चामरव्यग्रपाणिना कुब्जकिरातबधिरवामनबर्बरकलककानुवीतेन परिजनेन सर्वतः संरुद्धद्वारदेशे कथमप्यवाप्तनिर्गम
ः प्रययौ अंबा तु मत्समीपमागत्य सुचिरं स्थित्वा स्वभवनमयासीत् तयान्तु तत्रागत्य किं कृतं किमभिहितं किमाचेष्टितमिति स्मरंत्य

दृश्या सर्वेनालक्ष्यं गतायां तस्यामस्तमुपगते भगवति हारीतहरितवाजिनि सरोजिनीजीवितेश्वरे चक्रवाकसुहृदि [redacted]
सवितरि लोहितायमाने पश्चिमाशामुखे हरितायमानेषु कमलवनेषु नीलायमानेषु सर्वदिग्विभागे पातालपंककलुषेणाम्भसेव प्ल
यजलधिपयःपूरेणेव तिमिरेणावष्टभ्यमाने जीवलोके किंकर्तव्यतामूढ तामेव तरलिकामपृच्छं अपितरलिके न पश्यसि दुष्ट कपं२
माकुलं मे हृदयमप्रतिपत्तिविक्लवानि चेंद्रियाणि न स्वयमल्पमपि कर्तव्यमलमस्मि ज्ञातुमुपदिश तु मे भवती यदत्र सांप्रतम
यमेवं त्वत्समक्षमेवाभिधाय गतः कपिंजलो यदि तावदितरकन्यकेव विहाय लज्जामुत्सृज्य धैर्यमवमुच्य विनयमचिंतयित्वा
जनापवादमतिक्रम्य सदाचारमुल्लंघ्य शीलमवगणय्य कुलमंगीकृत्यायशो रागांधवृत्तिरननुज्ञाता पित्रा मात्रा च स्वयमुपग
म्य ग्राहयामि पाणिमेवं गुरुजनातिक्रमादधर्मो महानथ धर्मानुरोधादितरपक्षावलंबनं द्वारेणं मृत्युमंगीकरोम्येवमपि प्र
थमं तावत्स्वयमागतस्य प्रथमप्रणयिनस्तत्रभवतः कपिंजलस्य प्रसरभंगः पुनरपरं यदि कदाचित्तस्य जनस्य मत्कृतादा शिवः

शार्ङ्गिणाप्राणविपत्तिरुपजायते तदपि मुनिजनवधजनितं महदेनो न वेद्मि सेवनुद्यानयंलामेवमत्यासन्नचंद्रोदयजन्मना विरलवि
रलेनालोकेन वसंतवनराजिरिव कुसुमरजसा धूसरतां वासवी दिगयासीत्॰ ततः शशिकेसरिविदार्यमाणतमःकरिकुंभसंभवे
नमुक्ताफलक्षोदेनेव धवलतामुपनीयमानमुदयगिरिसिखरसुंदरीकुचच्युतेन चंदनचूर्णराशिनेव पांडुरीक्रियमाणं चलितजल
धिजलकल्लोलानिलोल्लासितेन वेलापुलिनसिकतोत्करेणेव पांडुतामापाद्यमानं पश्चिमेतरमिंदुधाम्ना दिगंतरमभवत्॰ ततः श
नैः शनैश्च चंद्रदर्शनानंदमंदस्मितायाः प्रथमप्रभेव ज्योत्स्नानिष्यंदिनी निशायाः मुखशोभामकरोत्॰ तदनु रसातलादिवनी
मवदार्योत्फुल्लशेषफणामंडलेनेव रजनिकरबिंबेनाराजत मेदिनी॰ क्रमेण च सकलजीवलोकानंदकंदेन कामिनीजन
वल्लभेन किंचिदुन्मुक्तबालभावेन मकरध्वजबंधुनानेनोपारूढरागेण सुरतोत्सवोपभोगैकयोग्येनाभिनवमयेन यौवनेनेवा
रोहता शशिना रमणीयतामनीयत यामिनी॰ अथ तं प्रत्यासन्नसमुद्रविद्रुमप्रभापाटलितमिवोदयगिरिसिंहकरतलाहत न

हरिणांकशोणितशोणीकृतमिवरतिकलहकुपितरोहिणीचरणालक्तकरसलांछितमिवाभिनवोद्गमरागलोहितंरजनिकर
मुदितंविलोक्यानंगज्वलितमदनानलांधकारितहृदयातरलिकोत्संगविघटितशरीरामन्मथहस्तवर्तिनीचंद्रगतनयनापिन
सुमालोकयंतीनस्मरणमचिंतयं·एकत्रखलुमदनमधुमाससमलयमारुतप्रभृतयःसमस्ता·एकत्रचपापकारीचंद्रहतको
नशक्नोतिसोढुमिदमतिदुर्विषहमदनवेदनातुरस्यमहस्यमस्यचोद्गमनमिदंसहज्वरग्रस्तस्यांगारवर्षःशीतार्त
स्यतुषारपातो।विषस्फोटमूर्छितस्यपरसक्षसर्पदंशइत्येवंविचिंतयंतीमेवचंद्रोपनीताकमलवनम्लानिनिद्रेवमूर्छामांनि
मीलितलोचनामकार्षीत्·अचिरेणचतैस्तरलिकोपनीतामिश्रचंदनचर्चाभिस्तालवृंतानिलैश्चोपलब्धसंज्ञातामेवा
कुलाकुलांमूर्त्तेनाधिष्ठितांविषादेनमस्फलानविघटितस्यवचंद्रकांतमणिशलाकामविच्छिन्नबाष्पजलधारांधकारि
तमुखीरुदतीतरलिकामपश्यं·उन्मीलितलोचनांचमांसाकूतप्रणामांचंदनपंकार्द्रेणकरयुगलेनबद्धांजलिरवादीत्·

भर्त्तृदारिके किं लज्जया गुरुजनापेक्षया वा प्रसीद शेषय मामानयामि तं हृदयदयितं जनमुत्तिष्ठ वा तत्र गम्यतां अतः परमसमर्थास्मि सोढुमिमं
प्रबलचंद्रोदयविजृंभमाणकलिकाशरमुदधिमिव मकरचिह्नमित्येवंवादिनीतामहमवोचं· उन्मत्तिके नन्वयं सर्वविकल्पानपाकुर्वन्सर्वो
पायदर्शनात्पुरस्कारयन्सर्वानंतरायानंतरयन्सर्वसंदेहानपर्यन्तं शंकास्तिरस्कुर्वन्जस्त्रानुकूलयन्स्वयमभिगमनलाघवदोष
मात्र एवन्कालातिपातं परिहरन्नागत एव तस्यैव वामलोचनाः सकाशं नेता कुमुद्बांधवस्तदुत्तिष्ठ यथा कथंचिदनुगमनेन जीविता
संभावयामि हृदयदयितमायासकारिणं जनमित्यभिदधानां मदनमूर्छास्वेदविह्वलैरंगैः कथंचिदवलंब्य तामेवोदतिष्ठं· उच
लितायाश्च मे पुर्ण्णिमित्तनिवेदकमस्पंदत दक्षिणलोचनं· उपजातशंका चाचिंतयमिदमपरं किमप्युपक्षिप्तं दैवेनेति· अयमतिदू
रगतेन त्रिभुवनप्रासादमणिप्रदीपकानुकारिणा सुधासलिलबुद्बुदानिव बहलचंदनरसनिर्झरनिकरानिव क्षरलाभ्येत गंगाप्रवा
हसहस्राणीव वमता अमृतसागरपूराणिवोर्जित ताचंद्रमंडलेन प्लाव्यमाने ज्योत्स्नया भुवनांतराले प्रचलद्वीपनिवासमिव सोमलोक

११७ सुखमिवानुभवतिजनेमहावराहदंष्ट्रामंडल निभेनशशिनाक्षीरसागरादिवोद्ध्रियमाणेमहीमंडलेप्रतिभवनमंगनाजनेनविक
117 चकुसुमगंधैश्चंदनोदकैरुपक्रियमाणेषुचंद्रोदयार्घेषुकामिनीप्रहितेषुरतदूतीसहस्रसंकुलेषुराजमार्गेषुनीलांशुकरचिताव
गुंठनासुचंद्रालोकभयचकितासुकमलवन[redacted]लक्ष्मीष्विवसनीलोत्पलप्रभास्विनस्ततःपलायमानास्वभिसारिकासुप्र
तिकुमुदमाबद्धमधुकरमंडलासुप्रबुध्यमानासुभवनदीर्घिकाकुमुदिनीषुस्फुरितकुमुदवनबहलधूलिधवलितोदरेनि
शानदीपुलिनायमानेंतरिक्षेचंद्रोदयानंदनिर्भरेमहोदधाविवरतिरससमयइवोत्सवमयइवविलासमयइवप्रीतिमयइ
वजीवलोकेशशिमणिप्र णालनिर्झरप्रमोदमुखरवरमयूररवरम्येप्रदोषसमयेगृहीतविविधकुसुमतांबूलांगरागपटवा
सचूर्णयानतरलिकयानुगम्यमानातेनैववमकर्णनिहितेनकिंचिदाश्यानचंदनललाटिकोलग्नधूसरकुवलयकेनचंदनरस
चर्चांगरागवेषेणार्द्रेणतथैवचतयाकंठस्थितयाप्रसममालयाश्रवणशिखरचुंबिन्याचपारिजातमंजर्यापद्मरागरत्नरश्मिवि

कौर

निर्मितेनेवरक्तांशुकेनकृतशिरोऽवगुंठनाकेनचिदलक्षीयेनापिपरिजनेनानुपलक्ष्यमाणातस्मात्प्रासादशिखराद्वालरः·अवतीर्यचपा
रिजातकुसुममंजरीपरिमलाकृष्टेनरिक्तीयपवनेनकुमुदवनान्यपहायधावतामधुकरजालेननीलपटावगुंठनविभ्रममिवसंपा
दयतानुबध्यमानाप्रमदवनपक्षद्वारेणनिर्गत्यसमीपमुपचलं·प्रयांतीचतरलिकाद्वितीयमपरिजनमात्मानमालोक्याचिं
तयं·प्रियतमाभिसरणप्रवृत्तस्यजनस्यकिमिवकसंबाधेनपरिजनेननन्वेतएवपरिजनलीलामुपदर्शयंति·तथाहि·समा
रोपितशरासनासक्तसायकोऽनुसरतिकुसुमायुधोदूरप्रसारितकरःकर्षतिशशीप्रस्खलनभयात्पदेपदेऽवलंबतेरागो
लज्जांपृष्ठतःकृत्वापुरःसरेंद्रियैर्धावतिहृदयंनिश्चयमारोप्यनयत्युत्कंठेति·प्रकाशंचावदं·तरलिके अपिनाममामिवाप
मिंदुहतकस्तमपिकिरणकचग्रहाकृष्टमभिमुखमानयेदित्येवंवादिनींचमामसौविहस्याब्रवीत्·भर्तृदारिकेमुग्धासिकि
मस्यत्नेनजनेनायमात्मनैवतावन्मदनातुरइवभर्तृदारिकास्तास्ताश्चेष्टाःकरोति·तथाहि·प्रतिबिंबछलेनस्वेदसलिलक

मे॰

का॰पू॰

११८ णिकां चितं चुंबति कपोलयुगलं लावण्यवति पयोधरे निपतति प्रस्फुरितकरः स्पृशति रसनामणीन्निर्मलनखलग्नमूर्तिः पादयोः पत
ति किंचास्य मदनातुरस्येव वपुस्तापाच्छुष्कचंदनानुलेपपांडुतामुद्वहति मृणालवलयधवलान्करान्धत्ते प्रतिमाव्याजेन स्फुटि
कमणिकुट्टिमेषु निपतति केतकीगर्भकेसरधूलिधूसरपादः कुमुदसरांस्यवगाहते सलिलसीकरार्द्रान् शशिमणीन्करैः स्पृ
शति द्वेष्टि विघटितचक्रवाकमिथुनानि कमलवनान्येतैश्चान्यैश्च तत्कालोचितैरालापैस्तयासह तमुद्देशमभ्युपागमं तत्र
च मार्गलताकुसुमरजोधूसरं चरणयुगलं कैलासतटाच्छंदोदयस्फुटचंद्रकांतमणिप्रस्रवणे प्रक्षालयं नी यस्मिन्प्रदे
शे स आसीत्तस्मिन्नेव चास्य सरसः पश्चिमे तटे पुरुषस्येव रुदितध्वनिं विप्रकर्षान्नातिव्यक्तमुपालक्षयं दक्षिणेक्षणस्फु
रणेन प्रथममेव मनस्याहितशंका तेन सुतरामवदीर्णहृदयेव किमप्यनिष्टमंतःकथयतेव विषमेणांतरात्मना तरलिके
किमिदमिति ससंभ्रममभिदधाना वेपमानगात्रयष्टिस्तदभिमुखमतित्वरितमगच्छं अपयनिशीथप्रभावाद्दूरादेव विभाव्यमानस्व शिवः

११८

रनुन्मुक्तेनाहाहतोस्मिहादग्धोस्मिहावंचितोस्मिहाकिमिदमापतितंकिंवृत्तमुत्सन्नोस्मिदुरात्मन्मदनपिशाचकिमिदमकृत्यमनुष्ठित
मःपापेदुःकृतकारिणिदुर्विनीतेमहाश्वेतेकिमनेनतेऽपकृतंमःपापदुश्वशीलचंद्रचंडालकृतार्थोसीदानीमपगतदाक्षिण्यदक्षिणानि
लहतकपूर्णास्तेमनोरथाःकृतंकर्त्तव्यंवहेदानींयथेष्टंहाभगवन्श्वेतकेतोपुत्रवत्सलनवेत्सिमुषितमात्मानंहाधर्मनिष्परिग्रहोसि
हातपोनिराश्रयमसिहासरस्वतिविधवासिहासत्यमनाथमसिहासुरलोकशून्योसिसखेप्रतिपालयमामहमपिभवंतमनुया
स्यामिनमेक्षणमपिभवताविनाक्षणमप्यवस्थातुमेकाकीकथमपरिचितइवादृष्टपूर्वइवाद्यमामेकपदेउत्सृज्यप्रयासिकुतस्त
वेयमतिनिष्ठुरताकथयत्वदृतेकगच्छामिकंयाचेकंशरणमुपैमिअंधोस्मिसंवृत्तःशून्यामेदिशोजातानिरर्थकंजीवितमप्र
योजनंतपोनिःसुखाश्चलोकाःकेनसहपरिभ्रमामिकमालपामिउत्तिष्ठदेहिमेप्रतिवचनंक्वतन्ममोपरिसुहृत्प्रेमक्वसास्मि
तपूर्वाभिभाषिताचेत्येतानिचान्यानिचविलपंतंकपिंजलमश्रौषंतंचश्रुत्वापतितेरिवप्राणैरीराद्वेवविमुक्तैकतारंक्रंदस

रस्तीरलतासक्तिकुसुमानांसुकोत्तरीयायपाशक्तित्वरितैरज्ञातसमविषमभागविन्यस्तैःपादप्रक्षेपैःप्रस्खलंतीपदेपदेकेनाप्यु
त्क्षिप्यनीयमानेवतंप्रदेशंगत्वासरस्तीरसमीपवर्तिनिशिशिरशीकरासारस्राविणिशशिमणिशिलातलेविरचितंकुसुमकुव
लयकमलविविधवनकुसुमसुकुमारमालामयमिवमृणालमयमिवकुसुमशरसायकमयमिवशयनमधिशयानमतिनिबं
दतयामसदृशमिवाकर्णयंतंमंत्रकोपशमितमदनसंतापतयाक्षणलब्धसुखसुप्तमिवमनःक्षोभप्रायश्चित्तमाणयामाव
स्थितमिथ्यातिस्फुरितप्राणेसत्वस्खलतेमनेयमवस्थेतिकथयंतमिवाधरेणइंदुद्धेवयरिवर्जितदेहतयापश्चभागनिपतिते
मदनदहनविकलहृदयन्यस्तहस्तनखमयूखच्छलेनाभिजितमिवशशिकिरणैरुत्फुल्लकपांडुरयास्वविनाशोस्मलयामद
नचंद्रकलयेववंदनलेखिकमारचितललाटिकमीषद्दलस्यपरिवृत्ततारकेणानवरतरोदनात्ताम्रेणप्राणोत्सर्गोपजा
ताश्रुक्षयतयारुधिरमिवक्षरतामदनशरशल्यवेदनाकूणितत्रिभागेननातिनिमीलितेनलोचनयुगलेनमन्तःप्रियतरस्त शिवः

वापरोजनोजातइतिकुपितेनेवजीवितेनपरित्यक्तमन्मथमथ्ययासहैतानस्तदुःस्वयमिवोक्तउपानिश्चेतनतासुखमनुभवंतमनंगभोग
विघामिवध्यायंतमपूर्वप्राणायाममिवाभ्यस्यंतमनुपपादितास्मदागमनेनमरणमाश्रिवहृतप्राणसर्वपात्रमनंगेनरचितचंदनलला
टिकात्रिपुंड्रकंधृतसरसबिसरूत्रयज्ञोपवीतमंसावसक्तकदलीगर्भपत्रचारुचीरमेकावलीविशालाक्षमालमविरलाम
लकर्पूरक्षोदजन्मधवलमाबध्नमृणालरक्षाप्रतिसरमनोहरंमनोभवव्रतवेषमास्थायमत्समागममंत्रमिवसाधयंतम
नवरतरोदनाताम्रेणस्रुस्रयागतरुधिरेणेवमदनशरशल्यवेदनाकूणितत्रिभागेनकठिनहृदयेदर्शनमात्रेणापिनमु
नरनुगृहीतोयमनुगतोजनइतिसप्रणयंमामुपालभमानमिवचक्षुषाकिंचिद्विवृताधरलतयाजीवितमपहर्तुमंतःप्रविष्टैरि
वेंदुकिरणैर्निर्गच्छद्भिर्दशनांशुभिर्धवलितपुरोभागंमन्मथव्यथयाविघटमानहृदयनिहितेनवामेनपाणिनाप्रसीद
प्राणैःसमंप्राणसमेनगंतव्यमितिहृदयस्थितांमामिवधारयंतमितरेणचनखमयूखसंततुरतपाचंदनमिवस्नवतोत्तानीकृ

तेनचंद्रातपमिवनिवारयंतमंतिकस्थितेनचाचिरेणतज्जीवितमार्गमिवोद्ग्रीवेणविलोकयतातपःसुहृदाकमंडलुनासमुपेतंकं
ठन्नरणीकृतेनचमृणालवलयेनरज्जुनिकरकिरणपाशेनेवसंयम्यलोकांतरमुपनीयमानंकपिंजलेनमद्दर्शनाऽभ्यल
एयमिवमूर्द्धहस्तेनद्विगुणीभूतबाष्पोद्गमेनाक्रोशताकंठेपरिष्वक्तंविगतजीवितंतमहंपापकारिणीमंदभाग्यामहतभाग्यमद्रा
क्षं।उज्झतम्मूर्च्छांधकारेचपातालमिवावतीर्णतयाकाहमगमंकिमकरवंकिंव्यलपमितिसर्वमेवनाज्ञासिषं।असवश्चमे
तस्मिन्क्षणेकिमतिकठिनतयास्फुटकहृदयस्यकिमनेकदुःखसहिष्णुतयाहतशरीरकस्यकिंविहितलभ्याद्दीर्घशोकस्य
किंभाजनतयाजन्मांतरोपात्तस्यदुःखतस्यकिंदुःखदाननिपुणतयादग्धदैवस्यकिमेकांतवामतयादुरात्मनोमन्म
थहतकस्यकेनहेतुनानोज्झंतिस्मतदपिनज्ञातवतीकेवलमतिचिराल्लब्धचेतनादुःखभागिनीवह्नाविवपतितमस
त्यशोकदह्यमानमात्मानमवनौविचेष्टमानमपश्यं।अश्रद्दधानाचासंभावनीयंतत्तस्यमरणमात्मनश्चजीवितमुत्थाय शिवः

120

हाहा किमिदमिति मुक्तार्त्तनादा हा अंब हा तात अंब हा सख्य इति व्याहरंती हा नाथ जीवितनिबंधन आचक्ष्व मामेकाकिनीमश-
रणामकरुण विमुच्य यासि पश्य तरलिकां त्वत्कृते मया यानुभूतावस्था पुनरस्तायमानाः कृच्छ्रेण नीतो दिवसः प्रसीद संद-
र्शनप्रसारय मे कवत्सलतामीषदपि विलोकय पूरयमे मनोरथं मार्त्तास्मि भक्तास्मि अनाथास्मि बालास्मि अगतिकास्मि दुः
खितास्मि अनन्यशरणास्मि मदनपरिभूतास्मि किमिति न करोषि दयां कथय किमपराद्धं किं वा नानुष्ठितं मया कस्यां वा मया
नाज्ञायामादृतं कस्मिन्वा न तवानुकूले नाचरितं येन कुपितोऽसि दासजनमकारणात्परित्यज्य व्रजन्न बिभेषि कौलीनादलीकानु
रागप्रतारणकुशलया किं वा मया वा मया वा पापया। आः अहमद्यापि प्राणिमि हतास्मि मंदभागिनी कथं न त्वं माता न वितथो न बंधुव
र्गो न परलोकोऽपि आः दुःखकारिणी यस्याः कृते तवेयमीदृशी दशा वर्त्तते नास्ति मत्सदृशी नृशंसहृदया याहमेवंविधं भवंतमुत्सृज्य गृहं
गतवती किं मे गृहेण किं मे अंबया किं वा तातेन किं बंधुभिः किं परिजनेन हा कमुपयामि शरणमपि दैव दर्शय दयां विज्ञापयामि त्वां देहि दक्षिणां
भगवति भवितव्यते कुरु कृपां पाहि विनीतामनाथां भगवत्यो वनदेवताः प्रसीदत प्रयच्छतास्य प्राणान्सकललोकानुजननि रजनि कि

मर्यनानुकंपसेतालवृंतेनासन्नचरणागतासुमिते दर्शयन्त्यानुतापमिवेतानि चान्यानि च व्याक्रोशंती किमपस्मरणामियरुग्गृहीतेवाविवे
वोन्मत्तेवभूतोपहतेवव्यलपं। उपर्युपरिनिपतितजलधारानिकरप्लुतेनविलीयमानेनाजलाकारेणेवात्मीक्रियमाणाप्रलापाक्ष
रैरपि दशनशिखानुगततया साभ्रपारैरिवनिष्पतद्भिः शिरोरुहैरप्यविरलविगलत्कुसुमतया शुक्रबाष्पजलबिंदुभिरिवा
मरणैरपिप्रस्खलितविमलमणिकिरणाश्रुतया प्ररुदितैरिवोपेता लग्नजीवितेनापि चात्ममरणाय स्पृहयंती मृतस्यापि स्ववाति
नाहस्त्यं प्रवेष्टुमिच्छंती करतलेन कपोलयोराश्मानं चंदनम्चेतजलजन्मलेचलनोत्थितसरसविसयोश्चांसयोर्मल
यजरसलवलुलितकमलिनीपलाशावगुंठितेवहृदये परामृशंती पुंडरीकनिष्ठुरोस्येवमप्यात्मनिगणयसिमामितिउपालभ
मानामुहुर्मुहुरेनमन्वनयं मुहुः पर्यचुंबं मुहुः कंठे गृहीत्वा व्याक्रोशं आः पापे त्वमापि मत्प्रसादागमनकालं यावदस्यासवोरक्षितानादु
तितामेकावलीमगर्दयं अयि भगवन्प्रसीद प्रत्युज्जीवयैनमिति मुहुर्मुहुः कपिंजलस्य पादयोरपतं मुहुः तरलिकां कंठे गृहीत्वाप्र
रुदं। अद्यापि चिंतयंती न जानामि तस्मिन्काले कुतस्तान्यचिंतितानि अशिक्षितानि करुणवाल्पिनु पदस्थानि मे रुतपुण्यायाः कृपणा

निवाडुसहस्राणिबभूवुरभवन्‌कुतस्तेसंलापाःकुतस्तान्यतिकरुणानिवैक्लव्यरुदितान्यन्यएवसप्रकारःप्रलयोर्मयद्भवोदतिषल्लंतर्बाष्प
वेगानांजलयंत्राणीवामुच्यंताश्रुप्रवाहाणांप्रयोहाइवनिरगछन्प्रलापानांगिरव्यप्रतानीवावर्द्धंतदुःखानांप्रसूतयइवोदपादंतमूर्छाना
मिसंवमालरचितमावेदयंत्याएवतस्याःसमतिक्रांतंकथमप्यतिकष्टमवस्थांतरमनुभवंत्याइवचेतनांजहारमूर्छा।वेगाक्षिप्ततंतीचतां
शिलातलेससंभ्रमंप्रसारितकरःपरिजनइवजातपीडस्वंह्यपीडोविधृतवान्‌अश्रुजलार्द्रीएणचतदीयेनैवोत्तरीयवल्कलप्रांतेनशनै
ःशनैर्वीजयन्संज्ञांग्राहितवान्‌उपजातकारुण्यश्चबाष्पसलिलोत्पीडनेनप्रक्षाल्यमानकपोलयुगलोलब्धचेतनामवादीत्‌भगवति
मयापापेनभवत्यापुनरभिनवतामुपनीतःशोकोयेनेदंशीघ्रमुपनीतासितदलमनयाकथयासंक्षिप्यतामियमहमसमर्थःश्रोतुम
तिक्रांतान्यपिहिसंकीर्त्यमानानिप्रियजनविश्वासवचनान्यनुभवसमयवेदनामुपजनयंतिसुहृज्जनस्यदुःखानितन्नार्हसिकथंक
थमपिविधृतानिमानस्पृशुनःपुनःस्मरणशोकानलेंधनतामुपनेतुमित्येवमुक्तादीर्घमुष्णंचनिःश्वस्यबाष्पायमानलोचनासामिदं

मवादीत्ःराजपुत्रयावदस्यामतिनिष्ठुरायांहतनिशायाममीभिरतिनृशंसैरसुभिर्नपरित्यक्तातेमामिदानींपरित्यजंतीतिहृदयेतंन्नमसृ
एषापृष्टायाःपापायाममभगवानंतकोपिपरिहरतिदर्शनंकुलस्यमेकठिनहृदयायाःशोकःसर्वमिदमलीकमस्यशठहृदयस्यसर्वथा
हमनेनसत्कृत्रपेणनिरपत्रपाणामग्रेसरीकृतायथाचाविकृतमनयाधजन्मस्येवेदमनुभूतंतस्याःकागणनाकष्टतंमतिकिंवाप
रमतःकष्टतरमाख्येयमन्यद्भविष्यतियन्नशक्यतेमोक्तुमाख्यातुंवाकेवलमस्यवज्रपातस्यानंतरमाश्चर्यंयदनन्तरहृदयेस्यामा
[redacted]लनश्चप्राणधारणकारणमलवइवाव्यक्तोयःसमुत्पन्नस्तंचकथयामिप्रियानुरागागतस्मिकथागृहीताहमिदमुपरतकल्पं
परकीयमिवनारचितमप्रयोजनमकृतज्ञंचहतशरीरंवहामितदलंश्रूयतां·ततस्थितपाचतेनक्लिन्नवस्यांतरेमरलोकनिष्क्र
यातस्तस्ककुविलयतरलिकामुवं·अपिउक्तिकनिष्ठुरहृदयेकियश्चादिविकारानाहस्सविरचयविंतामनुसरणमिजीवितेश्चरमि
त्स्गांतरेऽगगिरिचंद्रमंडलविनिर्गतोगगनादवतीर्यकेयूरकोटिलग्नममृतफेनपांडुरंपवनतरलमंशुकोत्तरीयमाकर्षन्नुन्नयकर्णा

शिवः

रालितकुंडलमणिप्रभानुरक्तगंडस्थलःस्खलन्मुक्ताफलतयातारागणमिववर्षयंतमतिलावंरसारमुरस्साद्धावनोधवलदुकूलपल्लवक
ल्पितोत्तरीयं धिरलिकुलनीलकुटिलकुंतलजालिकरविकटमौलिरलकुसुमकुसुमकर्णपूरःकामिनीकुचकुंकुमपंकलताल्लांछितांसदे
शःकुमुदधवलदेहोमहाप्राणमुरूव्योमरथपुरस्पलक्षणोपेतोदिव्याकृतिःस्वच्छबाष्पधवलेनरेणुप्रभाविताननेनक्षालयन्निवदिगं
तरमामोदिनाचशरीरतःस्फुरताशिशिरेणशीतज्वरमिवजनयताऽनवरतशीकरवर्षेणतुषारपटलेनानुलिंपन्निवगोशीर्षचंदन
रसछटाभिरिवाभिसिंचन्नैरावतकरपीवराभ्यांबाहुभ्यांमृणालधवलांगुलिभ्यामतिशीतलस्पर्शाभ्यांतमुपरतमुत्क्षिपन्नुदुभि
नादगंभीरेणस्वरेणवत्सेमहाश्वेतेनपरित्याज्यास्त्वयाप्राणाःपुनरपितवानेनसहभविष्यतिसमागमइत्यभिधायसहैवाने
नगगनतलमुदपतत्‌अहंतुतेनव्यतिकरेणसभयासविस्मयासकौतुकाचोन्मुखीकिमिदमितिकपिंजलमपृच्छंअसौतु
ससंभ्रममदत्त्वैवोत्तरमुदतिष्ठत्‌दुरात्मन्क्वमेवयस्यमपहृत्यगच्छसीत्यभिधायोन्मुखःसंजातकोपोवबद्धवेगमुत्तरीयव

त्कलेनपरिकरमुत्पलसतमेवानुसन्नंतविहायमुद्गात्:पश्यंत्याएवचमेसर्वएवतारागणमध्यमविशत्:ममतुतेनद्वितीयेनेवप्रियतम
मरणेनकपिंजलगमनेनद्विगुणीकृतशोकायाःसुतरामदीर्यतहृदयं·किंकर्त्तव्यताविमूढाचतरलिकामब्रुवं·अयिनजानासिकिमेतदि
ति·सातुतदवलोक्यस्त्रीस्वभावकातरास्मिन्क्षणेशोकाभिभाविनाम्येनाभिज्ञलापमानांगयष्टिर्ममरणशंकयाचवराकीविपल
पस्यासकरुणमवादीत्:भर्त्तृदारिकेनजानामिपापकारिणीकिंतुमहदिदमाश्चर्यममानुषाकृतिरेवपुरुषसमाश्वासिताचाने
नगच्छतासानुकंपंपितेवभर्त्तृदारिकाप्रायेणचैवंविधादिव्याःस्वप्नेप्यसंवादिन्योभवंत्याकृतयः:किमुतसाक्षान्नचात्मनापिवि
चारयंतीकारणमस्यमिथ्याभिधानेपश्यामिअतोयुक्तंविचार्यात्मानमस्मात्प्राणपरित्यागव्यवसायान्निवर्त्तयितुमतिमह
त्खल्विदमाश्वासस्थानमस्यामवस्थायामपिचतमनुसरतागतएवकपिंजलस्तस्माच्चकुतोयंकोवायंकिमर्थंचानेनायमप
गतापुरुषस्त्विप्यनीतःक्ववानीतःकस्माच्चासंभावनीयेनामुनापुनःसमागमाशाप्रदानेनभर्त्तृदारिकासमाश्वासितेतिसर्व

मुपलभ्यजीवितंवामरणंवासमाचरिष्यसिअतुर्लभंहिमरणमध्यवसितंपश्चादप्येतद्विप्रलिप्तंचजीवनंकपिंजलोऽप्यर्त्तहारिकामहक्षस्यास्य
तितेनतत्समागमनकालावधयोपितावञ्चयिंताममप्राणाःसन्निधानापादयोर्मेन्यपतत्अहंतुसकललोकदुर्लभ्यनयाजीवितलृष्णया
क्षुद्रतयाचस्त्रीस्वभावस्यतयाचतद्वचनोपनीतयादुराशयाकपिंजलप्रत्यागमनकांक्षयातस्मिन्कालेनदैवमुक्तंमन्यमानानोत्स्रष्टव
तीजीवितमाशयाहिकिमिवनक्रियतेतांचपापकारिणींकालरात्रिमिवप्रतिमांवर्षसहस्रायमाणांयातनामयीमिवदुःखमयीमिवनरक
मयीमिवाग्निमयीमिवोत्सन्ननिद्रातथैवक्षितितलेविचेष्टमानारेणुकणधूसरैःस्फुजलार्द्रकपोलसंदानितैर्विमुक्तव्याकुलैःशिरोरुहै
रुपरुद्धमुखीनिर्दयाक्रंदजर्जरस्वरक्षयक्षामेणकंठेनतस्मिन्नेवसरस्तीरेतरलिकाद्वितीयाक्षपांक्षपितवती।प्रत्युषसितुतस्मि
न्नेवसरसिस्नात्वाकृतनिश्चयातत्प्रीत्यातमेवकमंडलुमादायतान्येवचवल्कलानितामेवाक्षमालांगृहीत्वाबुध्वानिःसारतांसंसारस्यज्ञा
त्वाचमंदपुण्यतामात्मनोनिरूप्यचाप्रतीकारदारुणतांव्यसनोपनिपातानामाकलय्यदुर्निवारतांशोकस्यदृष्ट्वाचनिष्ठुरतांदैवस्याचिंतयि

स्याचातिबहुलदुःखतांस्नेहस्यनाथयित्वाचानित्यतांसर्वभावानामवधार्यचाकांडभंगुरतांसर्वसुखानामविगणय्यतातेनमृतांचपरिचितमप्यसहपारि
ञेननमनसासकलबंधुवर्गंनिवर्त्यविषयसुखेभ्योमनःसंयम्येंद्रियाणिगृहीतब्रह्मचर्यादेवंत्रैलोक्यनाथमनाथशरणमभिमंशरणार्थिनीस्था
णुमाश्रिता। अपरेद्युःकुतोपिसमुपलब्धवृत्तांतस्तातःसहांबयासहबंधुवर्गेणागत्यसुचिरंकृताक्रंदस्तैस्तैरुपायैरभ्यर्थनाभिश्चबहुनिरू
पदेशैश्चानेकप्रकारैःपरिसांत्वनैश्चनानाविधैर्गृहागमनायमेमहांतंयत्नमकरोत्।यदाचनेयमस्मादभिनिवेशात्कथंचिदपिशक्यतेव्या
वर्त्तयितुमितिनिश्चयमधिगतवांस्तदानिराशोपिदुस्त्यजतयादुहितृस्नेहस्यपुनःपुनर्ममाभि स्तज्यमानोपिबहून्दिवसान्स्थित्वास
शोकएवांतर्दह्यमानहृदयोगृहानयासीत्।गतेचतातेततःप्रभृतितस्यजनस्याश्रुमोक्षमात्रेणकिलकृतज्ञतांदर्शयंतीनदनुराग
कृशमिदमपुण्यबहुलमस्तमितलज्जममंगलभूतमनेकक्लेशायाससहस्रनिवासंदग्धशरीरकंबहुविधैर्नियमशतैःशोषयंतीवन्यैश्चफलमूल
वारिभिर्वर्त्तमानाजपव्याजेनतद्गुणगणानिवगणयंतीत्रिसंध्यमत्रसरसिस्नानमुपस्पृशंतीप्रतिदिनमर्चयंतीदेवंत्र्यंबकमस्यामेवगुहायांत

रलिकयासह दीर्घशोकमनुभवंती न्यवसं। साहमेवंविधा पापकारिणी निर्लक्षणा निर्लज्जा क्रूरा च निःस्नेहा च नृशंसा च गर्हणीया निःप्रयोजनोत्पन्ना
निःफलजीविता निरवलंबना रु निःसुखा च किं मया दृष्टया पृष्टया वा कृतआलपनमधमया पापया पातकया करोति महाभाग इत्युक्त्वा पांडुना वल्कलो-
पांतेन शशिनमिव शरदभ्रघनशकलेनाच्छाद्य वदनं दुर्निवारबाष्पवेगमपारयंती निवारयंती निवारयितुं मुक्तकंठमतिचिरमुच्चैः प्ररोदी-
त्। चंद्रापीडस्तु प्रथममेव तस्या रूपेण विनयेन दाक्षिण्येन मधुरालापतया निःसंगतया चातितपस्वितया च प्रशांतत्वेन च निरभिमानतया
महानुभावत्वेन शुचितया चोपारूढगौरवोऽभवत्। तस्यां नीतु तेनापरेण दर्शितसद्भावेन स्ववृत्तांतकथनेन तया च कृतज्ञतया हृतहृदयः
सुतरामारोपितप्रीतिरासीत्। आर्द्रीकृतहृदयश्च शनैः शनैरेनाममाभाषत। भगवति क्लेशभीरुः कृतघ्नः सुखासंगलुब्धो लोकः स्नेहसदृशं
कर्मानुष्ठातुमशक्तो निष्फलेनाश्रुपातमात्रेण स्नेहमुपदर्शयन्रोदिति। त्वया तु कर्मणैव सर्वमाचरंत्या किमिव न प्रेमोचितमाचेष्टितं येन
रोदिषि। तदर्थमाजन्मनः प्रभृति समुपचितपरिचयः प्रपानसंस्तुत इव परित्यक्तो बांधवजनः सन्निहिता अपि तृणवदवधीरिता विषया

विमुक्तान्यविशयेनस्तुनासीरसमऋद्धीन्यैश्वर्यसुखानि मृणालिनीवानितनीयस्यपि नितरां तनिमानमनुदिनैः संक्लेशैरुपनीतानन्तुगृहीतं
ब्रह्मचर्यमायोजितस्तपसि महत्यात्मा वनितोजनदुष्करमंगीकृतमरण्यावस्थानमपि चानाथासेनैवात्मा दुःखाभिहतैः परित्यज्यते न महीयसा तु
यत्नेन गरीयसि क्लेशे निक्षिप्यते केवलं यदेतदनुमरणं नाम तदतिनिष्फलमविद्वज्जनाचरित एष मार्गो मोहविलसितमेतदज्ञानपद्धतिरियं
रभसाचरितमिदं क्षुद्रदृष्टिरेषा तिप्रमादोयं मौर्ख्यस्खलितमिदं यदुपरते पितरि भ्रातरि सुहृदि भर्तरि वा प्राणाः परित्यज्यंते स्वयं चे
न्नजहति न परित्याज्याः। अत्र हि विचार्यमाणे च स्वार्थ एव प्राणपरित्यागोयमसह्यवेदनाप्रतीकारत्वादात्मन उपरतस्य न कमपि
गुणमावहति न तावत्तस्यायं प्रत्युज्जीवनोपायो न धर्मोपचयकारणं न शुभलोकोपार्जनहेतुर्न निरयपातप्रतीकारो न दर्शनोपा
यो न परस्परसमागमनिमित्तं नकन्यामेव स्वकर्मफलपरिपाकोपचितामसाववशो नीयते कर्मभूमिमसावप्यात्मघातिनः केवल
मेनसा संयुज्यते जीवंस्तु जलांजलिदानादिना बहूपकरोत्युपरतस्यात्मनश्च मृतस्तु नोभयस्यापि स्मर तावत्प्रियामेकपत्नीं रतिं भगव

भगवतिभर्त्तरिमकरकेतौसकलाबलाजनहृदयहारिणिहरकृतनुबन्धेप्यविरहितामसुभिःपृथांचवार्ष्णेयींशूरसेनसुतामभिरूपेसावज्ञ
विजितसकलराजकमौलिकुसुमवासिताशेषपादपीठेपत्यावखिलभुवनबलिनागसुजिपांडौकिंदममुनिशापानलेंधनतामुपागतेप्य
परित्यक्तजीवितामुत्तरांचविराटदुहितरंबालांबालमृणालिनीवनयनानंदलेखांविनयवतिविक्रांतेचपंचत्वमभिमन्यावागतेपि
धनदेहांदुःशलांचधृतराष्ट्रदुहितरंभ्रातृशतोत्संगलालितामतिमनोहरेहरवरप्रदानवर्द्धितमहिम्निसिंधुराजेजयद्रथेऽर्जुनेनलो
कांतरमुपनीतेप्यकृतप्राणपरित्यागामन्याश्चरक्षःसुरासुरमुनिमनुजसिद्धगंधर्वकन्यकाभर्तृरहिताःसहस्रशोविधृतजीविताः।
ततः प्रोक्तंचैतेनापिजीवितंसंदिग्धोप्यस्यसमागमोयदिस्यात्भगवत्यासौपुनःस्वयमेवसमागमसरस्वतीसमाकर्णिता।अत्रचैवकोविकल्प
:कथंचतादृशानामप्राकृतानांमहात्मनामवितथगिरांगरीयसापिकारणेनगिरिवैतथ्यमास्पदंकुर्यात्।उपरतेनचसहजीवसा
श्चित्रंदैवमाश्चर्यातिशयप्रयुक्ताश्चतपःसिद्धयोनेकविधाश्चकर्मणांशक्तयः।अपिच।सुनिपुणमपिविमृशद्भिःकिमिवान्यन्नसहर

लोकांतरगमनाशंसमेतज्जीवितप्रदानाद्नेन चासंभाव्यमिदमवगंतव्यं भगवत्या स्थिरप्रवृत्त एष पंथाः। तथाहि· विश्वावसुना गंधर्वराजेन मेन
कायामुत्पन्नां प्रमद्वरां नाम कन्यामाशीविषविलुप्तजीवितां स्थूलकेशाश्रमे मुनिकुमारको रुरुर्नाम स्वायुषोऽर्धेन योजितवान्· अर्जु
नं चाश्वमेधतुरगानुसारिणं आत्मजेन बभ्रुवाहनेन नाम्ना समरशिरसि शरापहृतप्राणमुलूपी नाम नागकन्यका संजीवनमकरो
त्· अभिमन्युतनयं च परीक्षितमश्वत्थामास्त्रपावकपरिप्लुष्टमुदरादुदरादेव निर्गतमुत्तराप्रलापोपजनितकृपो भगवा
न्वासुदेवो दुर्लभानसून्प्रापितवान्· उज्जयिन्यां च सांदीपनिद्विजतनयं मृतकपुरादपहृत्य त्रिभुवनवंदितचरणः स एवानी
तवान्· अत्रापि कथंचिदेवमेव भविष्यति तथापि किं क्रियते कथं वा लभ्यते प्रभवति हि भगवान्विधिर्बलवती च नियतिरालेख्य
यानशकामुच्छ्वसितुमप्यतिपिशुनानि चास्यैकांतनिष्ठुरस्य दैवहतकस्य विलसितानि न क्षमं ते दीर्घकालमव्याजरमणीयं प्रेम प्रा
येण च निसर्गत एवानायतनस्वभावभंगुराणि सुखान्यायतनप्रभवाणि च दुःखानि· तथाहि· कथमप्येकस्मिन्जन्मनि समागमो जन्मांत

रसहृत्प्राणेव विरतः प्राणिनामसौ नार्हस्यनिंद्यमात्मानं निंदितुमापतितं हि संसारपथमतिगहनमवतीर्णानामेते वृत्तांताः धीरा हि तरंत्या
पदमित्येवंविधैरन्यैश्च मधुरैरभिरूपवर्णनैः संस्थाप्य तां पुनरपि निर्झरजलेनांजलिपुटोपनीतेनानिच्छंतीमपि बलात्प्रक्षालितमुखीम
कारयत्‌ः अत्रांतरे च स्फुटतमहतमुखे तद्वृत्तांतोपजातशोक इव समुत्सृष्टदिवसव्यापारो रविरपि भगवानधोमुखतामयासीत्‌ः अथ पी
ते दिवसे परिणतप्रियंगुमंजरीरजोनिभे पिंजरिमरज्यमाने विलंबिबिंबमंडले विरलकुसुंभकुसुमरसरक्तदुकूलकोमलेन
बालातपेन विमुच्यमानेषु दिङ्मुखेषु चकोरनयनतारकाकांतिना च पिंगलिम्ना विलिप्यमाने तिरोहितनीलिम्नि व्योम्नि कोकिलविलो
चनच्छविभिः क्षणिवारुण्यतिसांध्ये भुवनमर्चिर्भिर्यथाप्रधानमुन्मिषत्सु यस्यामे भुवनमहिममलाभसवपुषि मुषिततारकापप
प्रथिम्नि कालिमानमानन्वति शार्वरे तमसि स्थितनु तिमिरसिरोहितरुचितनासु गहनतां पातीषु तरुराजिषु रजनिजललजालबिंदुजनि
तजडिम्नि बहलवनकुसुमपरिमलानुमितगमने चलितलताविटपगहने प्रवृत्ते च पवने निश्चलतिमितपक्षिणि त्रियामामुखे महाश्वेता

मंदमंदमुपसृत्य भगवतीमुपास्य पश्चिमां संध्यां कमंडलुजलेन प्रक्षालितचरणा वल्कलशयनीये सखेदमुत्तलं च निःश्वस्य निषसाद. चंद्रापी
डोप्युत्थाय सकुसुमं प्रस्रवणजलांजलिमवकीर्य कृतसंध्याप्रणामस्तस्मिन्द्वितीये शिलातले मृदुनिर्लतापल्लवैः शय्यामकल्पय
त्. उपविष्टश्च तस्यां पुनःपुनस्तमेव महाश्वेतावृत्तांतं मनसान्वभावयत्. आसीच्चास्य मनस्येवमनायमप्रतीकारदारुणो दुर्विषहवे
गः कष्टः कुसुमायुधाय दनेनाभिभूता महांतोप्येवमनपेक्षितकालक्रमाः समुत्सारितधैर्याः सद्यो जीवितं जहति. सर्वथा नमो भ
गवते त्रिभुवनाभ्यर्चितशासनाय मकरकेतनायेति पुनः पप्रच्छ चैनां. भगवति सा तव परिचारिका वनवासव्यसनमित्रं दुःख
सब्रह्मचारिणी तरलिका क्व गतेति. अथ सा कथयत्. महाभाग यन्मया कथितममृतसंभवमप्सरसां कुलं तस्मान्मदिरेति नाम्ना
मदिरा पतेक्षणा कन्यकाभवत्. तस्याश्चासौ सकलगंधर्वकुलमुकुटकुड्मलपीठप्रतिष्ठितचरणो देवश्चित्ररथः पाणिमग्रहीत्. अपरिमि
तगुणगणाकृष्टहृदयश्चान्यवनितादुर्लभेनाधःकृताशेषांतःपुरेण हेमपट्टबंधनेन छत्रचामरचिह्नेन महादेवीशब्देन परं प्रीतः प्रसा शिवः

इमकरोत्ः अन्योन्यप्रेमसंवर्धितपरयोश्च तयोर्यौवनसुखानि सेवमानयोः कालेनाश्चर्यभूतमेकजीवितमिवापि पित्रोरपत्यं सर्वस्यैव गंध
र्वकुलस्य जीवलोकस्य दुहितृरत्नमुत्पादि कादंबरी नाम्ना। सा च मे जन्मनः प्रभृत्येकासनशयनपानाशनवर्तिनापरमप्रेमस्थानमखिल
विश्रंभधाम द्वितीयमिव हृदयं बालमित्रमेकत्र तया मया च नृत्यगीतादिकलासु कृताः परिचयाः शिशुजनोचिताभिश्च क्री
डाभिरतियंत्रणानिर्भरमपनीतो बालभावः। सा चामुनैव मदीयेन हतवृत्तांतेन समुपजातशोका निश्चयमकार्षीत्ः नाहं कथं
चिदपि सशोकायां महाश्वेतायामात्मनः पाणिं ग्राहयिष्यामीति सखीजनस्य पुरतः सशपथमभिहितवती। यदि कथमपि मा
मनिच्छतीमपि बलात्तातः कदाचित्कस्मैचिद्दास्यति तदाहमनशनेन हुताशनेन वा रज्ज्वा वा विषेण वा नियतमात्मानमुत्स्रक्ष्यामी
ति। सर्वं च तदात्मदुहितुः कृतनिश्चयं निश्चलतया वितर्कपरंपरया परिजनसकाशात् गंधर्वराजश्चित्ररथः स्वयमश्रृणोत्ः गच्छ
ति काले समुपारूढनिर्भरयौवनामालोक्य सुतां बलवदुपतापपरवशः क्षणमपि न धृतिमलभत। एकापत्यतया चातिप्रियतया च न

शङ्कः किंचिदपिनामभिधातुमसमर्थं स्वात्मदुपायांतरमिदमत्रप्राप्तकालमितितनयामहाश्वेतयामदिरयासहावधार्य क्षीरोदनामानं
कंचुकिनंवत्सेमहाश्वेतेत्यतिरेकेणैवदग्धहृदयानामिदमपरमस्माकमुपस्थितमिदानींतुकादंबरीमनुनेतुंत्वंशरणमितिसंदिश्य
मत्समीपमद्यैवप्रे[redacted]सुमासिप्रेषितवान्ः ततोमयागुरुवचनगौरवेणसखीप्रेम्णाचक्षीरोदेनसार्धं तरलिकासखिकादंब
रिकिंदुःखितंजनमपिजनमतितरांदुःखयसिजीवंतीमिच्छसिचेन्मांनकुरुगुरुवचनमवितथमितिसंदिश्यविसर्जितानातिचि
रगतायांचतस्यामनंतरमेवमांत्वमिममनुप्राप्तोमहाभागइत्यभिधायतूष्णीमभवत्ः अत्रांतरेलांछनच्छलेनविडंबयन्निवशो
कानलदग्धमध्यंमहाश्वेताहृदयमुद्वहन्निवमुनिकुमारवधमहापातकंदर्शयन्निवचिरकालसंगतंदक्षशापानलदाहचिह्नमवि
रलजस्सौभाग्यरागधवलःकृत्तिमृगाजिनप्रावृतार्धवामस्तनइवांबिकायाधूर्जटिजटामंडलचूडामणिर्भगवानुद्गातारकाराजः
क्रमेणारोहतगगनमहापयोधिपुलिनेसकललोकनिद्रामंगलकलशःकुमुदबांधवोविघटितकुमुदवनधवलितदशदिशिसंहृते

श्वेतायमानेमानिनीमानभ्रंशेशशांकमंडलेशशिकरकलितासुअजजंतीषुकक्षिमानमोऽवीषुप्रभासुप्रस्नस्तुचकैलासशशिमणिशिलानांस
र्वतःस्रोतःस्राविपुलप्रस्रवणेषुमृणालकंदलिनिवावस्कंदपतितचंद्रकरइवविलुप्तकमलवनशोभेनासच्छोदसरःपयसिपवनवशा
त्समुपोढमोहनिद्रेचक्राघीयावीविविचलितवपुषिविरुवतिविरहिणिचक्रवाकचक्रवालेनिर्द्रतेचचंद्रोदयेविकुलेहर्षनयनजलक
णनीहारिणिवियद्विहारिणिमनोहारिणिविद्याधराभिसारिकाजनेचंद्रापीडःसुप्तामालोक्यमहाश्वेतांपल्लवशयनेशनैःश
नैःसमुपाविशत् ॥ अस्यांवेलायांकिन्नुखलुमामंतरेणचिंतयतिवैशंपायनःकिंवावराकीपत्रलेखाकिंवाराजपुत्रलोकइ
तिचिंतयन्नेवनिद्रांययौ ॥ अथक्षीणायांक्षपायामुषसिसंध्यामुपास्यशिलातलोपविष्टायांपवित्राघमर्षणेननिजपंत्यांमहा
श्वेतायांनिर्वर्त्तितप्राभातिकविधौचंद्रापीडेतरलिकाषोडशवर्षवयसासावयवेनाकृतिनामस्वेदालसगुरुणापदानिनिक्षि
पतापर्युषितचंदनांगरागधूसरेणस्तनद्वयेनकुंकुमरागपिंजररुचेणचामीकरस्थूलस्तबकलापनिविडनियमितकक्षाबंधाति

का॰पू॰

१२९ 129

दिक्प्रेंखत्पल्लवमधरवासएवकेवलंवसानेननिरूद्धरत्नयाविभक्तमध्येनविपुलवक्षसादीर्घबाहुनावामप्रकोष्ठदोलायमानमाणिक्यव
लयेनकर्णाभरणविप्रकीर्यमाणकिरणमधोमुखकिरणांश्वायुधजालवर्णांशुकोत्तरीयमिवैकस्कंधक्षिप्तमुद्वहताचूतपल्लवको
मलमनवरततांबूलकवलरागांधकारमधरंदधताकर्णांतायतस्यस्वभावधवलस्यधवलिम्नालोचनयुगलस्यधवलयतेव
दिगंतराणिकुमुदवनानीववर्षतापुंडरीकमयमिवसंकुर्वताकनकपट्टपृथुललाटेनालिकुलनीलसरलशिरसिजेना
ग्राम्याकृतिनाराजकुलसंपर्कचतुरेणगंधर्वदारकेणकेयूरकनाम्नानुगम्यमानाप्रसुप्तस्येवप्रादुरासीत्॥आगत्यचको
यमिसुपजातकुतूहलामहाश्वेतायाःसमीपमुपसृत्यकृतप्रणामासविनयमुपाविशत्॥अनंतरंचातिदूरानतेनोत्तमांगे
नप्रणम्यकेयूरकोपिमहाश्वेतादृष्टिनिर्दिष्टंसमीपवर्त्तिशिलातलंभेजे॥समुपविष्टश्चतमपर्वमधःकृतकुसुमायुधमुपहसि
तसुरासुरगंधर्वविद्याधररूपंरूपातिशयंचंद्रापीडस्यदृष्ट्वाचविस्मयमापेदे॥परिसमाप्तजपातुमहाश्वेतापप्रच्छतरलिकां॥किं

शिवः

१२९

तयाहष्टाप्रियसखीकादंबरीकुशलिनीकरिष्यतिवातस्माद्वचनमिति॰अथसातरलिकाविनयावनतमौलिरीषद्वलितैकर्णपाशमतिमधुर
यागिराव्याहार॰भर्तृदारिकेदृष्टाखलुमयाभर्तृदारिकाकादंबरीसर्वतःकुशलिनीविज्ञापिताचनिखिलंभर्तृदुहितुःसंदेशमाकर्ण्य
चयत्तयासंततमुक्तस्थूलाश्रुबिंदुवर्षमुद्दित्याप्रतिसंदिष्टंतदेषतयैवविसर्जितस्तस्याएववीणावादकःकेयूरकःकथयिष्यतीत्यु
क्त्वाविरराम॰विरतवचसितस्यांकेयूरकोऽब्रवीत्॰भर्तृदारिकेमन्मुखेनैतेदेवीकादंबरीदृढदत्तकंठग्रहात्वांविज्ञापयतियदियमाग
समागमवद्धत्तरलिकातत्कथयकिमयंगुरुजनानुरोधःकिमिदंमच्चित्तपरीक्षणंकिंगृहनिवासापराधनिपुणोपालंभःकिंमेमवि
च्छेदाभिलाषःकिंभक्तजनपरित्यागोपायःकिंवाप्रकोपःजानास्येवमेसहजप्रेमनिःस्यंदनिर्भरंहृदयमेवमपिनिष्ठुरंसंदिशंतीकथ
मसिनलज्जितातथामधुरताबालिकेनाशिक्षितावक्तुमप्रियंपरुषमभिधातुंस्वयोपितावत्काइवसहृदयःकनीयस्यवसानवि
रसेकर्मणीदृशेमतिमुपसर्पयेद्वाकिमुतानतिदुःखाभितप्तहृदयोऽस्मद्विधोजनःसुहृद्दुःखखेदितेहिमनसिकेवसुखाशाकेवानिर्वृत्तिः

कीदृशः संयोगः कानिवासितानियेनेदृशीं दशामुपनीता प्रियसखी कथमतिदारुणं तमहं विषमिवाप्रियकारिणं कामं सकामं कुर्यां । दिव
सकरास्तमनविधुरासु नलिनीषु सहवासपरिचयाच्चक्रवाकयुवतिरपि पतिसमागमसुखानि परित्यजति किमुत नार्यः । अपि च यत्रचक्र
र्त्ते विरहविधुरा परित्यक्तपरपुरुषादर्शनादिव दिवानिशं निवसति प्रियसखी कथमिव तन्मम हृदयमपरः प्रविशेदितरजनः । यत्र चक्र
र्त्ते विरहविधुरा नीव्रतकर्षितांगी प्रियसखी महत्कष्टमनुभवति तत्राहमवगण्यैन कथमात्मसुखार्थिनी पाणिग्रहविध्या
मि कथं वा सुखं जनयिष्यति त्वत्प्रेमणा चास्मिन्वस्तुनि कुमारिकाजनविरुद्धं स्वातंत्र्यमालंबांगीकृतमपयशः समवधीरितो विन
यो गुरुवचनमनुज्ञामितं न गणितो लोकापवादो वनिताजनस्य सहजमाभरणं मुक्ता च लज्जा सा कथय कथमिव पुन
स्तत्र प्रवर्त्तते तदयमंजलिरुपरचितः प्रणामोयमिदं च पादग्रहणमनुगृहाण मां वनमितो गतासि मे जीवितेन सहेति मा कथा
ः स्वप्नेपि पुनरिममर्थं मनसीत्यभिधाय तूष्णीमभूत् महाश्वेता तु तच्छ्रुत्वा सुचिरं विचार्य गच्छ स्वयमेवाहमागत्य यथार्हमाचरि

व्यामीलुक्त्वा केयूरकं प्राहिणोत्‌। गते च केयूरके चंद्रापीडमुवाच। राजपुत्र रमणीयो हेमकूटश्चित्रा च। चित्ररथराजधानी बहुकुतूहलः किंपु
रुषविषयः पेशलो गंधर्वलोकः सरलहृदया महानुभावा च कादंबरी यदि नातिखेदकरमिव गमनं कलयसि नावसीदति गुरुप्रयो
जनं मदृष्टचरविषयकुतूहलि वा चेतो मद्वचनमनुरुध्यते वा मद्वा नातिसुखदापि वा। आश्चर्यदर्शनमर्हसि वा प्रणयमिमम प्रसादस्थान
योग्यं वा जनं मन्यसे समारूढो वा परिचयलेशो। नु आलोचायं जनस्त्वनो नार्हसि निःफलां कर्त्तुमभ्यर्थनामिमां मम येव सहागत्याहे
मकूटमतिरमणीयतानिधानं तत्र दृष्ट्वा च मन्निर्विशेषां कादंबरीमपनीय तस्याः कुमतिमनो मोहविलासितमेकमहो विश्रम्य श्वो
भूते प्रत्यागमिष्यसि। मम हि तिनिःकारणबांधवं भवंतमालोक्य वदुःखांधकारजाराक्रांतेन महतः कालादुच्छ्वसितमिव चेतसा। अ
वधि त्वासद्वृत्तांतमिमं सह्यतामिवगतः शोको दुःखितमपि जनं रमयंति सज्जनसमागमाः। परसुखोपपादनपराधीनश्च भवादृशां
गुणोदयः रुक्मिवती च चंद्रापीडोऽब्रवीत्‌ भगवति दर्शनात्प्रभृति परवानयं जनः कर्त्तव्येषु यथेष्टमशंकितमयानियुज्यतामित्यभि

धायतयासदेवोद्चलतः क्रमेण च गत्वा हेमकूटमासाद्य गंधर्वराजकुलसमनीलकांचनतोरणानिसप्तकक्षांतराणि कन्यांतःपुरद्वारमवाप·
महाश्वेतादर्शनप्रधावितेन दूरादेव कृतप्रणामेन कनकवेत्रलताहस्तेन प्रतीहारजनेनोपदिश्यमानमार्गः प्रविश्यासंख्येयनारीजनसहस्र
संबाधं स्त्रीमयमपरमिव जीवलोकमियत्तां ग्रहीतुमेकत्र त्रैलोक्यकोशेणेव संहृतमपुरुषमिव सर्गांतरमंगनाद्वीपमिवापूर्वमनुसल्लं
पंचममिव नारीयुगावतारमपरमिव पुरुषद्वेषिप्रजापतिनिर्माणमनेककल्पकल्पनार्थमुत्साद्य स्थापितमिवांगनाकोशमतिविला
रिणाधुवनिजनलावण्यप्रभापूरेणाप्लाविन दिगंतरेण सिंचतेवामृतरसविस्तारेण दिवसमार्द्रीकुर्वतेव भुवनांतराले बहलप्रभा
वर्षिणा मरकतमणिमयेन सर्वतः परिगतनतपा तेजोमयमिव चंद्रमंडलसहस्रैर्निर्मितसंस्थानं ज्योत्स्नयेव घटितसन्निवेशमाग
रणप्रभाभिरिव निष्पादितदिगंतरं विभ्रमैरिव कृतसर्वोपकरणं यौवनविलासैरिवोत्पादितावयवं रतिविलसितैरिव विरचि
तसंचयं मन्मथचरितैरिव कल्पितावकाशमनुरागेणेवानुलिप्तसकलजनप्रवेशं शृंगारमयमिव सौंदर्यमयमिव सुरताधिदैवतमय

मिवकुसुमशरास्मयमिवकुतूहलमयमिवाऽऽश्चर्यनिवसौकुमार्यमयमिवकुमारःकुमारीपुराभ्यंतरंददर्श॰ अतिबहुलतयाचतस्यकन्यका
जनस्यसमंतादाननद्युतिभिरिंदुबिंबसहस्रमिवपतंतीमपांगविक्षेपैःस्खलितकुवलयवनमयीमिवक्रियमाणमवनीमनिभृतभ्रूलताबि
भ्रमैःकामकार्मुकबलानीवप्रचलितानिशिरसिजकलापांधकारैर्बहुलपक्षप्रदोषसार्थानिवसंभवतःस्मितप्रभाभिःकुमुदकुसु
मधवलानिववसंतदिवसान्संचरतःश्वसितानिलपरिमलैर्मलयमारुतानिवपरिभ्रमतःकपोलमंडलालोकैर्माणिक्यदर्प
णसहस्राणीवस्फुरितानिकरतलरागेणरक्तकमलवनवर्षिणमिवजीवलोकंकररुहकिरणस्फुरणेनकुसुममधुधारासह
स्रैरिवसंछादितदिगंतराण्याभरणकिरणेंद्रायुधजालकैरुड्डीयमानानीवभुवनमयूरवृंदानियौवनविकारैःश्लाघमानानी
वमन्मथसहस्राण्यध्यासीनःउचितव्यापारव्यपदेशेनकुमारिकाणांसखीहस्तावलंबेषुपाणिग्रहणानिवेणुवाद्येषुचुंबनवानिक
राञ्चीगुणेषुकररुहव्यापारान्कंदुकक्रीडासुकरतलप्रहारान्भवनलतालसेककलशकंठेषुभुजलतापरिष्वंगान्लीलादोलासुनि

तंबस्तनप्रेंखितानितांबूलवीटिकाखंडनेषुदशनोपचाराबकुलविटपेषुमधुगंडूषप्रचाराअशोकताडनेषुचरणाभिघातानुप्रहार
कुसुमस्खलनेषुसीत्कारानतिरिक्तंनूपुररणितमिवाभ्यस्यंतीनामपरमतः।यत्रचकन्यकाजनस्यकपोलतलालोकएवमुखप्रक्षालनं
लोचनान्येवकर्णोत्पलानिहरितच्छवयएवांगरागरागाःनिश्वासाएवाधिवासगंधयुक्तयोऽधरद्युतिरेवकुंकुमसुखानुलेप
नमालापाएवतंत्रीनिनदाःभुजलताएवचंपकमालाःकरतलान्येवलीलाकमलानिस्तनाएवदर्पणाःनिजदेहप्रभैवांशु
कावगुंठनंजघनस्थलान्येवविलासमणिशिलातलानिकोमलांगुलिरागएवचरणालक्तकरसोनखमणिमरीचयएवकु
ट्टिमोपहारकुसुमप्रकाराः।यत्रालक्तकरसोऽपिचरणातिभारोबकुलमालिकामेखलाकलनमपिगमनविघ्नकरं
गरागगौरवमप्यधिकश्वासनिमित्तमंशुकभारोऽपिम्लानिकारणंमंगलप्रतिसरवलयाविधृतिरपिकरतलविधुति
हेतुरवतंसकुसुमधारणमपिश्रमःकर्णपूरकमलतरलमधुकपक्षपवनोऽप्यायासकरः।तथाचयत्रसखीदर्शनेषुकृतप्र

स्वावलंबनमुत्थानमतिसाहसंप्रसाधनेषुहारजारसहिष्णुतास्तनकार्कश्यमाव:कुसुमावचयेषुद्वितीयकुसुमग्रहणमप्यसुवतिजनोचितंक
न्यकाविज्ञानेषुमाल्यग्रथनमसुकुमारजनव्यापारोदेवताप्रणामेषुमध्यभागभंगोनातिविस्मयकरः।तस्यैवंविधस्यकिंचिदप्यंत
रमतिक्रम्यतस्यैवतस्यपरिच्छिन्नमतःकादंबरीप्रत्यासन्नस्यपरिजनस्यशुश्रावतांस्तानतिमनोहरानालापान्।तथाहि।लवलिके
कल्पयकेतकीधूलीभिर्नवलीलतालवालमंडलानिसागरिकेगंधोदककनकदीर्घिकासुविकिररत्नवालुकांमृणालिके
कृत्रिमकमलिनीषुकुंकुमरेणुमुष्टिभिःस्नपयचक्रवाकमिथुनानिमकरिकेकर्पूरपल्लवरसेनाधिवासयगंधपात्राणिरज
निकेतमालवीथिकांधकारेषुनिधेहिमणिप्रदीपान्कुमुदिकेस्थगयशकुनिकुलरक्षणायमुक्ताजालकैर्दाडिमीफलानि।
निपुणिकेखलयमणिशालभंजिकास्तनेषुकुंकुमरसपत्रभंगानुत्पलिकेपर्यन्तभाकनकसंमार्जनीभिःकदलीगृहमरक
तवेदिकांकेसरिकेसिंचमदिरारसेनबकुलकुसुममालागृहाणिमालतिकेपालयसिंदूररेणुनाकामदेवगृहदंतवल

भिकांनालिनिकेपाययकमलमधुररसंभवनकलहंसान्‌:कदलिकेनयधारागृहशिखरंमयूरान्‌:कमलिकेप्रयच्छचक्रवाकशावके
भ्योमृणालक्षीररसं·चूतलतिकेदेहिपंजरपुंस्कोलिभ्यश्चूतकलिकांकुरान्‌पल्लविकेभोजयमरिचायपल्लवदलानिभवन
हरीतान्‌लवंगिकेविक्षिपचकोरपंजरेषुपिप्पलीदलशकलानिमधुरिकेविरचयकुसुमाञ्जरणकानिमयूरिकेसंगीत
शालायांविसर्ज्जयकिन्नरमिथुनानिकदलिकेसमारोपयक्रीडापर्वतशिखरंजीवंजीवमिथुनानिहरिणिकेदेहिपंजर
शुकसारिकोपदेशमित्येतानिचान्यानिचपरिहासजल्पितेनाभिशोषीत्वं:तथाहिचामरिकेमिथ्याप्रसुप्ततांकथयंतीक
माभिसंधातुमिच्छसि·जयियौवनविलासैरुन्मत्तीकृतेनविज्ञानासिमात्वंस्तनकलशभारावनाम्यमानमूर्तिर्मणिस्तंभ
मयूराननवलंबसेपरिहासकांक्षिणिरत्नभित्तिपतितमात्मप्रतिबिंबमालपसिपवनहृतोत्तरीयांशुकेहारप्रभामाया
सितकरतलासंकलयसिमणिकुट्टिमेषुपद्मरागकमलस्खलननीतेनिजमुखबिंबकानिपरिहरसिजालवातायनपतित

पद्मरागालोकंप्रतिबालातपशंकयाकरतलमातपत्रीकरोषिरवेदस्रस्तहस्तमालितचामरानरवमणिमयूखकलापमाधुनोमीत्ये
तानिचान्यानिचपश्यन्नेवकादंबरीभवनमुपययौ:पुलिनायमानमुपवनलतागलितकुसुमरेणुपटलैर्दुर्दिनायमानमनिभिन्नपरभृत
परभृतनखक्षतांगणसहकारफलरसवर्षैर्नीहारायमाणमनिलविप्रकीर्णैर्बकुलसेकसीधुधाराधूलीभिःकांचनद्वीपायमानं
चंपकोपहारैर्लीलाशोकवनायमानंकुसुमप्रकरपतितमधुकरस्पृष्टांधकारैस्तथाचसंचरतःस्त्रीजनस्यरागसागरायमाणंचर
णालक्तकरसविसरैरमतोपत्तिदिवसायमानमंगरागामोदैश्चंद्रलोकायमानंदंतपत्रमंडलैःप्रियंगुलतायमानंकृष्णागुरु
पत्रभंगैर्लोहितायमानंकर्णाशोकपल्लवैर्धवलायमानंचंदनरसविलेपनैर्हरितायमानंशिरीषपुष्पाभरणैरुपसेवार्थमाग
तेनानयतऊर्ध्वस्थितेनस्त्रीजनेनप्राकारेणेवलावण्यमयेनकृतदीर्घरथ्यामुखाकारंमार्गमभजासीत्:तेनचांतर्निपतंतमाभर
णकिरणालोकंसंपीडितंनदीवेणिकाजलप्रवाहमिववहंतमपश्यत्:तन्मध्येनचगत्वाप्रतिस्रोतइवप्रतीहारमंडलाधिष्ठितपुरोभागं

135

श्रीमंडपंददर्श॰तत्रचमध्यभागेपर्यंतरचितमंडलोपविष्टेनचानेकसहस्रसंख्येनकन्यकाजनेनपरिवृतांनीलांशुकप्रछदपटप्रा
वृतस्यमहतःपर्यंकस्याश्रयेधवलोपधानन्यस्तबाहुलतावष्टंभेनावस्थितांमहावराहदंष्ट्रावलंबिनीमिवमहींविस्तारिणा
देहप्रभाजालजलेनानुजलनाविक्षेपपरिश्रमैःप्लवमानाभिरिवचामरग्राहिणीभिरुपवीज्यमानांनियनिलप्रतिबिंबनयाधस्तान्म
णिकुट्टिमेषुनागैरिवापह्रियमाणांभुपालेचरत्नभित्तिकुड्डिकापालैरिवनीयमानामुपरिस्फटिकमंडपेष्वमरैरिवोत्क्षिप्यमाणांहृद
यमिवप्रवेशितांमकरमालिस्तंभैरापीतामिवनवनदर्पणैरधोमुखेनश्रीमंडपेमध्योत्कीर्णेनविद्याधरलोकेनगगनतल
मिवारोप्यमाणांचित्रकर्मच्छलेनावलोकनकुतूहलसंपुंजितेनत्रिभुवनेनेवपरिवृतांभ्रमणरवमत्तनाशिखिशतवित
तचित्रचंद्रकेणनवनेनाधिकौतुकोत्पादितलोचनसहस्रेणेवदृश्यमानामात्मपरिजनेनापिदर्शनलोभादुपार्जितदिव्य
चक्षुषेवानिमिषनयनेननिर्वर्ण्यमानांलक्षणैरपिरागाविष्टैरिवाधिष्ठितसर्वांगामकृतपुण्यमिवमुंचंतींबालभावमस्पृष्टा

मपिमन्मथावेशपरिवशेनेवारक्ष्यमाणांयौवनेनापिचलितचरणरागदीधितिभिरिवनिर्गताभिरलक्तकरसपाटलितलावण्यजल
वेणिकाभिरिवगलिताभिर्निर्वासितरक्तांशुकदशाशिखाभिरिवावलंबिताभिःपादाभरणरत्नांशुलेखासंदेशदायिनीभिरतिको
मलतयानखविवरेणवमंतीभिरिवारुधिरधारावर्षमंगुलिभिरुपेताभ्यांक्षितितलतारागणमिवनखमणिमंडलमुद्वहंत्या
विद्रुमरसनदीभिरिवचरणाभ्यांप्रवर्षंतीनूपुरमणिकिरणचक्रवालेनगुरुनितंबभरखिन्नोरुयुगलसाहाय्यमिवकर्तु
मुद्यतास्पृश्यमानजघनभागांप्रजापतिकरद्वयनिःपीडितमध्यभागगलितंजघनशिलातलप्रतिघाताल्लावण्यजल
स्त्रोतइवद्विधागतमूरुद्वयंदधानासर्वतःप्रसारितदीर्घमयूखमंडलेनेर्ष्यायापरपुरुषदर्शनमिवरुंधताकुवलयेनावि
स्तारमिवलम्बनतास्पर्शसुखेनरोमांचमिवकुंचताकांचीदाम्नानितंबबिंबस्यविरचितपरिवेषांनिपतितसकललोकहृद
यज्वरेणेवातिगुरुनितंबांसमुन्नतकुचांतरितमुखदर्शनदुःखेनेवक्षीयमाणमध्यभागांप्रजापतेःस्पृशतःसौकुमार्यादंगुलिमु

ध्रामिवनिम्नगांनाभिमंडलीमावर्त्तिनीमुद्वहंतीत्रिभुवनविजयप्रशस्तिवर्णावलीमिवलिखितांमन्मथेनरोमराजिमंजरींबिभ्राण
मंतःप्रविष्टकर्णपल्लवप्रतिबिंबेनज्वरद्विद्यमानहृदयकरतलप्रेर्यमाणेनेवनिष्पततामकरकेतुपादपीठेनस्तनतटेनाभ्य
र्चितामधोमुखकर्णाभरणमयूखाभ्यामिवप्रसृताभ्याममललावण्यजलमृणालकांडाभ्यांबाहुभ्यांनखकिरणविसरवर्षि
णाचमाणिक्यवलयगौरवश्रमवशात्स्वेदजलधाराजालकमिवमुंचताकरयुगलेनसमुल्लासितांस्तननाराचनम्यमान
माननमिवोन्नमयताधरेणोच्चैःकृतेर्ष्यहीनचिबुकदेशामभिनवयौवनपवनक्षोभितस्यरागसागरस्यतरंगाभ्यामिवोन्नताभ्यां
विद्रुमलतालोहिताभ्यामधराभ्यांरक्तावदातस्वच्छकांतिनाचमदिरारसपूर्णमाणिक्यशुक्तिसंपुटच्छविनाकपोलयुग
लेनरतिपरिवादिनीरत्नकोणचारुणानासावंशेनचविराजमानांगतिप्रसररोधिश्रवणकोपादिवकिंचिदारक्तापां
गेननिजमुखलक्ष्मीनिवासदुग्धोदधिनालोचनयुगलेनलोचनमयमिवजीवलोकंकुर्वद्भुद्धतामुन्मदयौवनकुंजरमद

राजिभ्यांमलताभ्यांमनःशिलापंककल्पितेनचरागाविष्टेनमन्मथहृदयेनेववदनलग्नेनतिलकबिंदुनाविद्योतितललाटपट्टा
मुक्ताफलमताडीपद्मरागमयमालुककर्णोत्पलच्युतमधुधारासंदेहकारिणंकर्णपार्श्वदोलायमानपत्रमरकतमालिका
कुंडलंदधतीपाटलीकृतललाटेनसीमंतचुंबिनाचूडामणेःस्फुरतांशुजालेनमदिरारसेनेवप्रक्षाल्यमानदीर्घकेशकला
पांदेहार्द्धप्रविष्टहरगर्वितगौरीविजिगीषयेवसर्वांगानुप्रविष्टमन्मथदर्शितसौभाग्यविशेषामुरःसमारोपितैकलक्ष्मी
मुद्रितनारायणवक्षःपद्मरागमयप्रतिबिंबकैर्निजरूपतोलक्ष्मीशतानीवसृजंतीमुत्तमांगनिहितैकचंद्रविस्मितहराभिमान
नाशायविलासस्मितैश्चंद्रसहस्राणीवदिक्षुक्षिपंतीनिर्दयदग्धैकमन्मथप्रमथनाथरोषेणेवप्रतिहृदयंमन्मथयुतान्युत्स
र्जयंतीरजनिजागरखिन्नस्यपरिचितचक्रमिथुनस्यस्वप्नंक्रीडानदिकामुकमलधूलिवालुकाभिर्बालपुलिनानिकारयं
तीपरिजनकृतपुरस्वपस्थितंदुर्ल्लभंचहंसमिथुनंमृणालनिगडकेनबध्नानयेतिहंसपालीमादिशंतीमाजरणमयस्वर्णांकितलेह

रिणशावकायसखीश्रवणादपनीययवांकुरप्रसवंप्रयच्छंतीमालवर्द्धितलताकुसुमनिर्गमननिवेदनागतामुद्यानपालीमथोषा
भरणदानेनसंमानयंतीमुपनीतविविधवनकुसुमफलपूर्णपत्रपुटामविज्ञायमानात्मोपलस्याहासेहसंतींपुनःक्रीडापर्वतपत्र
शबरीमालपंतीकरतलविनिहितैर्मुकुलसन्निभैर्बहुगंधपरिमलांधैर्नीलकंठकैरिवमधुकरैःक्रीडंतीपंजरशारीतकरुद
श्रवणाकृततुष्टस्मितांचामरग्राहिणींविहस्यलीलाकमलेनशिरसिविघट्टयंतींमुक्ताफलखचितचंद्रलेखिकासंक्रांतप्र
तिमांस्वेदजलबिंदुजालचितनखपदाभिप्रायेणतांकुलकरंकवाहिनीपयोधरेपटवासमुष्टिनाताडयंतीरत्नकुंडलप्रति
बिंबसांद्रदत्तनवनखपदमंडलाशंकयाचामरग्राहिणींविहस्यकपोलेप्रसादव्याजदत्तेनात्मकर्णपूरपल्लवेनाच्छादयं
तीपृथिवीमिवसमुत्सारितमहाकुलकलत्रभूभृत्परिकरांशेषभोगेषुनिषण्णांमधुमाससखीमिवमघदपटकोपाकृष्यमाणकुसुमर
जोधसरपारस्फाणां~~मिमप~~मिवोल्लासितमानसजन्मपक्षिरवानीतनीलकंठमदांगौरीमिवश्वेतांशुकरचितोत्तमांगाभरणमुदधि

वनवेलालेखामिवमधुकरलीनतमालकाननामिंदुमूर्त्तिमिवोह्यमानमन्मथविलासगृहीतगुरुकलत्रां वनराजीमिवपांडुश्यामलवली
लतालंकृतमध्यांदिनमुखलक्ष्मीमिवआसन्नमुक्तांशुमिलत्पद्मरागप्रसाधनांमधुरावलीमिवनितंबचुंबितशिखंडभारविस्फुर
चंद्रकांतांकल्पतरुलतामिवकामफलप्रदांपुनःसमीपेसंमुखोपविष्टंकोसौकस्यवाऽपसंकिमभिधानोवाकीदृशंतस्यरू
पंकियद्वावयःकिमभिधत्तेनवताकिमभिहितंकियच्चिरंदृष्टस्यपाकपंचास्यमहाम्भेतयासहपरिचयउपजातःकिम
यमत्रागमिष्यतीतिमुहुर्मुहुश्चंद्रापीडसंबद्धमेवालापंतद्रूपवर्णनामुखरंकेयूरकंपृच्छंतीकादंबरीददर्श·तस्यचका
दंबरीवदनचंद्रलेखालक्ष्मीकस्यसागरस्येवामृतमुल्लसहृदयं·आसीच्चास्यमनसिशेषेपिद्रियाण्यपिमेवेधसाकिं
मितिलोचनमयान्येवनकृतानिकिंवानेनकृतमवदातंकर्मचक्षुषायदनिवारितमेनांपश्यत्यहोचित्रमेतदुत्पादितंवेध
सासर्वरमणीयानामेकंधामकुत्रएतेरूपातिशयपरमाणवःसमासादितास्तत्कृतमेनामुत्पादयतोविधेःकरतलपद्मम

का॰पू॰
१३७
137

र्शस्केधोनयेविगलितालोचनयुगलादश्रुबिंदवस्तेभ्यएतानिजगतिकुमुदकमलकुवलयसौगंधिकवनानीत्येवंचिंतयतएवा
स्यतस्याश्चनयनयुगलेनिपपातचक्षुः।तदातस्याअपिस्निग्धमयंसकेयूरकेणावेदितइतिचिंतयंसारूपातिशयंविलोकनविस्मय
स्मेरंनिश्चलनिबद्धलक्ष्यंचक्षुस्तस्मिन्सुचिरंपपात।लोचनप्रभाधवलितस्तुकादंबरीदर्शनविह्वलोवलक्षइवतत्क्षणमभव
त्चंद्रापीडः।दृष्ट्वाचप्रथमंरोमोद्गमस्ततोभूषणरवस्तदनुकादंबरीसमुत्तस्थौ।अथतस्याःकुसुमायुधएवस्वेदमजनयत्
ससंभ्रमोत्थानश्रमोव्यपदेशोनाभवत्।ऊरुकंपएवचगतिंरुरोधनूपुररवाकृष्टहंसमंडलमयंयशोलेभेनिश्वासप्रवृत्तिरेवां
शुकचलनंचकारचामरानिलोनिमित्ततामयासीत्।अंतःप्रविष्टचंद्रापीडकौतुकस्पर्शलोभेनेवनिपपातहृदयेहस्तःसएवस्तनावरण
व्याजोबभूवआनंदएवाश्रुजलमपातयत्चलितकर्णावतंसकुसुमरजोव्याजआसीत्लज्जैववक्त्रंनददौमुखपरिमलाग
तालिवृंदहारतामगात्मदनशरप्रथमप्रहारवेदनैवसीत्कारमकरोत्कुसुमप्रकरकेतकीकंटकक्षतिःसाधारणतामवापवेप

शिवः
१३७

धुरेवकरतलमकंपयत्अनिवेदनोपगतप्रतीहारीनिवारणंकंपमानमनाः·तदाचकादंबरीविधातेवमन्मथस्यापिमन्मथइवात्मद्वितीयस्तयासह
योविवेशचंद्रापीडोहृदयं·तथाप्यसावपिनस्मारत्वात्मरणाद्युतिमपितिरोधानममंस्तहृदयप्रवेशमपिपरिग्रहमगणयत्·नूपुरा
रवमपिसंजायमानमन्यतसर्वेन्द्रियाहरणमतिप्रसादमचिंतयत्·देहप्रभासंपर्कमपिस्फुरन्समागमसुखमकल्पयत्·कादंबरी
तुकंठग्रहादिवदत्तकतिपयपदामहाश्वेतांस्नेहनिर्भरंचिरदर्शनजातोत्कंठांसोत्कंठंकंठेजग्राह·महाश्वेतापिद्विगुणतरदत्तकंठग्र
हातामवादीत्·सखिकादंबरिभारतेवर्षेराजाऽनेकवरतुरगखुरक्षुण्णक्षोणिरवदत्तचतुःसमुद्रमुद्रोऽरिजनप्रजापीडस्तारापीडस्ता
रापीडोनामतस्यायंनिजभुजशिलास्तंभविश्रांतविश्वंभरापीडश्चंद्रापीडोनामसूनुर्दिग्विजयप्रसंगेनानुगतोभूमिमिमामेव
मद्दर्शनात्प्रभृतिप्रकृत्यामेनिःकारणबंधुतामागतःपरित्यक्तसकलासंगनिष्ठुरामपिमेसविशेषवत्सलतावसरलैर्गुणैराकृष्यचित्त
वृत्तिंवर्त्ततेदुर्लभोहिदाक्षिण्यपरवशोनिर्निमित्तमित्रमकृत्रिमहृदयोविदग्धजनोयतोऽस्यममत्वमिवत्वमपिनिर्माणकौशलंप्रजा

पतेः निःसपत्नतांच रूपस्यास्यामानिनि निवेदितं चलश्रवाः समुत्कंठातुरंच पिब्याः सुरलोकातिरिक्ततांच मर्त्यलोकस्य सफलतांच मातु
वीलोचनानामेकस्थानसमागमंच सर्वकलानामैश्वर्यं सौभाग्यस्याप्यात्मनांच ह्रासमसीति बलादानीतोयं कथितांचास्य मया बहुप्रकारं प्रिय
सखीतदपूर्वदर्शनीयमिति विमुच्य लज्जामनुपजातपरिचयमप्युत्सृज्य विश्रंभेनाभ्यमज्ञातशीलस्यपहृदयप्रगं कायपानेन धात्रापि
वर्त्तितव्यमेषते मित्रंच बांधवश्च परिजनश्चेत्यावेदिते तया चंद्रापीडः प्रणाममकरोत्· कृतप्रणामंच तं तदा कादंबर्यास्तिर्यग्वि
लोकयंत्याः सस्मेरमतिदीर्घलोचनापांगभागं जनतस्कारतारकस्य लोचनस्य मसलिलप्रविसरश्चानंदवाष्पजलबिंदु
निकरो निपपात· त्वरितमभिप्रस्थितस्य हृदयस्य धूलिरिव सुधाधवलस्मितज्योत्स्ना विससार· संमान्यतामयं हृदयस्थ चिरोज्ज
नः अतिप्रणामेनेति शिरो वक्रुमिवेकाञ्चनतासमुन्नाम· अंगुलिविवरविनिःसृतमरकतांगुलीयकमयूखो विभ्रमगृहीतनां
बूलवीटिक इव करोजंभारंभमुखरस्फुलसर्प· स्ववत्स्वेदजलधौतलावण्यनिर्मलेषु चास्याः स्तनसंक्रांतमप्रतिबिंबलमाघूर्णमूर्त्ति

संचरन्निर्मकरकेतुरिवावयवेष्वदृश्यतचंद्रापीडः॥तथाहि॥सिंजन्मणिनूपुरपुटेनमणिकुट्टिमालिखितांगुलेनाहतइवचरणेन
खेषुनिपपात॥दर्शनानिरंतरप्रधावितेनगत्वाहृदयेनानीतइवस्तनाभ्यंतरेसमदृश्यत॥विकचकुवलयदामदीर्घयाचचक्षुषानि
पीतइवकपोलतलेसमलक्ष्यत॥सर्वासामेवचतदातासांकन्यकानांनिर्यत्कर्णसंगिनीनांतंकुवलयादपांगचुंबिन्यादृष्ट्यानिर्गत्य
कामाइवकर्णपूरमधुकरैःसमंबभ्रमुस्तरलास्तारकाः॥कादंबरीतुसविभ्रमकृतप्रणामामहाश्वेतयासहपर्यंके
निषसाद॥ससंभ्रमपरिजनोपनीतायांचशयनशिरोभागनिवेशितायांधवलांशुकप्रच्छदपटायांहेमपादांकि
तायांपीठिकायांचंद्रापीडःसमुपाविशत्॥महाश्वेतानुरोधेनविदितकादंबरीचित्ताभिप्रायाःसंहृतनुरवन्यस्तहस्तस्त
नशब्दनिवारणसंज्ञाःप्रतीहार्योवेणुरवान्वीणाघोषान्गीतध्वनीन्मागधीजयशब्दांश्चसर्वतोनिवारयांचक्रुः॥त्वरितपरि
जनोपनीतेनसलिलेनकादंबरीस्वयमुत्थायमहाश्वेतायाश्चरणौप्रक्षाल्योत्तरीयांशुकेनामृज्यपुनःपर्यंकमारुरोह॥चं

द्रापीडस्यापिकारणंबभूवः सखीरूपानुरूपाजीवितनिर्विशेषेणासर्वविस्रंभनिर्भरंदलेखेतिनाम्नावलाहनिपुणेनापिप्रक्षालित
वलीचरणौ। महाश्वेतानुकर्णाभरणप्रभावर्षिण्यपांगदेशेसप्रेमपाणिनास्पृशंतीमधुकरजरपर्यस्तंचकर्णावतंसमुत्के
क्षंतीचामरपवनविधुतिपर्यस्तालकवल्लरीमनुध्यजमानाकादंबरीमनामयंपप्रच्छ। सानुसखीप्रेमणागृहीतिवासेन
कृतापराधेवानामयेनैवलज्जमानाकथमपिकुशलमाचचक्षे। समुपजाततशोकापिनस्मिन्कालेमहाश्वेतामुख
निरीक्षणतत्परापिमुहुर्मुहुरपांगवि[illegible]क्षेपप्रचलिततरलतारासारोहरंचक्षुर्मंडलितचापेनजगवलकुसु
मधन्वनाबलान्नीयमानंचंद्रापीडपीडनयेवनशशाकनिवारयितुं। तेनैवक्षणेनतेनासन्नसखीकपोलसंक्रांतेने
र्ष्ययारोमांचनिघमानकुचनश्यत्नतिबिंबेनविरहव्यथास्वेदार्द्रवक्षःस्थलघटितशालभंजिकाप्रतिमेनसपत्नीरो
षालिमिषताबोर्निप्यशोकमानंदजलतिरोहितेनांधनादुःखमपजगामुहूर्त्तापगमेचतांबलदानोद्यतांमहाश्वेतानाम शिवः

भाषत·सखिकादंबरिसंप्रतिपन्नमेवास्माभिरभिनवागतस्यचंद्रापीडकुमारस्यधनीयस्तस्मैतावद्दीयतामित्युक्ताचकिंचिद्विवर्त्तिताव
नमिलन्मुखीशनैरव्यक्तमिवप्रियसखिलज्जेहमनुपजातपरिचयाप्रागल्भ्येनानेनगृहाणत्वमेवास्मैप्रयच्छेत्युवाचतां·पुनःपुन
रभिधीयमानाचतयाकथमपिग्राम्येवचिरात्क्रम्येवसानाभिमुखंमनस्यकेमहाश्वेतामुखार्पिताक्षष्टछविरेवमेपमानांगयष्टिरा
कुलितलोचनास्थूलस्थूलंनिश्वसंतीनिजशरप्रहारमूर्छितामन्मथेनस्नापितेवस्वेदजलाविसरैःस्वेदजलविसरनिम
ज्जनभयेनचहस्तावलंबनमिवयाचमानासाध्वसपरवशापतामीतिगलितुमिवग्रहीतुमिवप्रसारयामासलांकुलगर्भंहस्तप
ल्लवं·चंद्रापीडस्तुजयकुंजरकुंभस्थलास्फालनसंक्रांतसिंदूरमिवस्वभावपाटलंधनुर्गुणकर्षणकृतकिणश्यामलंकव
गुणकाच्छिद्रदितारिलक्ष्मीलोचनपरामर्शनलग्नांजनबिंदुमिवविसर्पन्नखकिरणंतयातिरभसेनप्रधाविताभिरिव
प्रहसिताभिरिवांगुलीभिरुपेतंस्पर्शलोभाच्चतत्कालकृतसन्निवेशाःसरागाःपंचापीन्द्रियवृत्तीरपरांगुलीरुद्वहंतंप्रसा

रितवान्पाणिं॰ तत्र च सा तत्कालविलासदर्शनकुतूहलिनीभिरिव कुतोऽप्यागत्य सर्वरसैरधिष्ठिता तेनातिबहलस्पर्शसन्यप्रसारिते
न चंद्रापीडहस्तान्वेषणायेव पुरःप्रवर्त्तितेन स्वांगुनिवहेन वेपथुचलितवलयावलीवाचालेन संभाषणमिव कुर्वता हस्ते
न स्वेदसलिलपातपूर्वकं गृहीतामयं मन्मथेन हस्तोदकसजनहस्तात्मानमिव प्रतिग्राहयंती अथ प्रजातिजवतोऽस्तेव
र्त्तेन इति जीवितमिव स्थापयंती तां बलम[illegible]घातू: आकर्षयंती च करकिसलयं भुजलतानुसारेण स्पर्शतस्समागतमनंगश
र[illegible]निलमअंसस्तंभमिव पतितमापरित्नवलयं न ज्ञासीत्: गृहीत्वापरं तां[illegible]लं मरगम्भेतायै प्रायच्छत्: अथ सकसैवस्व
रितगतिस्त्रिवर्णरागमिंद्रायुधमिव कुंडलीकृतं कंठेन वहता विद्रुमांकुरानुकारिणा चंचुपुटेन मरकतद्युतिपक्षतिना मंथ
रगतेन शुकेनानुबध्यमाना कुमुदकेसरपिंजरतया चरणयुगलस्य चंपककलिकाकारतया मुखस्य कुवलयदलनीलतया
च पक्षपुतीनां कुसुममयीवागत्य शारिकां सक्रोधमवादीत्: नर्त्तहारिके कास्वरिकस्मान्न निवारयस्येतमलीकसुभगाभिमा

तिनमतिदुर्विनीतंमामनुबध्नंतंविहंगापसदंयदिमामनेनपरिहसमानामुपेक्षसेततोहंनियतमात्मानमुत्सृजामिसत्यंशपामितेपाद
पंकजस्पर्शेनेत्यभिहिताचतयाकादंबरीस्मितमकरोत्‌।अविदितवृत्तांतानुमन्यैवताकिमियंवदतीतिमदलेखांपप्रछसाचा
कथयत्‌।एषाभर्तृदुहितुःसखीकादंबर्याःकालिंदीतिनाम्नासारिकापरिहासनाम्नःशुकस्यभर्त्तृदारिकयैवपाणिग्रहणपू
र्वकंजायापदंप्रापिताअद्यचायमनयाप्रत्युषसिकादंबर्यास्तांबूलकरंडवाहिनीमिमांतरलिकामेकाकिनींकिमपिपाठय
न्दृष्टोयतस्ततःप्रभृतिसंजातेर्ष्यापराङ्मुखीनैनमुपसर्पतिनालपतिनस्पृशतिनविलोकयतिसर्वाभिरस्माभिःप्रसाद्य
मानापिनप्रसीदतीत्येतदाकर्ण्यस्फुटस्फुरितकपोलोदरश्चंद्रापीडोमंदंमंदंविहस्याब्रवीत्‌।अस्त्येषाकथाश्रूयतएवैत
द्राजकुलेकर्णपरंपरयापरिजनोप्येवंमंत्रयतेबहिरपिजनाःकथयंत्येवंदिगंतरेष्वप्ययमालापोवर्त्ततएवास्माभिर
प्येतदाकर्णितमेवयथाकिलदेव्याःकादंबर्यास्तांबूलदायिनींतरलिकांकामयमानःपरिहासनामाशुकोमदनपरवशोग

तान्यपिदिनानिनवेत्तीतितदयमास्तांतावत्परित्यक्तनिजकलत्रोनिस्त्रपोनयासहदेव्याःकादंबर्याःकथमेतत्पुलकंयन्ननिवारयन्ती
मांचपलांकुब्जदासीमप्यवादेप्यापिकथितैवनिःस्नेहताप्रथममेवमिमांवराकींकालिंदींदर्शयन्त्यादुर्विनीतायविहंगायप्रयच्छंत्या
किमिदानींकरोतुवराकीयदेतत्सापत्न्यंनामनारीणांप्रधानंकोपकारणंप्रणयिनीविरागहेतुःपरंपरिभवस्थानमियमेवकेवलं
मतिधीरायदस्यपानेनदौर्भाग्यगरिम्णाजातवैरूप्ययाविषंवानास्वादितमनलोवानासादितोऽनशनंवानांगीकृतंनह्येवम
परमस्तियोषितांलाघवकारणंयदिदंयमीर्ष्याप्यपराधेनुनीयमानामानेनप्रत्यासन्निमेष्यतिनर्दाधिगिमामलमनयाकृतो
वर्ज्जनीयेयमाभिनवनिरस्याकएनांपुनरालापयिष्यतिकोवायलोकयिष्यतिकोवास्यानामग्रहीष्यतीत्येवमभिहितनवनितास्मि
न्सर्वास्तासांहरकादंबर्याक्रीडालापत्रपिताजहसुरंगनाःपरिहासरसुतस्यननर्मभाषितमाकर्ण्यजगादः धूर्त्तराजपुत्रनिपुणेयं
नखल्वमान्येनयालोलापिपत्नीपतिंशक्यसेएषापिबुध्यतएवैतावतीर्वक्रोक्तीरियमपिजानात्येवपरिहासजल्पितान्यस्याभ

पिराजकुलसंपर्कचतुरामतिर्विरम्यतामत्रनिरेवानुजंगमंगिनाविलानामियमेवहिदेवेन्निमंजुनाविणीकालंचकारएणंचप्रमाणंचविषयंच
गस्तावंचकोपप्रसादयोरिति·अत्रांतरेचागत्यकंचुकीमहाश्वेतामवोचत्·आयुष्मतिदेवश्चित्ररथोदेवीचमदिरात्वांद्रष्टुमाहूयत
इत्येवमभिहिताचगंतुकामासखिकादंबरिचंद्रापीडःकास्तामित्यपृच्छत्·अस्मैतुनन्वास्मेवानेकस्त्रीहृदयसहस्त्रावस्थानमनेन
तिमनसाविहस्यप्रकाशमवदत्·सखिमहाश्वेतेकिंत्वमभिदधासिदर्शनादारभ्यशरीरस्यापमेवमत्तुःकिंतुतत्रयत्रस्यपरिज
नस्यवायत्रास्मैरोचतेप्रियसखीहृदयायवातत्रायमास्तां·तच्छ्रुत्वामहाश्वेतावदत्·अत्रैवत्वत्प्रासादसमीपवर्त्तिनिप्रमद
वनेक्रीडापर्वतमणिवेश्मस्वास्तामित्यभिधायगंधर्वराजंद्रष्टुंययौ·चंद्रापीडोपितथैवसहनिर्गत्यविनोदनार्थंवीणावादिनीभि
श्चवेणुवाद्यनिपुणाभिश्चगीतकलाकुशलाभिश्चदुरोदरक्रीडारागिणीभिश्चाष्टापदचतुराभिश्चित्रकर्मसुतश्रमाभिश्चसुभाषि

तपाटिकाभिश्च कादंबरीसमादिष्टप्रतीहारिकाभिश्च कामिनीभिरनुगम्यमानः पूर्वदृष्टेन केयूरकेणोपदिश्यमानमार्गः क्रीडापर्वतमणि
मंदिरमगात्। गते च तस्मिन्गंधर्वराजपुत्री विसर्ज्य सकलं सखीजनं च परिमितपरिचारिकाभिरनुगम्यमाना प्रासादमारुरोह।
तत्र शयनीये निपत्य दूरस्थिताभिर्विनयविघ्नताभिः परिचारिकाभिर्विनोद्यमाना कुतोपि प्रत्यागतचेतना चैकाकिनी तस्मि
न्काले चपले किमिदमारब्धमिति निगृहीतेव लज्जया गंधर्वराजपुत्रि कथमेतद्युक्तमित्युपालब्धेव विनयेनायमसावुत्सन्नो बालभा
वः क्व गतः खलु पहसितेव मुग्धतया स्वैरिणि मा कुरु यथेष्टमेकाकिन्यविनयमित्यामंत्रितेव कुमारभावेन नत्रीकृतनायं कुलकन्यकानांक
मइति गर्हितेव महत्त्वेन दुर्विनीते रक्षाविनयमिति तर्जितेवाचारेण मूढे मदनेन लघुतां नीतासीत्युपहसितेवाभिजात्येन कुतस्तेयं त
रलतेति धिक्कृतेव धैर्येण स्वच्छंदचारिणि पत्रमालिकेनो हस्त्वयेति निंदितेव कुलस्थित्या समतिमुर्वी लज्जाम्बुवाहः समचिंतयच्चैनमगणि
तसर्वशंकया तरलहृदयतां दर्शयंत्याद्यमया किंकृतमिदमोहांधयानयाहृष्टपूर्वो ममेति साहसिकया मयानशंकितं लघुहृदयामोकल

पिश्यतीति निरीक्षमाना कलितं कास्यचित्तवृत्तिरिति जिह्मध्यानपरीक्षितं दर्शनानुकूलाशमस्यनेतिवानकृतो विचारक्रमः प्रत्याख्यानैवेल
क्षालनीतं गुरुजनान्न च स्वलोकापवादान्नोद्विग्नं तथा च महाश्वेता दुःखितेति निर्दाक्षिण्यया नापेक्षितमासन्नवर्तिसखीजनोप्युपल
क्षयतीति न रयानलक्षितं पार्श्वस्थितः परिजनः पश्यतीति न च चेतनमानसैस्यस्खलकुण्ठयोपि तादृशी विनयच्युतिं विजावयेयुः कि
मुताकुमारमदनवृत्तांता महाश्वेता सकलकलाकुशलाः सख्यो वा राजकुलसंचारचतुरा वा नित्यमिंगितज्ञः परिजन ईदृशेष्व
तिनिपुणतरदृष्टयोंतःपुरदास्यः सर्वथा हतास्मि मंदपुण्या मरणमेवापोनलज्जाकरं जीवितं श्रुत्वेतवृत्तांतं किं वक्ष्यत्यंबा तातो वा
गंधर्वलोको वा किं करोमि कोत्र प्रतीकारः केनोपायेन स्खलितमिदं प्रच्छादयामि कस्य वा चापलमिदमनेनैवं दुर्विनीतानिमिंद्रिया
णं कथयामि क्व वानेन दग्धहृदयेन न खलु जानामि निगृहीतागच्छामि तथा महाश्वेता व्यतिकरेण प्रतिज्ञा कृता तथा प्रियसखीनां पुरो मं
त्रितं तथा च केयूरकस्य हस्ते संदिष्टं न खलु जानामि मंदभागिनी शठविधिना दुष्टमन्मथेन वा पूर्वकृतापुण्यसंचयेन मृत्युहतकेन
वान्येन वा केनाप्युपयमानीतो मम विप्रवादकस्य वंशापीडः कोपि वा कदाचिदृष्टो नानुकूलेन चक्षुषा न चिंतितो नोल्लापितो मां विडंबयितु

पततोस्यदर्शनमात्रेणैवसंयम्यहस्तेनेवेंद्रियैःशरपंजरेइवनिक्षिप्यसमर्पितेवमन्मथेनदासीकृतासोपनीतेवानुरागेणाभिर्यालितेवगृहीतमूल्येन
गुणपणेनविक्रीतेवहृदयेनोपकरणीकृताक्रिनमेकार्यतेनचपलेनेतिक्षणमिवसंकल्पमकरोत्ःकृतसंकल्पाचानंगेनेनमिथ्याविनी
तेयमितियानकुसुमेषुणगृह्यमी॰तिहृदयोत्कंपचलितेनपरिहृतेवचंद्रापीडेनतत्सारिसागसंकल्पसमकालप्रस्थितेनकंठलग्नेवपृष्ठे
वजीवितेनाविशेयवृत्तैर्मुनरपिप्रक्षालितलोचनापाहस्यतामसौजनःप्रसाधनयोग्योनवेतितत्कालागतेनाभिहितेवबाष्पेणापत्र
यामितेसहसास्तुभिर्देहावलेपमिव्विनिर्भर्त्सितेवमनोभुवापुनरपितथैवचंद्रापीडहृदयाबभूव॰तदेवमस्तमितप्रतिसमाधानबला।
बलात्प्रेमावेशेनास्वतंत्रीकृतापरवशाबोन्मायजालवातायनेनतमेवस्कंधावारपर्वतमवलोकयंतीतिष्ठत्॰तत्रस्थाचज्ञातमानंदजलप्लव
धानोद्धिन्नेवस्वन्नसादृश्यंनचक्षुषाअंगुलीगलितस्वेदपरामर्शमीतेवचिंतयालिलेख॰नचाचित्रतूलिकयारोमांचांतरितोधानभ्रंशके
नेवहृदयेनालिलिंगनवक्षसातत्संगमकालातिपातासहेवमनोरागमागमायानियुक्तवतीनपरिजनं॰चंद्रापीडोपिभग्नविस्मणिगृहं
शिलातलास्तीर्णायाम्नुनयतउपर्युपरिनिवेशितबहूपधानायांकुथायांनिपसकेयूरकेलोत्संगेनगृहीतचरणयुगलस्तामिर्मष्यादि

रेखमुद्रमिवांगेसुप्रविष्टाभिः कन्यकाभिः परिवृतो दोलायमानेन चेतसा चिंतां विवेश । किं तावदस्या गंधर्वराजदुहितुः कादंबर्याः सहजएवएते सक
विलासाः एवं दृशां सकललोकहृदयहारिण आहोस्विदनाराधितप्रसन्नेन भगवता मकरकेतुना मय्यपि नियुक्ता येन मां सास्रेण सरागे
णाकूणितत्रिभागेन हसंतीवांतःपतत्स्मरशरकुसुमरजोरूषितेनेव चक्षुषा तिर्यग्विलोकयति मद्विलोकिता च धवलेनास्मिताव
लोकेन दुकूलेनेव लज्जयात्मानमावृणोति मल्लज्जाविवर्त्तमानवदना च प्रतिबिंबप्रवेशलोभेनेव कपोलदर्प्पणमर्प्पयति मद्द
काशदायिनो हृदयस्य प्रथमाविनयलेखामिव कररुहेण शयनांके लिखति मत्तांबूलवीटिकोपनयनखेदविधुतेनेव रक्तकोमल
श्वसभ्रमरवृंदेन करतलेन स्विन्नं मुखमिव शीतलमालपल्लवेनेव वीजयति पुनश्चाचिंतयत् अथवा येन मानुष्यकसुलभचाल
धुना मिथ्यासंकल्पसहस्रैरेवं मां विप्रलंभते क्षुद्रविवेको यौवनमदो मदनो वा यतस्तिमिरायते लवमात्रां दृष्टिरल्पमपि कलुषं महद्
पक्षपतिस्नेहलवोऽपि वारिणेव यौवनमदेन दूरं विस्तार्यते स्वयमनुत्पादितानेकचिंताशताकुलाकविमतिरिव तरलतानां किंचि

नोऽप्यनेननिपुणेनमन्मथग्रहीतानकरुणाचित्तवृत्तिर्नकिंचिन्मालिखतिसंजातरूपाभिमानाकुलेवातसंभावनानकाचिन्मात्मानमर्प्य
यतिस्वप्नइवाननुभूतमपिमनोरथोपस्थापयतिइंद्रजालपिच्छिकेवासंभाव्यमपिप्रत्याशापुरःस्थापयति।भूयश्चचिंतितवान्कि
मनेनवृथैवमनसाखेदितेनयदिसत्यमेवेयंधवलेक्षणामय्येवंजातरतिस्तदानचिरात्सएवैनामप्रार्थितानुकूलोमन्मथःप्रक
टीकरिष्यतिसएवास्यसंशयस्यछेत्ताभविष्यतीत्यवधार्याभ्यायोपविश्यचाताभिःकन्यकाभिःसहगेयैर्लयैश्चविपंची।वीणा
वाद्यैश्चपाणविकैश्चस्वरसंदेहविवादैश्चसुभाषितगोष्ठीभिश्चान्यैश्चस्वैरालापैःसुकुमारैःकलाविलासैःक्रीडन्नासांचक्रे
मुहूर्तंचस्थित्वानिर्गम्योपवनालोकनकुतूहलाक्षिप्तचित्तःक्रीडापर्वतशिखरमारुरोह।कादंबरीतुतंद्रष्टुंचिरयतीतिमहाश्वेता
मा:किलवर्त्मावलोकयितुंविमुच्यतरंगवाससमनंगाक्षिप्तचित्तासौधस्योपरितनंशिखरमारुरोह।तत्रचविरलपरिजनासक
लशशिमंडलपांडुरेणातपत्रेणहेमदंडेननिवार्यमाणातपाचचतुर्भिर्बालव्यजनैश्चफेनशुचिभिरुद्धूयमानैरुपवीज्यमाना
शिरसिकुसुमगंधलुब्धेनभ्रमताभ्रमरकुलेनदिवापिनीलावगुंठनेवचंद्रापीडाभिसारणवेषाभ्यासंकुर्वतीतुरुच्चामरशिखांस

मासज्यमुहुर्मुहुश्चरंडमवलंब्यमुहुस्तमालिकास्कंधेकरौविन्यस्यमुहुर्मदलेखांपरिष्वज्यमुहुःपरिजनंनालिनिसकलस्नेहेनानेत्रत्रिभागेनमुहुरान
लितत्रिवलीवलयापरिवृत्यमुहुःप्रतीहारीवेत्रलताशिखरेकपोलंनिधायमुहुर्निश्चलकरविधृतामधरपल्लवेवीटिकांनिवेश्यमुहुरुत्की ८८
र्णकर्णोत्पलप्रहारपलायमानपरिजनानुसरणदत्तकतिपयपदाविहस्यमानंविलोकयंतीतेनचदिलोकस्मानामहांतंकालमतिक्रांतंनाआ
सीत्ःआरुह्यचप्रतीहार्यानिवेदितमहाश्वेताप्रत्यागमनातस्मादवततारःस्नानादिषुमंदादरामहाश्वेतानुरोधेनदिवसव्यापारमकरो
त्ःचंद्रापीडोपितस्मादवतीर्यप्रथमंविसर्जितेनैवकादंबरीपरिजनेननिर्वर्त्तितस्नानविधिर्निरुपहताशिलाभिमनाविनोदे
वतःक्रीडापर्वतकएवसर्वमाहारादिकमहःकर्मचक्रेःक्रमेणचकृताहारःक्रीडापर्वतकप्राग्भागभाजिमनोहारिणिशिलारीत
हारिणिरोमंथफेनसीकरासारसीरायुधरलन्नयनिश्चलकालिंदीजललिमितरुणीचरणालक्तकशोणशोभिविविकुसुमर
जःसिकतिलतलेलतामंडपोपरक्तेशिखंडिताण्डवसंगीतगृहेमरकतशिलातलेसमुपविष्टोहस्तवान्तरहसैवातिपेहलधाम्ना

धवलेनालोकेनजलेनेवनिर्वाप्यमानदिवसंमृणालवलेनेवपीयमानमातपंक्षीरोदेनेवप्लाव्यमानजगन्मंडलंचंदनरसवलयेनेवसिच्यमा
नादिगंतासुधयेवविलिप्यमानमंबरतलं आसीच्चास्यमनसि कितुखलुभगवानोषधिपतिरकांडएवसीतांशुरुदितोत्रवेकुतयं
त्रविक्षेपविशीर्यमाणपंडुरधारासहस्राणिधारागृहाणिमुक्तान्याहोस्विदनिलविकीर्यमाणशीकरधवलितभुवनांबरासिंधुर्ध
रातलमवतीर्णाकुतस्तुलाच्चालोकानुसारप्रहितचक्षुरस्माद्वीक्षणानल्पकन्यकाकदंबपरिवृतांध्रियमाणधवलातपत्रामुद्धूयमा
नचामरद्वयांकादंबरीप्रतीहार्यावामपाणिनावेत्रलतागर्भेणईवस्त्रस्कलावछलमुखंचंदनानुलेपनसनाथंनालिकेरसं
पुटंसादरक्षिप्तकरेणदंतरुस्तावलंबांकेयूरकेणचनिश्वाससहार्यनिर्मोकमृदुचिनीकल्पलतादुकूलेरुधातानिवेद्यमानमार्गा
मालतीकुसुमदामाचिंचितकरतलयाचतमौलिकयानुगम्यमानांमदलेखालस्याश्चसमीपेतरलिकांतयाचासितांशुकोपध
रपटलगृहीतंधवलताकारणमिवक्षीरोदस्यसरस्तुवंमृणालदंडमिवनारायणनाभिपुंडरीकस्यमंदरक्षोभविक्षिप्तमिवामृ
तफेनपिंडनिकरंवासुकिनिर्मोकमिवमंथनश्रमोज्झितंहासमिवश्रियःकुलगृहवियोगगलितंमंदरमथनविखंडितशेषमिवशशिक शिवः

नारंडमिव संहतं प्रतिमातारागणमिव जलानुकूल दिग्गजकरसीकरासारमिव पुंजीकृतं नक्षत्रमालाभरणमिव मदनद्विपस्य शृंखलेप
शकलेश्विव कल्पितं कादंबरीरूपवशीकृतमुनिजनहृदयैरिव निर्मितं गुणमिव सर्वरत्नानां यशोराशिमिवैकत्र घटितं प्रतिपक्षमिव
चंद्रमसः जीवितमिव ज्योत्स्नायाः लक्ष्मी हृदयमिव नलिनीदलगलज्जलबिंदुविलासतरलमुक्तकंठितमृणालवलयं धवलकरं
शरत्कुमुदिनामिव घनमुक्तांशुमिव धवलितदिङ्मुखं मंदाकिनीप्रवाहमिव सुरयुवतिकुचपरिमलवाहिनं प्रजाव विगम
विस्तारं हारं दृष्ट्वा चायमस्य चंद्रापीडश्चिंतांतप्रसुतिमुखो धवलिम्नः कारणमिति मनसा निश्चित्य हरादेव प्रसुस्नानादिना समु
पचितोपचारक्रमेण रागमदलेखामापततीं ज्याह सा तु तस्मिन्नेव यावाबालि मुहूर्त्तमुपविश्य स्वयमुत्थाय तेन चंदनांगरागेणानु
लिप्यते चद्वे दुकूले परिधाप्यते श्च मालतीकुसुमदामशिरा रचितशेखरं कृत्वा तं हारमादाय चंद्रापीडमुवाच कुमार तवेय
परस्तिमाहंकारकांतापेशलतापीतिपरवशं जनं कमिव न कारयति प्रश्रय एव ददात्यवकाशमेवं विधानामनया चारुता
कस्मासि न जीवितस्वामी अनेन चाकारणवात्सल्येन चरितेन कस्य न बंधुत्वमध्यारोपयसि एषा च लेप्रकृतिमधुरा व्यवहृतिः कस्य

नवयस्यतामुत्सारयति किं वा न समाश्वासयंत्त्वय्यपि स्वभावसुकुमारदत्तयोभवकुरुणाः त्वन्मूर्त्तिरेवात्रोपालंभमर्हतीत्याप्रथमदर्शनएवावि
स्रंभमुपजनयति· तथाहि· त्वद्विधे सकलभुवनश्लाघितमहिम्नि प्रयुज्यमानं सर्वमेवानुचितमिवाभाति संभाषणमप्यधःकर
णमिवापतति आः स्वरोप्यप्रभुतामभिमानमिवानुमापयति स्तुतिरप्योत्सुकमिव सूचयति उपचारोपि चापलतामिव प्रकाशय
ति प्रीतिरप्यात्मज्ञतामिव ज्ञापयति विज्ञापनापि प्रागल्भ्यमिव ज्ञापयते सेवापि चापलमिव दर्शयते दानमपि परिभव इव लवति अपि च
स्वयंदत्तहृदयायाः किं दीयते जीवितेश्वरस्य किं प्रतिपाद्यते प्रथमागमनकृतमत्रोपकारस्य कानेप्रत्युपक्रियादर्शनदत्तजीवित
फलस्य सफलमागमनं केन लक्षियते प्रणयितां चानेनमपदेशेन दर्शयति कादंबरी नविभवमभिपाद्य दिपरस्वतासज्जनवि
भवानामास्तां तावदिभवोजनवान्नशस्य हास्यमंगीकुर्वाणामाकार्यकारिणीति नियुज्यते दत्त्वात्मानमपि वंचितानन्नवति जीवितम
पर्य्यपि त्वानपश्चाद्भवितव्यते प्रणयिजनप्रत्याख्यानपराङ्मुखी च दाक्षिण्यपरवतीमहत्तासतीनचलाच्छ्रीभवति याच्यमानानांपा
दर्शीदत्तांलज्जा· यत्तु सत्यममुनाव्यतिकरेण कृतापराधमिव त्वय्यात्मानमवगच्छति कादंबरी देवी· तस्य मम नर्मपत्रलेखा कृता

सर्वरत्नानामेकः शेष इति शेषनामा हारोयमनुनैव रत्नेनाबहुमतो भगवतांभसांपत्या गृहमुपगताय प्रचेतसे दत्तः प्रचेतसापि गंधर्वराजाय गं
धर्वराजेनापि कादंबर्यै तयापि त्वद्वपुरस्यानुरूपमाभरणस्येति विभाव्यंसानभःस्थलमेवोचितं सुधासूतेर्धाम न धरेत्यवधार्यानुप्रेषि
तः यद्यपि निजगुणगणाभरणभूषितांगयष्टयो भवादृशाः क्लेशहेतुमितरजनबहुमतमाभरणभारमंगेषु नारोपयंति तथापि कादं
बरीप्रीतिरत्र कारणं किं न कृतमुरसि शिलाशकलं कौस्तुभाभिधानं लक्ष्म्याः सहजमिति बहुमानमाविष्कुर्वता भगवता शार्ङ्गपाणिना
न च नारायणोत्रभवंतमतिरिच्यते नापि कौस्तुभमणिरनेनापि गुणलवेन शेषमतिशेते न चापि कादंबरीमाकारानुकृतिकलया
पि लक्ष्मीरनुगंतुमलं मनोऽर्हतीयमिमं बहुमानं तन्नोनचाम्नानिरेवाप्रीतिप्रसरस्य नियतं भवताभ्यर्थनीया महाश्वेतामुपालंभसहस्रैः
खेदयित्वा स्वात्मानमुल्लस्यति अत एव महाश्वेता तरलिकामपीमं हारमादाय त्वत्सकाशं प्रेषितवती । तयापि कुमारस्य संदिष्टमेव नख
लु महाभागेन मनसापि कार्यः कादंबर्याः प्रथमः प्रणयप्रसरभंग इत्युक्त्वा नाराचक्रमिव चामीकराचलस्य तटे तं तस्य वक्षःस्थले बबंध । चंद्रापी

डस्तु विस्मयमानः प्रत्यवादीत्॰ मदलेखे किमुच्यते निपुणासि जानासि ग्राहयितुमुत्तरावकाशमपहरंत्या कृतं वचसि कौशलं॰ अपि तु मुग्धे केवलमयमाल
न केवलं वयं ग्रहणस्याग्रहणस्य वा गतारव स्त्वियं कथा सौजन्यशालिनीभिर्भवतीभिरुपकरणीकृतोऽयं जनो यथेष्टमिष्टेषु निदेशेषु वा व्यापारेषु विनियु
ज्यतामिति दाक्षिण्यायाः खलु देव्याः कादंबर्या निर्दाक्षिण्यगुणेन कंचिन्न दासीकुर्वतीत्युक्त्वा च कादंबरीसंबद्धाभिरेव कथाभिः सुचिरं स्थित्वा वि
सर्जयां बभूव मदलेखां॰ अनतिदूरं गतायां च तस्यां क्रीडापर्वतकगतमुदयगिरिगतमिव चंद्रमसं चंदनदुकूलहारधवलं चंद्रापीडं द्रष्टुं स
मुत्सारितवेत्रच्छत्रचामरविसृष्टा निषिद्धाशेषपरिजना तमालिकाद्वितीया चित्ररथसुता पुनरपि तदेव सौधशिखरमारुरोह॰ तत्रस्था
च पुनस्तथैव विविधविलासतरंगितैर्जहारास्य मनः॰ तथाहि॰ मुहुर्नितंबबिंबन्यस्तवामहस्तपल्लवा सभ्रावृतांशुकानुसारप्रसारितद
क्षिणकरा निश्चलतारका लिखितेव मुहुर्जृंभिकारंभरक्तोत्तानकरतलतया नक्षत्रसवलनमिवानिक्षिपंत्येव मुहुरंशुकपल्लव
ताडितनिश्वासामोदलुब्धमधुकरमुखरतया प्रस्तुतत्राणेव मुहुरनिलगलितांशुकसंभ्रमद्विगुणीकृतभुजयुगलप्रावृतपयोधर

तयास्नालिंगनसंश्लेषवतुकुचकुंभपार्श्वगलत्कुसुमपरिलांछलसमाघ्राणलीलया कृतनमस्कारेव मुकुरुत्रयमर्जनीयमितमुक्ताप्रालंबतया नि
वेदितहृदयो कलिकोत्क्षेपेण वमुकुरूपहारकुसुमस्तबकविधुतकरतलतया कथितकुसुमायुधप्रहारप्रहारवेदनेव मुकुर्गलितरसनानिग
डनिपतितचरणतया संयम्यार्पितेव मदनेन मुकुरस्खलितारुवेष्टितशिथिलदुकूला क्षितितलदोलायमानांशुकैकदेशाग्राद्रिलकुचा चकि
तपरिवर्त्तनत्रुटितत्रिवलीलतां स्रस्तचिकुरकपालसंकलनाकुलकमलाकरांशुक्षेपधवलीकृतकर्णोत्पलविलक्ष्यमाणस्मितसुधार
सरित्कपोला साचीकृतवदनमनेकरसतरंगिभंगुरं विलोकयन्ती तावदयत्नस्पृष्यावदुपसंहृतालोको लोहितो दिवसो बभूव। अथ हस्त
स्थितकमलिनीरागेणेव रज्यमाने राजीवजीवितेश्वरे सकललोकचक्रवालचक्रवर्त्तिनि भगवति प्रतिक्रमेण च दिनपरिलंबनरोष
रक्ताभिः कामिनीदृष्टिभिरिव संक्रमितशोणिम्नि हरेशोभिविषियाते जरठहारीतहरितवाजिनि रविविरहमीलितसरोजसंहतिषु हरितायमा
नेषु कमलवनेषु श्वेतायमानेषु कुमुदखंडेषु लोहितायमानेषु द्विसुरेषु नीलायमानेषु शर्वरीमुखेषु शनैः शनैश्च पुनर्दिनकररश्मीसमागमाशापि
श्रिवानुरागिणीभिः सोढवदीधितिभिर्दर्शनतानुपगते जगति गगनलक्ष्मीमालिंगिनि तत्कालाविर्भूते [illegible]

१४८

हृदयरागरससागरेणेवापूरिते संध्यारागेणजीवलोके कुसुमायुधानलदह्यमानचक्रवाकहृदयसहस्रेणेव मदनजनितमानिनीनयनवारिणि
विस्तीर्यमाणे नवतमालमालातिमिरे दिक्करिकराकीर्णशीकरासार इव स्वेदोपमानतारागणे गगनतले जाते जातायां चादर्शनक्षमायां वेला
यां सौधशिखरादवततार कादंबरी क्रीडापर्वतकनितंबाच्च चंद्रापीडः ततोऽचिराद्दिवसगृहीतपादः प्रसाद्यमान इव कुमुदिनीभिः कलुषमु
खीः कुपिता इव प्रसादयन्नाशाः प्रबोधाशंकयेव परिहृतमुषाः कमलिनीर्मीलनच्छलेन निशामिव परिचुम्बन्हृदयेन समुद्भवतो हि
णीचरणताडनलग्नमलक्तकरसमिवोदयरागं दधानस्तिमिरनीलांबरां दिवमिवाभिसारिकामभिसारिकामुपसर्पन्नतिवल्लभेन
या विकिरन्निव सौभाग्यमुद्गाढवानीक्षणोत्सवं कुसुमायास्मृतिः उदक्रीडत च कुसुमायुधाधिराज्ये कालपत्रे कुमुदिनीवधूव
ये विभावरीविलासदर्पणपत्रेष्वेतनानो धवलितदिङ्मंडलादिवोत्कीर्णभुवने चंद्रापीडश्चंदनपानिरंतरतमेव कुमुदमय्या
इव गृहकुमुदिन्याः कल्लोलधौतसुधाधवलसोपानेन तनुतरंगतालवृंतवातवाहिनि निद्राणहंसमिथुने विरहवाचालचक्र
वाकयुगले तीरकुमुदरत्नावलीनिःपर्यन्तलिखितपत्रलतमवगाहनार्थं सिंधुवारद्रुमोपशोभितं सरसि प्रक्षालितं कादंबरी

परिजनोपनीतं मुक्ताशिलापट्टं चंद्रापीडस्तमधिशिश्ये । तत्रस्थस्य चास्यागत्याकथयत्केयूरको देवी कादंबरी देवं द्रष्टुमागतेति । अथ ससंभ्रम
मुत्थायागच्छंतीमल्पसखीजनोपचितां तामपनीतामरराजचिह्नामिलत्राणिमिवैकावलीमाकाशतलगमनखेदेन चंदनरसेन धवलीकृततनुल
तामेककर्णार्पितस्तबकदंतपत्रामिंदुकलाकोमलं कर्णपूरीकृतं कुमुददलं दधानां ज्योत्स्नाशुचिनी कल्पद्रुमदुकूले बिभ्रतीं तत्कालरमणीये
न वेषेण साक्षादिव चंद्रोदयदेवतां मदलेखया दत्तहस्तावलंबां कादंबरीमपश्यत् । आगत्य च सा यथापीठे स्वल्पतां दर्शयंती प्राकृतेव परिजनो
चिते त्रासने समुपाविशत् । चंद्रापीडोऽपि कुमार्याभ्यनुज्ञातः शिलातलमेवेत्यसकृदनुबध्यमानोऽपि मदलेखया क्षितिमेवाभजत । सर्वा
सु चासीनासु मुहूर्तमिव स्थित्वा वक्तुमुपचक्रमे चंद्रापीडः । देवि इह षिमा चपनीते हासजने संभाषणादिकसादिप्रसादस्य नास्य वका
शः किंतु नेतावतोऽनुग्रहस्य नरवस्तु चिंतयन्नपि निपुणतरं नमात्मनो गुणलवमवलोकयामि यस्यायमनुरूपोऽनुग्रहातिरेकोऽति
सरलातवेयमपगताभिमानमधुरा सुजनता यदभिनवसेवकजनेप्येवमनुरुध्यते प्रायेण मामुपचाररार्थमदक्षिणं देवी मन्य

149

तेः धन्यः खलु ते परिजनो यस्योपरि नियंत्रणास्मात्। आज्ञासंविभागकरणेन चैतेन सजनेकस्यादरः परोपकारोपकरणं शरीरं त्वरणान
वलघुजजीवितमपत्रपेतस्मतिपत्तिभिरुपायनीकर्तुमागतायास्तेवयमेतेशरीरमिस्मेतज्जीवितमेतानींद्रियाणि एते वयमन्यतरस्य
रोपययपरिग्रहेणगरीयस्त्वमिति। अथैवंवादिनोस्य वचनमाक्षिप्य मदलेखासस्मितमवादीत्। कुमार एवं तु तियंत्रणया खिद्यते
सखीखलुकादंबरी किमर्थं वैवमुच्यते सर्वमिदमंतरेणापि वचनमनया परिगृहीतं किंपुनरमुनोपचारफल्गुनावचसा संदेह
दोलामारोप्यते इति स्थित्वा च कंचित्कालं कृतप्रस्तावा कथं राजा तारापीडः कथं देवी विलासवती कथमार्यः शुकनासः कीदृशी चो
ज्जयिनी कियत्साध्वानि च तान्कीदृग्भारतं वर्षं रमणीयो वा मर्त्यलोक इत्येवमशेषं पप्रच्छ। एवं विधाभिश्च कथाभिः सुचिरं स्थित्वोत्थाय
कादंबरी केयूरकं चंद्रापीडसमीपशायिनं समादिश्य परिजनं च शयनगृहं शिखरमारुरोह। तत्र च सितदुकूलवितानतलास्ती
र्णे शयनीयमलंचकार। चंद्रापीडोपि तस्मिन्नेव शिलातले निरभिमानतामभिरूपतामतिगंभीरतां च कादंबर्या निःकारणवत्सलतां च

महाश्वेतायाःसुजनतांचमदलेखायामप्रणानुनावतांचपरिजनस्यातिसमृद्धतांचगंधर्वलोकस्यरम्यतांचकिंपुरुषदेशस्यमनसाभावयन्केयूरके
णसंवाद्यमानचरणःक्षणादिवक्षणदांक्षपितवान्।अथक्रमेणकादंबरीदर्शनप्रजागरखिन्नःस्वप्तुमिवतालतमालतालीकंदलीकंदलि
नीप्रविरलकल्लोलानिलशीतलांवेलावनराजिमवततारतारापतिः।अन्यतोविरहविधुरस्यचकामिनीजनस्यनिःश्वासितैरिवोन्मलि
निमनीयन्तचंद्रिका।चंद्रापीडविलोकनारूढमदनेवकुमुदकलोदरलीननिशापंकजेषुनिपपातलक्ष्मीः।क्षणदापगमेचसकलकामिनी
कर्णोत्पलप्रहाराणामुत्कंठितेष्विवस्थानतांव्रजत्सुपांडुतनुषुवासगृहप्रदीपेष्वनवरतप्रकरक्षेपखिन्नानंगनिःश्वासविन्नमेषुबकुललता
कुसुमपरिमलेषुप्रभातमातरिश्वसुमंदरगिरिलतागृहगहनानिचभियेवमज्जंतीष्वरुणोदयोपप्लविनीषुतारकासु।क्रमेणचसमुद्गतेचक्र
वाकहृदयनिवासलग्नानुरागमिवलोहितंमंडलमुद्वहतिसवितरिशिलातलादुत्थायप्रक्षालितमुखकमलःकृतसंध्यानमस्कृतिर्गृहीत
तांबूलःकेयूरकविलोकयदेवीकादंबरीप्रबुद्धानवाक्वतिष्ठतीकिंवाचलगतप्रतिनिवृत्तेनचतेनदेवमंदरप्रासादस्याधस्तादंगणे

कां॰पू॰

१५० धवेदिकायामलम्भे तयासहावतिष्ठतइत्यावेदितेगंधर्वराजतनयामामार्वेद्रष्टुंमांजगाम॥ददर्शचधवलमनल्पकाष्टिकाभिरक्षमालिकापरि
वर्त्तनप्रचलकरतलाभिःपाशुपतव्रतधारिणीभिर्धातुरागारुणांबराभिश्चपरिव्राजिकाभिःपरिगततालपुंजवल्कललोहितवस्त्राभि
श्चरक्तपटव्रतवाहिनीभिःसितवसननिविडनिबद्धस्तनपरिकराभिश्चश्वेतपटव्यंजनाभिर्जटाजिनमौंजीवल्कलाषाढधारिणीभि
र्वर्णिचित्राभिस्तापसीभिःसाक्षादिवमंत्रदेवताभिःपठंतीभिर्भगवतस्त्र्यंबकस्यांबिकायाःकार्त्तिकेयस्यविश्रवसोजिनस्यार्या
विलोकितेश्वरस्यार्हतोविरिंचस्यपुण्याःस्तुतीरुपास्यमानामंतःपुरस्यार्हिताश्चसादरंनमस्कारैःप्रणामपरैरभ्युत्थानैरासन्नवेत्रासन
दानैश्चस्वदर्शनागतगंधर्वराजबांधववृद्धाःसंमानयंतीमहाश्वेतांपृष्ठतश्चसमुपविष्टेनकिन्नरमिथुनेनमधुकरमधुराभ्यांवंशाभ्यां
दत्तेतानेकलगिरागीयमानारकुहिश्चपठ्यमानेचसर्वमंगलमहाख्यासिमहाभारतेदत्तावधानांपुरोवर्तिनेचमणिदर्पणेतांबू
लरागबद्धकलिकांधकारितांमंलरंदशनज्योत्स्नासिक्तमुक्ताशंमधरंच्छिदपट्टपाटलमधुरंविलोकयंतीशैवलवयस्याकर्णपूर

शिव॰
१५०

शिरीषप्रेषितोत्तानविलोचनेन वदनमंडलेनामता भवनकलहंसेन प्रनालरणितेनेवाक्षिप्यमाणगमनप्रणामप्रवृत्तिर्णं च कादंबरीं च समुपसृ
त्य कृतनमस्कारस्तस्यामेव वसुधावेदिकायां विन्यस्तमासनं भेजे। स्थित्वा च कंचित्कालं महाश्वेताया वदनं विलोक्य स्फुरितकपोलोदरमंद
स्मितमकरोत्। असौ तु लावण्येनैव विदिताभिप्राया कादंबरीमब्रवीत्। सखि नवसाहसैश्चंद्रापीडश्चंद्रकांत इव चंद्रमयूखैरार्द्रीकृत
न शक्नोति वक्तुं जिगमिषति खलु कुमारः। एष तोऽदुःखमविदितवृत्तांतं च राजचक्रमास्ते। अपि च युवयोरियं स्थितयोरपि स्थि
तेयमितरनीकमलिनीकमलबांधवयोरिव कुमुदिनीकुमुदलाप्पयोरिव प्रीतिराप्रलयादवोऽभ्युज्ज्वलानानुजनवतीति। अथ कादंब
री सखि स्वाधीनोऽयं सपरिजनो जनः कुमारस्य सर्वस्यांतरात्मा क इवात्रानुरोधः इत्यभिधाय गंधर्वकुमारानाहूय प्रापयत कुमारं
स्वां भूमिमित्यादिदेश। चंद्रापीडोऽप्युत्थाय प्रणम्य प्रथमं महाश्वेतां ततः कादंबरीं तस्याः स्वप्रेमस्निग्धेन चक्षुषा मनसा च गृहसमालो
हे देवि किं ब्रवीमि बहुभाषिणो न श्रद्दधाति लोकः स्मर्तव्योऽस्मि परिजनकथास्वित्यभिधाय कन्यकांतःपुरान्निर्जगाम। कादंबरीवर्जमशे

षःपरिजनोनुगणोत्स्वाकृष्टःपरवशइवव्रजंतमाबहिस्तोरणादनुव्रज्य·निवृत्तेचकन्यकाजनेकेयूरकेणोपनीतंवाजिनमारुह्यगंधर्वकुमा
रकैस्तैरनुगम्यमानोहेमकूटात्प्रवृत्तोगंतुं·गच्छतश्चास्यविचरयतनयानकेवलमंतर्बहिरपिसैवसर्वाशानिबंधनमासीत्·तथाहित
न्मयेनमानसेनासन्नविरहदुःखानुपथलग्नामिवपृष्ठतःकृतमार्गगमननिरोधामिवपुरस्ताद्वियोगाकुलहृदयोत्कलिकावेशविलि
तामिवनभसिसम्यगालोकयितुंवदनंविरहातुरमानसामिवार्पितामुरःस्थलेतामेवमृगलोचनांददर्श·क्रमेणचप्राप्यमहाश्वेता
श्रमनमच्छोदसरस्तीरेसन्निविष्टमिंद्रायुधखुरपुटानुसारेणैवागतमात्मस्कंधावारमपश्यत्·निर्वर्तिताशेषगंधर्वकुमारकश्चसा
नंदेनसकुतूहलेनसविस्मयेनचस्कंधावारवर्त्तिनाजनेनप्रणम्यमानःस्वभवनंविवेश·संमानिताशेषराजलोकश्चवैशंपायनेन
पत्रलेखयाचसहैवंमहाश्वेतैवंकादंबर्येवंमदलेखैवंकेयूरकइत्यनयैवकथयाप्रायोदिवसमनैषीत्·कादंबरीरूपदर्शनदृष्टेवचा
स्यपुरेवप्रीतिमकरोद्राजलक्ष्मीः।तामेवचधवलेक्षणामावद्धरणरणकेनचेतसाचिंतयतोजाग्रतएवसाजगामरात्रिः।अपरेद्युश्चसमुत्थि

तेनभगवतिरत्नावास्थानमंउपगतस्तक्रतेनैवमनसासहैसेवमनीहारेणसहप्रविशंतंकेयूरकंददर्श॥ इत्यादेवचक्षितितलस्पर्शिनाकृतपादपतनमेह्येहीसुक्तामथ
ममपांगविसर्पिणाचक्षुषाततोहृदयेनततोरोमोद्गमेनपश्चाद्भुजाभ्यांप्रधावितःप्रसत्नमालिलिंगगाढंउपवेश्यचैनमात्मासनसमीपएवच॰पप्रच्छव
स्मितसुधाधवलीकृताक्षरंस्मरत्प्रीतिद्रवमयमिववचनमाददेतःकेयूरककथयकुशलिनीदेवीससखीजनासपरिजनाकादंबरीमहाश्वेताचेतिअ
सौतुतेनराजसूनोःप्रीतिप्रकर्षजन्मनास्मितेनैवस्नपितइवानुलिप्तइवसद्यएवापगताध्वखेदःप्रणम्याठततरमवोचत्ःअद्यकुशलिनीयामेवंदे
वःपृच्छतीसमभिधायापनीयार्द्रवस्त्रकर्पटावगुंठितंविसतंतुसंयतमुखमार्द्रचंदनपंकन्यस्तबालमृणालवलयमुद्गजलिनीपत्रपुटमदर्शयत्उद्घा
टयतश्चकादंबरीप्रहितान्यभिज्ञानानिदर्शयत्ःतद्यथा॰मरकतहरितानिव्यपनीतत्वंचिचारुमंजरीमांजिष्ठीरीणिपूगीफलानि॰शुककामिनीकपो
लपांडूनितांबूलीदलानि॰हरचंद्रखंडस्थूलशकलंचकर्पूरमितिबहलमृगमदामोदमनोहरंचमलयजविलेपनं॰अब्रवीच्चयुवराजमभिवंदुविनाकोमलांगुलि
विनिर्गतलोहितांशुजालेनांजलिनारेवमर्चयतिदेवीकादंबरीमहाश्वेताचसकंठग्रहेणकुशलवचसापर्यस्तशिखंडमालिकाज्योत्स्नास्नपितललाटेनचनम

152

स्कारेणमल्लेखपाक्षितिनलपटितसीमंतमकरिकाकोटिकोटेनसकलकन्यालोकप्रसवरागरजःस्पर्शेनचपाटलेनमेननमालिकासंदिग्धैंतवमहाश्वेतमा
धन्याःखल्वेतेयेषांनगतोसिचक्षुर्गोचरंतथानाम[illegible]ःसमसंभवतस्तेनुहिनशीतलाश्चंद्रमयाश्चगुणाविरहेविवस्वन्मयाश्चवृत्ताःस्कंदयंतिख
लुजनाःकथमपिदैवोपपादितायाम्लोसतिवास्याएवानीतदिवसायत्त्वयाविमुक्तंनिवृत्तमहोत्सवालसमिवपर्त्तनेगंधर्वराजनगरंजानासिच
मांकृतसकलपरित्यागांनथाप्यकारणपक्षपातिनंभवंतंद्रष्टुमिच्छतिअनिष्टंत्याजयितुमेवबलादिवहृदयमपिचबलवत्स्त्वस्यशरीरकादंबरीस्म
रतिचस्मेराननंस्मरकल्पंत्वाम्अतःपुनरागमनगौरवेणाईसीमंपुणवरमिमानिनींकर्त्तुमुदारजनार्होहिबहुमानमारोपयत्सवयसंसोढव्याचे
यमस्मद्विधजनपरिचयकदर्थनाकुमारेणभवद्गुणजनितेवजनयत्यनुचितंसंदेशप्रागल्भ्यमेषदेवस्यशयनीयेविस्मृतःशेषाहारःप्रहितइत्युत्तरी
यपटांतसंयतंस्वस्मस्तत्रविवरनिःसृतैरंशुसंतानैःसंसूच्यमानंविमुच्यचामरग्राहिण्याःकरेसमर्पितवान्अथचंद्रापीडोमहाश्वेताचरणाभ्यांनत
पःफलमिदंस्यस्वंपरिजनेप्यनुस्मरणादिकंप्रसादभारमतिमहांतमारोपयतिदेवीकादंबरीत्युक्त्वातत्सर्वंशिरसिकृत्वास्वयमेवजग्राहतेनचकादंबर्याःक

पोललावण्येनेवगलितेनस्मितालोकेनेवरसतलामुपनीतेनहृदयेनेवद्रुतेनगुणगणेनेवविस्यंदितेनस्पर्शवताह्लादिनासुरभिणाचविलेपनेनविलिप्यतमे
वकंठेहारमकरोत्‌आगृहीतताम्बूलश्चमुहूर्तादिवोत्थायवामबाहुनास्कंधदेशेसमवलंब्यकेयूरकमनूर्द्ध्वस्थितएवकृतनयथाक्रियमाणसंमानमु
चितंराजलोकंविसृज्यशनैःशनैर्गंधमादनंकरिणंस्प्रष्टुमयासीत्‌तत्रचस्थित्वाक्षणमेवतस्मिन्निर्जनरंध्रजालजटिलंसमृणालमिवशष्पमव
कीर्यवक्षःस्थलेतुरंगमंदुपगामिमुखवःप्रतस्थेगृहंश्चोभयतःकिंचित्किंचिदिवतिर्यग्वलितवदनःपरिजनंविलोकयांबभूवअथाविज्ञैःप्रतीहारैः
प्रतिनिषिद्धानुगमनेनिश्चलेसकुतूहलेपरिजनेकेयूरकद्वितीयएवमंदुरांप्रविवेशउत्सारणानयसंभ्रांतलोचनेषुप्रणम्यापसृतेषु
मंदुरापालेषुविश्रम्यधस्यपर्याणपरुंछनपटंकिंचिदेकपार्श्वगलितंसमीकुर्वन्नुत्सारयन्नेवचक्षुणितनेत्रत्रिभागस्यदृष्टिनिरोधिनींकुंकुमक
पिलांकेसरसटांखुरवारणीविन्यस्तचरणोलीलामंदंमंदुरादारुस्तंभदेहन्यस्तःसकुतूहलमुवाचकेयूरककथयमन्निर्गमादारभ्यकोवार्त्तां
तांगंधर्वराजकुलेकेनवाव्यापारेणवासरमतिनीतवतीगंधर्वराजपुत्रीकिंवाकरोन्मदलेखाकिमभाषतवामदलेखाकेवाभवन्नालापाःपरिजनस्यम

वतोयाकोव्यापार आसीत्। आसीदाकाविदस्मदागमयिलीकथा। केयूरकस्तु सर्वमाचचक्षे। देवस्य यतो निर्गते तुविहस्त्यसहस्रप्रमाणपटहकलकलमिव नूपु
रवकक्कणितेन कन्यकान्तःपुरे कुर्वती देवी कादंबरी सपरिजना सौधशिखरमारुह्य तुरगधूलिलेखाधूसरं देवस्यैव गमनमार्गमालोकितवती। निवेदि
तदर्शने च देवे मदलेखास्कंधनिहितभुजवल्लीलीलानंदितं तद्गुणोत्कथनलवैः श्रावयंतीव देहप्रभातैः सितातपत्रापदेशेन शशिनेवेर्ष्ययानिवार्यमाणरविकि
रणस्पर्शा सुचिरं तत्रैवास्थितवती। तस्माच्च कथमपि सखेदमवतीर्य क्षणमिवास्थानमंडपे स्थित्वोत्थाय स्वच्छंदं निषेव्यमानोपहारकुसुमा
नैर्मधुकरैर्जलधाराधवलनस्नानमयूरैः खेलत्सुरवानाममृतकलंगलद्भिर्वलयैः कंठबंधानिवोपपादयंतीभिः केकारवोत्कंठिताभवनशिखंडिनीभिरुपदिश्यमानकु
मधवलान्तरेण गरुडलतापल्लवान्मनसा च देवस्य गुणगणमनवलंबमाना तमेव क्रीडापर्वतकमागतवती यत्रास्थितवान्देवः। तमुपेत्य च देवेना
नमरकतशिलामकरिकाप्रणालप्रस्रवणसिच्यमानहरितलतामंडपे सीकरिणि शिलातले स्थितमत्र गंधोदकपरिमललीनालिजालेन शिलामरे
शेस्नातमत्र कुसुमप्रस्तीर्णतले गिरिनदिकातटे भगवान्चर्चितः शूलपाणिरत्र कल्पितशशधरलेखे च विस्फटिकशिलातले भुक्तमत्र संक्रांतचंदनरस
लांछने मुक्ताशैलशिलापट्टे सुप्तमिति परिजनेन पुनरुक्तं निवेद्यमानानि देवस्यैव स्थानचिह्नानि पश्यंती क्षपितवती दिवसं। दिवसावसाने च कथमपि मह शिवः

श्वेताप्रम्लाननिर्मलमर्पितमिवस्फटिकमणिवेश्मन्याहारमकरोत्‌अस्तमुपगते च रवावुदिते चंद्रमसि तत्रैव कंचित्कालं स्थित्वा चंद्रकांतमयी
वचंद्रोदयप्रत्यार्द्रीकृततनुश्चंद्रबिंबप्रवेशभयेनैव कपोलकपोलयोः क्षालिताकिंनरपरिचितपर्यंतलतकुंजलिते स्फटिकशिलातले स्थित्वा क्षणादाविमल
नखनिपतितनिशाशिप्रतिमामरगुरुणीवकक्षरुक्षिपंती लीलामंथरगमनपद्धतिपदानि शय्यागृहमगात्‌शयननिक्षिप्तगात्रयष्टिश्च
ततःप्रभृतिप्रबलया शिरोवेदनया विचेष्टमाना दारुणेन च दाहरूपेण ज्वरेणाभिभूयमाना केनाप्याधिना मंगलप्रदीपैः कुमुदाकरैश्च
चक्रवाकैश्च सार्द्धमनिमीलितलोचना दुःखदुःखेन क्षणदामनैषीत्‌तदुषसि च मामाकृष्य हृदयस्य वार्त्तोपनिकरेण सोपालंभमाहिवनी·
चंद्रापीडस्तदाकर्ण्य जिगमिषुरम्बोधश्रुतिवदनभवनान्निर्ययौ·आरोपितपर्याणं च तत्क्षणमेव तुरंगपरिचारकोपनीतमिंद्रायुधमारुह्य प
श्चादारोप्य पत्रलेखां स्कंधावारे स्थापयित्वा वैशंपायनमशेषपरिजनं निवर्त्य वाजिनमनुरंगारूढेनैव केयूरकेणानुगम्यमानो हेमकूटं ययौ
आसाद्य च कादंबरीभवनद्वारमवततार। अवतीर्य च द्वारपालार्पिततुरंगः कादंबरीप्रथमदर्शनकुतूहलिन्या च पत्रलेखयानुगम्यमानः प्रवि
श्य क्व देवी कादंबरी तिष्ठतीति संमुखागतमन्यतमं वर्षधरमप्राक्षीत्‌कृतप्रणामेन च तेन देव मत्तमयूरस्य क्रीडापर्वतस्याधस्तात्कमलवनदीर्घि

का·पू·
१५४

कातीदेवि म्बरीत्ष्ठितं हिमगृहमध्यास्तेइत्यावेदितेकेयूरकेणोपदिश्यमानवर्त्माप्रमदवनमध्येनगत्वाकिंचिदध्वानंमरकतहरितानांकदलीवनानामांपात
याशामलीकृतरविकिरणंहरितायमानंदिवसंददर्श।तेषांचमध्येनिरंतरनलिनीदलछन्नंहिमगृहकमपश्यत्।तस्माच्चनिष्पततामार्गेणशुकपिच्छलेनाछो
दजलेनेवसंवीतंवकुललताविद्धैर्मृणालवलयैरागरणकैरिवधवलितावयवमापांडुभिर्दैकस्रवणाश्रयैःसलीलंकीकृतैःकेतकीगर्भदलैरुपहसि
तदंतपत्रमालिखितचंदनललाटिकानिमुखारविंदानिबद्धसौभाग्यपट्टानीवदधानंसततचंदनबिंदुविशेषकांश्चदिवापिस्पर्शलोभस्थितेंदुप्र
तिबिंबानिवकपोलानुद्वहंतमपश्यत्।अशेषाशिशिरसौभाग्याभिःशैवलमंजरीभिःकनककर्णपूरंकर्पूरधूलिधूसरेणमलयजरसेनवलितेषुवकु
लावलीवलयेषुस्तनेषुन्यस्तनलिनीपत्रप्रावरणमनवरतचंदनचर्चापरिणामपांडुरैःसंतापरोपणार्दितचंद्रकैरेरिवकरैःकल्पितमृणालदंडा
निबिसतंतुमयानिचामराणिबिभ्राणमुत्तालैश्चकमलैःकुमुदैःकुवलयैःकदलीदलैःकमलिनीपलाशैःकुसुमस्तबकैश्चातपत्रीकृतैर्निवारितातपंज
लदेवतानामिवसन्मुखंवरुणश्रियामिवसमागमंशरदामिवसमाजंसरसीनामिवगोष्ठीबंधंशिशिरोपचारनिपुणंकादंबर्याःशरीरपरिचारिकाशयंप
रिजनमद्राक्षीत्।तेनचप्रेर्यमाणःपादनखपतनभयादिवत्वरितापसतेनदीयमानमार्गश्चंदनपंककृतवेदिकानांपुंडरीककलिकाघटितघंटिकानांविकसितासि

शिवः
१५४

तस्मिंदुवारकुसुममंजरीचामराणांलंबितस्थूलमल्लिकामुकुलहाराणामाबद्धलवंगपल्लववंदनमालिकानांदोलायमानकुमुददामध्वजानांमृणालवेत्रह
स्तामिर्गृहीतरुचिरकुसुमाभरणाभिर्मधुलक्ष्मीप्रतिकृतिभिरविहारपालिकाभिरधिष्ठितानांकदलीतोरणानांतलेनप्रविश्यसर्वतोनिस्तंदहरिद्र
षेवान्ःक्वचिद्गुमयलटनिखाततमालपल्लवप्रतनवनलेखाःकुंकुमद्रवधूलिवालुकापुलिनमालिनीश्चंदनरसेनप्रवर्त्समानाःकृत्रनदिकाःक्वचिन्निचु
लमंजरीरचितरक्तचामरगुणंजलार्द्रविलानकानांतलेषुशशिमणिकुट्टिमेषुआस्तीर्यमाणानिरक्तपंकजशयनानिक्वचिद्वेलारसेनसिच्य
मानानिस्पर्शानुमेयरम्यभित्तीनिस्फटिकभवनानिक्वचिच्छिरीषपक्ष्मकृतशाद्वलानांमृणालधारागृहकाणांशिखरमारोप्यमाणानांधाराकदं
बधूलिधूसरितानांयंत्रमयूरकाणांकदंबकानिक्वचित्सकर्पूररससिक्तैर्जंबूपल्लवैराबध्यमानाभ्यंतराःपर्णशालाःक्वचित्क्रीडितकृत्रिम
करिकलभयूथकाकुलीक्रियमाणाःकांचनकमलिकाःक्वचिद्गंधोदककूपेषुबद्धचंदनसुधापंककामपीठेसुस्थूलबिसलताघटितदंशरकाणिकृत
केतककलशद्रोणिकानिकुवलयावलीरज्जुभिर्बध्यमानानिपत्रपुटचटीयंत्रकाणिक्वचित्स्फटिकावलीवांतवारिधारालिखितेंदुरसुधाःसंचार्यमा
णमायामेघमालाःक्वचिदुपांतरूढपांडुरयवांकुरासुतरलतरुणमालतीकुड्मलदंतुरिततरंगासुहरिचंदनद्रववापिकासुशिशिरीक्रियमाणाहारयष्टीःक्वचि

का॰पू॰
१५५
155

मुक्ताफलक्षोदरचितालवालकाननवरनस्थलजलबिंदुदुर्दिनमुक्तजनःपुत्रकसहकारान्काचिद्विधुतपक्षनिक्षिप्तसीकरानीतनीहाराश्रमंतीर्यंत्रमयाःपत्रशकुन
श्रेणीःकचिन्मधुकरकिंकिणीपंक्तिपटुतरवाध्यमानाःकुसुमदामदोलाःकचिद्गुरुसारसरूतनिर्गतनोत्कालनलिनीछदच्छादितमुखान्यवेक्षमानान्शीतकुंभा
न्काचिद्घटितकदलीगर्भसंबंधानिबध्यमानानिचारुवंशलतानिकुसुमस्तबकानपत्राणिकाचित्करमृदितकर्पूरपल्लवरसेनाधिवास्यमानानिबिस
तंतुमयान्यंशुकानिकाचित्कदलीफलद्रवेणार्द्रीक्रियमाणांस्तालवृन्तकस्यकमंजरीकर्णपूरान्काचिदंभोजिनीदलव्यजनैर्वीज्यमानानुपलभाजनमाजःशीतो
षधिरसानन्यांश्चैवंप्रकाराञ्शिशिरोपकरोपकरणकल्पनाव्यापारान्परिजनेनक्रियमाणांश्चवीक्षमाणोहिमगृहकस्यमध्यभागंकुलगृहमिवसर्व
चंदनवनदेवतानांप्रभवमिवसर्वचंद्रमणीनांनिवासमिवसर्वमाघमासयामिनीनांसंकेतसदनमिवसर्वप्रावृषांग्रीष्मापनोदोद्देशमिवसर्वनिम्नगानां
वडवानलसंतापापनोदनिवासमिवसर्वसागराणांवेधुतदहनदाहप्रतीकारस्थानमिवसर्वजलधाराणांउदयमिवहिमवतोजलक्रीडागृहकमिव
प्रचेतसोजन्मभूमिरिवसर्वचंद्रकलानांअंबुधिरिवदुःसहदिवसातिवाहनस्थानमिवकुमुदिनीनांहरहुतभुक्नाशनेनिर्वापणक्षेत्रमिवमकरध्वजस्यादिन
करकरैरपिसर्वतोजलयंत्रधारासहस्रसमुत्सारितैरनिशीतस्पर्शमयमिवदंतैरिवपरिहतमनिलैरपिकदंबकेसरोत्करवाहिभिःकंटकितैरिवानुगतंकदलीवनैरपिपवनत

शिव:
१५५

लितदलैर्गंधजनितवेपथुभिरिव परिवारितमलिभिरपि कुसुमामोदमदमुखरैरारक्तदंतवीणैरिव वाचालितं लताभिरपिनि
रंतरमधुकरपटलजटिलाभिर्गृहीतनीलप्रावरणमिव विराजितमासमाद· क्रमेण च तत्रानवरतबहिश्वासितबहलेन पिंडहार्येण
केपलिप्यमाणोऽतिशीतलेन स्पर्शेनामन्यत· आत्मनो मनश्च दमयं कुसुममयानीद्रियालिज्यो तनामयान्यंगानि मृणालिकाम
यीधियमगणयच्च हारमयान कृष्णिरणाश्चंदनमयमातपंकर्दरमयं पवनमुदकमयं कालं तुषारमयं त्रिभुवनमेवंविधस्य चत
स्यैककदेशे सखी कदंबकपरिहृताशेषसखिरित्सिचयामिव भगवतीं गंगां हिमवतोऽगृहाचलगतां कुल्याश्च मिश्रमितेन कर्पूररस
स्रोतसाकृतपरिवेषा मृणालदंडमंडपिकाधस्तले कुसुमशयनमधिशयानाहारांगदवलयरसनानूपुरैर्मृणालमयैर्निगडैरिव बसं
यतामीर्ष्यया मन्मथेन चंदनधवले स्पष्टामिव ललाटे शशलांछनेन बाष्पपरिवाहिनि चुंबितामिव चक्षुषि वरुणेन वर्द्धितनिश्वास
मरुति दृष्टामिव मुखे मातरिश्वना संतापप्रतप्तेषु धवलितामिवांगेषु पतंगेन कंदर्पदाहदीपितेग्रहीतामिव हृदये कृतभुजा स्वेद

निपच्चिचन्द्रामिव वपुषि जलेन दैवतैरपि विलुप्यमानसौभाग्यामिव सर्वशोकहृदयेन सह प्रियतमसमीपमिवोपगतैः रंगैरुपजनितसौर्व
ल्यामाश्यानचंदनपांडुरं च रोमांचमनवरतहारस्पर्शलग्नमुक्ताफलनिकरलघुं जमिवोद्वहंती स्वेदसीकरिणी च कपोलपाली पत्त्रपवनेन वी
जयद्भिरनुबध्यमानामिवावतंसमधुकरैरवतंसमधुकररवदहनदग्धमिव श्रोत्रमपांगनिर्गतेनाश्रुस्रोतसा सिंचंतीमगतिप्रवृत्तस्वेदाश्रु
णो निर्वाहप्रणालिकामिव कर्पूरकदंबकीकलिकांकुरैः कलयंतीमायतश्वासनिधुतितरलितेन च संतापभयपलायमानेन देहप्रभावि
तानेनेवांशुकेन विमुच्यमानकुचकलशं आपात्यमानचलचामरप्रतिबिंबं च कुचकलशयुगलंभियानिकगमनौत्सुक्यकृतपक्षामि
वकरतलेनानिरुंधंती मुहुर्मुहुर्भुजलतया तुषारशिलाशालभंजिकामालिंगंती मुहुः कपोलफलकेन कर्पूरपुत्रिकामाश्लिष्यंती मुहुश्च
रणारविंदेन चंदनपंकप्रतियातनामास्पृशंती स्तनसंक्रांतेनात्ममुखेनापि कुतूहलिनेव परिवृत्य विलोक्यमानां कर्णपूरपल्लवेनापि स्वप्र
तिबिंबपल्लवशायिनासोत्कंठेनेव चुंब्यमानकपोलफलकां हारैरपि मुक्ताफलैरभिमर्दनपरवशैरिव प्रसारितकरैरालिंग्यमानां मलिदर्पणमुर

सन्निहितं नोदितव्यमेतदिति जीवनस्पर्शसमयं शशिनमिव कांक्षंती कुमुदिनीमिव सन्मुखागतमदवदनगंधवारऽलप्रसारितकृशं
प्रस्थितामिवाभीष्टदक्षिणाशातमगागमनां मदनाभिषेकवेदिकामिव कमलावृतनचंदनधवलपयोधरकलशावष्टब्धपार्श्वां आका
शकमलिनीमिव स्वच्छांबरतलदृश्यमानमृणालकोमलोरुकरलां कुसुमचापलेखामिव मदनारोपितगुणकोटिं कान्तरां मधुमास
देवतामिव शिशिरहारिणीं मधुकरीमिव कुसुममार्गणाकुलां चंदनविलेपनामनंगरागिणीं च बालां मन्मथजननीं चूतमृणालिनीमभ्य
र्थितां तुषारस्पर्शां च कादंबरीं व्यलोकयत। अथ तस्याय पादर्शनमागतस्यागतमचंद्रापीडागमनमावेदयंतं परिजनमुत्तरीताग्रकेण चक्षुषा
विलोक्य कथय किं सत्यमागतो दृष्टः त्वया प्रियस्य ध्वनिकास्मा विनिप्रतिमुखं निक्षिप्त नासाक्षुरं पप्रच्छ। वर्द्धमानधवलिम्ना चक्षुषा दृष्ट्वा
च तं मुखमापतं तं हृदादेव वरारोहा न शशाक रिलीरोरुस्तंभविष्टतापि चेष्टमानांगी कुसुमशयनपरिमलोपगतैः परवशामुखरैः
मधुकरकुलैरिवाछाद्यमाना संभ्रमच्युतोत्तरीया पाकवचहारकिरणातुरश्मीलिकत्तुमिछंती मणिकुट्टिमनिहितेन वामकरतलेन दृष्टा

वलंबनं निजप्रतिमामिव यान्तीमात्मनः स्रस्तकेशकलापसंयमनश्रमितेन गलत्स्वेदसलिलेन दक्षिणकरेण स्तनमध्ये वाताननमर्पयंती वलि
तत्रिकृताग्रत्रिवलीतरंगितरोमराजितया निष्पीड्यमानेव सरसेनानंगेनांतःप्रविष्टललाटिकाचंदनरसमिश्रमिव चक्षुषा क्षरंती शि
शिरमानंदजलमानंदबिंदुकारितेणिकया घटितावतंसस्फलिधस्सरं प्रियप्रतिमाप्रवेशलोभेनेव कपोलफलकं प्रक्षालयंती ललाटिका
चंदनभरेणेव किंचिदधोमुखी तत्क्षणमपांगभागपुंजिततारकया तन्मुखलग्नयेव दीर्घया दृष्ट्या कृष्यमाणा कुसुमशयनादुत्तस्थौ। चं
द्रापीडस्तु समुपसृत्य पूर्ववदेतां महाश्वेताप्रणामपुरस्सरं दर्शितविनयः प्रणनाम। कृतप्रणामायां च तस्यां पुनस्तस्मिन्नेव कुसुमशयनं
समुपविष्टायां प्रतीहार्या समुपनीतां जांबूनदमयीमासंदिकां रोचिष्णुरत्नप्रत्युप्तपादां पादेनैवोत्सार्य क्षितावेवोपाविशत्। अथ केयूरकोदे
विदेवस्य चंद्रापीडस्य प्रसादभूमिरेषा पत्रलेखा नाम तांबूलकरंकवाहिनीत्यभिधाय पत्रलेखामदर्शयत्। अथ कादंबरी दृष्ट्वा तामहो मा
नुषीषु पक्षपातः प्रजापतेरिति चिंतयां बभूव। कृतप्रणामां च सादरमेह्येहीत्यभिधायात्मनः समीपे सकुतूहलपरिजनदृश्यमानां पृष्ठतः

समुपावेशयत्। दर्शनादेवापारूढप्रीत्यतिशयासुकुमारेष्वंगे सोपग्रहं करकिसलयेन पस्पर्श। चंद्रापीडस्तु सपदि कृतसकलागमनोचितो
पचारस्तदवस्थां चित्ररथतनयामालोक्याचिंतयत्। अतिदुर्विदग्धं हि मे हृदयमपापिनश्चइधानि। भवतु एतदभितावदेनां निपुणालापेने
तिप्रकाशमब्रवीत्। देवि जानामि कामरतिं निर्मितां कुसुमशरेणोपमतिचलसंतापतंत्रो व्याधिः सुतनु सत्यं न तथा त्वामेष व्यथयति यथास्मानि
छामि देहदानेनापि स्वस्थामनंगभवतीं कर्तुं उत्कंठितं उत्कंपमानस्य कुसुमेषुपीड्यापतितामवेत्तमालस्य पततीव मे हृदयमनंगदेव भस्म
ने भुजलतेगाढसंतापतया च दृष्टाव हरिस्थलकमलिनीमिव रक्तां तामरसांकुरिवितायां च त्वयि परिजनोपि पिसोऽनवरतहृदाश्रुबिंदुपातेन
वर्त्तते। मुक्ताभरणलतां त्वरणास्वयंवरार्हलिमंगलप्रसाधमानि कुसुमशिलीमुखकांतर्हिताशोभते तथालनेति। अथ कादंबरी बालतया स्व
भावमुग्धापि कंदर्पेणोपदिष्टयेव प्रज्ञया तमशेषमस्य व्यक्ताया हारस्य च्छितमर्थं मनसा जग्राह। मनोरथानां ला वतीभूमिमसंभावयंती शा
लीनतां चावलंबमाना तूष्णीमेवासीत्। केवलमुत्पादितान्यव्यपदेश्यत स्मेरांतमानना मोहमधुकरपटलांधकारितं दृष्टमिव स्मितालोक

मकरोत्। ततो मदलेखा प्रत्यवादीत्। कुमार किं कथयामि दारुणो यमकथनीयः खलु संतापोपि च कुमारभावोपेतायाः किमिवास्या यन्न संतापा
य। तथाहि मृणालिन्याः शिशिरकिसलयमपि कृताग्नायते ज्योत्स्नापि आतपायते ननु किसलयतालवृंतवातैर्मनागपि जायमानं किं न पश्यसि खे
दं धीरत्वं प्राणसंधारणहेतुरस्या इति कादंबरीहृदयमेव नववमदलेखालापमस्य प्रत्युत्तरीचकार। चंद्रापीडोप्युभयथा घटमानार्थसंदेहदो
लारूढेनैव चेतसा महाश्वेतया सह प्रस्तुपचयचतुराभिः कथाभिर्महांतं कालं स्थित्वा तथैव महता यत्नेन मोचयित्वा आत्मानं स्कंधावारगमना
य कादंबरीभवनान्निर्ययौ। निर्गतं च तुरंगमारूढं तं पश्चादागत्य केयूरकोऽभिहितवान्। देव मदलेखा विज्ञापयति देवि खलु कादंबरी प्र
थमदर्शनजनितप्रीतिः पत्रलेखां निवर्तमानामिच्छति पश्चाद्गमयितुम्। श्रुत्वा देवः प्रमाणमित्याकर्ण्य चंद्रापीडः केयूरक धन्या पत्रलेखा स्पृहणीया च प
त्रलेखायामेवमनुबध्नाति दुर्लभो देवीप्रसादः प्रवेश्यतामित्यभिधाय पुनः स्कंधावारमेवाजगाम। प्रविशन्नेव पितुः समीपादागतमभिज्ञाततर
मालेखवक्रमद्राक्षीत्। दृष्ट्वा तुरंगमस्थ एव प्रीतिविस्फारितेन चक्षुषा दूरादेवापृच्छत्। अंग कच्चित् कुशली तातः सह सर्वेण परिजनेनांबा च सर्वांतःपु

रैदृशि। अथासावुपसृत्यप्रणामानंतरंदेवयथाज्ञापयसीत्यभिधायलेखद्वितयमर्पयांबभूव। युवराजस्तुशिरसिकृत्वास्वयमेव
चतदुन्मुच्यविस्तार्यक्रमशः पपाठस्वस्त्युज्जयिनीतः सकलराजन्यशिखंडशेखरीकृतचरणारविंदः परममाहेश्वरोमहाराजाधिराजो
देवस्तारापीडः सर्वसंपदामायतनंचंद्रापीडमुदंशुचूडामणिमरीचिचक्रचुंबितमुत्तमांगेचुंबन्नानंदयति। कुशलिन्यः प्रजाः किंतुकिया
नपिकालोभवतोदृष्टस्यबलवदुत्कंठितंनोहृदयंदेवीचसहांतःपुरैर्ग्लानिमुपनीता। अतोलेखवाचनविरतिरेवप्रयाणकारणतांनेतव्ये
ति। शुकनासप्रेषितेद्वितीयेप्यमुमेवार्थंलिखितमवाचयत्। अस्मिन्नेवावसरेवैशंपायनोपिलेखद्वितयमपरमात्मीयमस्मादभिन्नार्थ
मेवादर्शयत्। अथयथाज्ञापयतितातइत्युक्त्वातथैवचतुरंगाधिरूढः प्रयाणपटहमदापयत्। समीपेस्थितंचमहताश्वीयेनपरिवृतंमहाब
लाधिकृतंबलाहकपुत्रंमेघनादनामानमादिदेश। भवतापत्रलेखयासहागंतव्यंनियतंकेयूरकस्तामादायैतावतींभूमिमागमिष्य
तितन्मुखेनविज्ञाप्यप्रणम्यदेवीकादंबरी· नन्वियंसात्रिभुवनवंदनीयानिरंतरोधानिः परिचयाच्चतुर्यहाप्रकृतिर्मर्त्यानांयेषामकांड

का॰पू॰

१५९ 159

विसंवादिन्यःप्रीतयोनगणयंतिनिष्कारणवत्सलतामेवगछतामपालनेनोनीतःस्नेहःकापटकूटजालिकतांप्रापितात्मकिमलीककाकुकरणकुशलतां
पातितनमुपचारमाचमधुरंवदन्त्यायामर्पणंप्रकटितंवान्भवसयोर्भिन्नार्थतमास्तांतावदात्मावाग्भस्थानाहितप्रसादादिव्ययोग्यादेव्यपिवक्तव्यतांनीता
जनयंतिहिपश्चात्तापमत्यन्तमभिपातिताव्यर्थाःप्रसादाःमन्तव्येमहतांनखलुतथादेवीप्रतिभवलज्जाजातिमात्रमंपरंमेहृदयंयथामहाश्वेतांप्रतिनि
यतमेनामलीकाध्यारोपणेवर्णितास्मिगुणसंभारामस्थानपक्षपातिनीमसकृदुपालप्समानेदेवीतत्किंकरोमिगरीयसीगुरोराज्ञाप्रभवतिदेहमात्रकस्य
हृदयेनहेमकूटनिवासिनाव्यसनिनालेखितंजन्मांतरसहस्रसदास्मपत्रलेखानन्दनमस्याःएवकिंकरोस्मिकेवलंदेवीप्रसादेनगंतुंसर्वथागतो
स्मिपितुरादेशाऽनुज्ञापिनीप्रसंगतोजननकथाकीर्त्तनेषुस्मर्तव्यःखलुचंद्रापीडश्चंडालोमाचैवंमंस्याःयथाजीवन्नुन्नेदेवीचरणारविंदवंदनानं
दमननुचपस्यास्यतिचंद्रापीडइतिमहाश्वेतायाश्चप्रदक्षिणंशिरसापादौवंदनीयौमदलेखायाश्चकथनीयःप्रणामपूर्वमशिथिलःकंठमहोग्रा
हमालिंगनीयाचतमालिकाअस्मद्वचनादशेषःप्रष्टव्यःकुशलंकादंबरीपरिजनोरचितांजलिनावभगवानामंत्रणीयोहेमकूटइत्येवमादिसंदिश्यतस्तुहृदंसा शिवः

साधनमक्लेशयता शनैःशनैर्गन्तव्यमित्युक्त्वा वैशंपायनं स्कंधावारे न्ययुंक्त स्वयमपि च तथारूढ एव गमनहेलाहर्षहेषारवकंपितकैलासेन खुरतांडव
खंडितभुवाकांतकुंतलतावनवाहिनानरूणतुरगप्रायेणाश्वसैन्येन तमेवलेखहारकं पर्याणलग्नमभिनवकादंबरीवियोगशून्येनापि हृदयेनोज्ज
यिनीमार्गं पृच्छन्नतस्य च क्रमेण चातिप्ररूढप्रकांडपादपप्रायया मालिनीलतामंडपैर्मंडिततरुषंडया गजपतिपातितपादपपरिहारवक्री
कृतमार्गया जनजनितत्रणपर्णकाष्ठकोटिकूटप्रकटितवीरपुरुषघातस्थानया महापादपमूलोत्कीर्णकांतारदुर्गायातनबितपथिकखंडितस्तो
ञ्जितामलकीफलनिकरया विकासितमंजरीरजोविधुरितनटैस्तटतरुबद्धपटच्चरकर्पटध्वजचिह्नैरिरिष्टिकाश्रितशुष्कपल्लवविस्तरानुमि
तपथिकविश्रामैर्विश्रांतकार्पटिकप्रस्फोटितमधुलिप्सरकिसलयलांछितोपकंठैः पत्रसंकरासुरभीकृता शिशिरपंकिलविवर्णस्वादुजलै
र्नातितिर्यग्धियधितपर्णपुटत्रणपुलीचिह्नानुमेयैर्जरत्कांतारकूपैरसुरभिसलिलतयाऽनभिलषितोद्देशया मधुबिंदुस्पंदिसिंदुवारवनराजिर
जोधूसरितनीराभिश्च कुब्जकलताजालकैर्जटिलीकृतसैकताभिरध्वगोत्खातवालुकाकूपिकोपलभ्यमानकलुषस्वल्पसलिलाभिःशुष्कगिरिनदिका

भिर्विषीकृतांतरालया कुक्कुटकुलकौलेयकरहितानुगीयमानगुल्मगहनया आमेकपाश्त्यया दिवसमटव्यागतापथिणेतेरविविंवे विंवाकृणतपविसरेवा
सरेनिःशेषीकृतकदंबशाल्मलीपलाशबकुलैः स्थिरतरशेषैकपक्वववविडंबिनातपचैः पादपैरूर्ध्वस्थितप्ररोहस्थूलस्थलस्याकुम्भकर्णधिजाटिलैर्भुर
शिलालकपिलपक्ववेणुविटपच्छन्नरचितहस्तिनिर्मृगजन्यकृताल ऐणुरूपैर्विपाकैः फलिनैः प्रियंगुप्रायैरटवीद्रुमैर्विरलीकृतवनप्रदेशे अजि
रप्ररूढरक्तचंदनरसेन जिह्मलतालोहिनीभी रक्तपताकाभिः केशकलापकांतिना चकास्ता चामरेण बहलेन प्रत्यग्रविशसितानां जीवानां
निवावयवैरुपरचितस्थंडिलमंडनं स्फटकपाटितबुद्बुदपुटार्द्धचंद्रखंडखचितशिखरं लोहस्थूरवलावलंबमानघर्घररवघोरघंटया च घ
टितकेसरिसटारुचिरचामरया कांचनाचिस्फलिकपालिखिननमस्पलमितस्ततः पथिकपुरुषोपहारमार्गमिवावलोकयंतं महांतरं कंथं
जंदूरत एव द्रष्टवं॰ तदभिमुखस्य किंचिदध्वानं गत्वा केतकीसूचिखंडपांडुरेण वनद्विरददंतवाटेन परिवृतां लोहतोरणेन च रक्तचामर
वलिपरिकरां कृष्णायससर्पणमंडलमालां शबरमुखमालामिव कपालांकुरभीषणविन्यासेन सनाथीकृतद्वारदेशाम् अभिमुखप्रतिष्ठितेनिहितर

कचंदनहस्तनयारुधिरारुणयमकरतलास्फालितेनेवशोणितलोलशिवालिह्यमानलोहितलोचनेनलोहमहिषेणाध्यासितांजनशिलावे
दिकांक्वचिद्रक्तोत्पलैःशबरनिपातितानांवनमहिषाणामिवलोचनैःक्वचिद्गस्तिकुड्मलैःकेसरिणामिवकरजैःक्वचित्किंशुककुसुमकुड्मलैःशा
र्दूलानामिवसरुधिरैर्नखरैःकनपुण्यपुष्पभकरामन्यचांकुरितानामिवकुटिलविषाणकोटिकूटैःपल्लवितामिवसरसजिह्वाच्छेदशतैःकुसु
मितामिवरक्तनयनसहस्रैःफलितामिवमुंडमंडलैरुपहारहिंसांदर्शयंतीशाखांतरालनिरंतरनिलीनरक्तकुक्कुटकुलैःस्वमायाकालदर्शि
तकुसुमस्तबकैरिवरक्ताशोकविटपैर्विभ्रमितानांगणांबलिरुधिरपानलंपटयावेतालैरिवतालैर्दीर्यमानफलमुंडोपहाराशंकांजनयत्कंपितैरि
वकदलिकावनैर्भयोत्कंटकितैरिवश्रीफलतरुषंडैरध्यासोद्देकेशैरिवखर्जूरवनैःसमंतादुन्नीतांवनकरिकुलकुंभविदलितमुक्ताफ
लानिरुधिरारुणानिबलिसिक्थमुग्धलकवाकुयस्तमुक्तानिविकिरद्भिरंबिकापरिग्रहदुर्ललितैःक्रीडद्भिःकेसरिकिशोरकैरभ्यलंकृतोद्देशांप्र
ज्वलद्रुधिरदर्शनोद्धूतदर्पापतितेनेवप्रतिबिंबितेनालक्तकाग्रेणसविग्रांतरीकृतैःक्षतजजलप्रवाहैःपिच्छिलीकृताजिरांअवलंबमानदीपप्रभरक्तांशु

१६१ 161 केतनग्रथितशिखिगलवलयां नलिनपिष्टपिंडपांडुरितघनघंटामालभारिणा ताम्रपुष्पसिंहमुखमध्यस्थितस्थूललोहकटकदंतुरसर्व
र्गलं लसत्पीतनीललोहितदर्भरज्जुकृतकुटुमालं कपाटपट्टद्वयं दधानेन गर्भगृहद्वारदेशेन दीप्यमानाम् अंतःपिंडिकापट्टपातिभि
र्मलर्वपशुजीवितैरिव शोणितलवप्रगतैरलक्तकपटैरविहितचरणमंडलां पतितनरूपरूचामरप्रतिबिंबानां च शिरश्छेदलग्नकेशजाल
कानामिव परस्परपरिदृश्यमानतीभांजी व विशसनकशस्त्राणां प्रभाभिर्बद्धबहलांधकारतया पातालनिवासिनीभिर्वोपलक्ष्यमाणां रक्तचंद
नखचितस्फुरत्तुलक्षितैश्च बिल्वपत्रदामभिर्बालकमुंडमालं वैरिबलतमंडनांशोणितकर्दमबहुलतां च नैश्चयपप्रहारपटहपटुरसित
रसोल्लसितरोमांचैरिव चामैः क्रूरताभुजंगहंती चारुचामीकरपट्टभासुरेन चलता कटेन शाववस्तुदशीरचितासिं हरितिलकबिंदुना दाडि
मीकुसुमकर्णपूरप्रभासेकलोहितायमानकपोलभित्तिना रुधिरमांसबलालुलिताधरपुटेन भ्रुकुटीकुटिलबभ्रुलोचननयनेन मुखेन कु शिवः
सुंभपाटलितदुकूलबलितया च देहलतया महाकालाभिसारिकावेषमिव बिभ्रतीं संपिंडितनीलतनुगुलगुलधूमाकुलीकृताभिश्च १६१

प्रचलंतीभिर्गर्गरीपिकालनाभिरंगुलीभिरिवमर्शयानुवर्तेनहितलवालोहिनीभिः स्कंधपीठकंडूयनवलितत्रिशूलदंडहस्तापराभवनमहिष
मिवनर्त्तयंतीप्रचलकूर्चधरैः स्थाणुभिरपिधूतबालैरिवस्फुरद्धरस्फुटैः खुभिरपिजपपरैरिवकृष्णाजिनप्रावृतांगैःकुरंगैरिवप्रतिशयितैर्वि
वज्वलितलोहितमूर्द्धरत्नरश्मिभिः कालसर्पैरपिशिरोधृतमणिप्रदीपकैरिवाराध्यमानां सर्वतः कठोरवायसगणेन च रटता स्तुतिपरेणेव
स्तूयमानां स्थूलस्थूलैः शिराजालकैर्गोधागोलिकाकृकलासकुलैरिव दग्धस्थाणुवाशंकया समारूढैर्गवाक्षितेनालक्ष्मीसमुत्सानलक्ष
णस्थाने शिवविस्फोटव्रणविंदुभिः कल्माषितसकलशरीरेण कर्णावतंससंस्थापितया च चूडया स्रुम्नोसमालिकां दधानेनांबिकापादपत
नश्यामललललाटवर्द्धमानार्बुदेन वातिकदत्तसिद्धांजनस्फुटितैकलोचनतया त्रिकालमितरलोचनांजनहरानादरस्तृणीकृतदारुशला
केन प्रत्यहं कटुकालाबुस्वेदप्रारब्धदंतुरतामतीकारेण कथंचिद्दस्थानदत्तेष्टकाप्रहारतया स्रुतैकतुजोपशांतमर्दनव्यसनेनोपर्युपर्य
विभ्रांतकटुकवर्तिप्रयोगवर्द्धिततिमिरेणायसमेदसंगृहीतवराहरस्त्रेण इंगुदीकोशकृतौषधांजनसंग्रहेण सूचीसूत्रशिरासंकोचितवाम

करांगुलिनाकौशेयककोशावरणस्थापितव्रणितचरणांगुष्ठकेनासम्यक्कृतरसायनानीताकालज्वरेणजरसंगतेनापिदक्षिणापथाधिराज्यवरमार्थ
नाकदर्थितदुर्गेणशिक्षितश्रमणादिष्टतिलकाद्यविभवप्रत्याशेनहरितपत्ररसांगारमषीमलिनशंबूकवाहिनापट्टिकालिखितदुर्गास्तोत्रेणधू
मरक्तालक्ताक्षरतालपत्रकुटुंबकेनचमंत्रपुस्तिकासंग्राहिणाजीर्णमहापाशुपतोपदेशलिखितमहाकालमतेनाविर्भूतनिधिवादव्याधिनासं
जातधातुवादवायुनालग्नासुरविवरप्रवेशेनप्रवृत्तयक्षकन्यकाकामितमनोरथव्यामोहेनवर्द्धितांतर्द्धानमंत्रसाधनसंग्रहेणश्रीपर्वता
श्चर्यवार्त्तासहस्राभिज्ञेनासकृदभिमंत्रितसिद्धार्थकप्रहतिधाविततैःपिशाचगृहीतकैःकरतलताडनाचिपिटीकृतश्रवणेनासंपुटेना
प्रभुत्वशैवाभिमानेनदुर्गृहीतालाबुवीणावादनोद्वेजितपथिकपरिहृतेनादिवसमेवमशककाणितानुकारिकिमपिकंपितोत्तमांगंगायता
स्वदेशभाषानिबद्धभागीरथीभक्तिस्तोत्रनर्त्तकेनगृहीततुरगब्रह्मचर्यतमान्यदेशगतोषितासुजरत्प्रव्राजिकासुबहुकृत्वःसंयुक्त
स्त्रीवशीकरणचूर्णेनातिरोषणेनतयाकदाचिद्दुर्म्मस्तास्फुटितपुष्पिकापातोत्सादितक्रोधेनचंडिकामपितुरवभंगिविकारैर्दर्शनमुपहसताक

दाचिन्निवार्यमाणाश्वरुपिताध्वगारब्धवक्रबाहुयुद्धपातभग्नपृष्ठकेन कदाचित्कृतापराधबालकपलायनामर्षपश्चात्प्रधावित स्खलिता
धोमुखनिपातोपलस्फुटितशिरःकपालभुग्नग्रीवेण कदाचिज्जनपदकृतनवागतापरधार्मिकादरमत्सरोद्भूतात्मनानिःसंस्कारतया यत्किंचनक्रा
रिणा खंजतया मंदं मंदं संचारिणा वधिरतया संज्ञाव्यवहारिणा रात्र्यंधतया दिवाविहारिणा लंबोदरतया भक्ताहारिणा अनेक शः फलपात
नकुपितवानरनखोल्लेखच्छिद्रितनासापुटेन बहुशः कुसुमावचयचलितभ्रमरसहस्रदंशशीलीकृतशरीरेण सहस्रशः शयनीयकृतासंस्कृ
तभस्मन्येव कुलक्षालसर्पदृष्टेन शतशः श्रीफलतरुशिखरच्युतिचूर्णितोत्तमांगेन असकृदृक्षच्छन्नदेवमातृगृहवासिऋक्षनखजर्जरितकपोलेन स
र्वदा वसंतक्रीडाजनेनोत्क्षिप्तखंडस्वद्धायेपितदुद्दाली विवाहशाला विडंबनेन अनेकायतनप्रतिशायितनिष्फलोत्थानेन दौस्थित्यमपि विविध
व्याधिपरिमितं स कुटुंबमिवोद्वहता सर्वतामपि बहुव्यसनमनुगतां प्रसूतामेतापस्तामिव दर्शयता क्रोधमप्यनेकदंडपातनिर्मितबहुगात्र
गंडुकं पुलकितमिव प्रकाशयता क्लेशमपि सर्वावयवज्वलितदीपिकादाहव्रणविभावितं बहुमुखमिव प्रकटयता परिभवमपि निष्कारणोत्कुष्ट

जनपदत्तपरिस्कृष्टशंतसंभ्रमाहमिवदधानेनशुष्कवनलताविनिर्मितबृहत्कुसुमकरंडकेनवेल्लुलतारचितपुष्पपातनांकुशेनतत्क्षणमपि
अमुक्तबालकंबलखंडरवोलेनजरद्रविडधार्मिकेणाधिष्ठितांचंडिकामपश्यत्।तस्यामेवचवासमरचयत्।अथावतीर्यचतुरगात्प्रविश्य
भक्तिप्रवणेनचचेतसाप्रणनामकृतप्रदक्षिणश्चपुनःप्रणम्यप्रशांतादरोदर्शनकुतूहलेनपरिभ्रमन्नुच्चैरारटंतमाक्रोशंतंद्रविडधार्मिकमेक
देशेददर्श।दृष्ट्वाकादंबरीविरहोत्कंठोद्वेगदूयमानोपिचसुचिरंजहास।न्यवारयच्चानेनसार्द्धंसंरब्धकलहाननुपहसतःस्वसैनिकाननुपसां
त्वनैश्चकथमपिप्रियालापशतानुनयनैःप्रशममुपनीयक्रमेणजन्मभूमिंजातिंविद्यांचकलत्रमपत्यानिविभवंवयःप्रमाणंप्रव्रज्यायाश्च
कारणंस्वयमेवपप्रच्छ।पृष्टश्चासौवर्णयत्यात्मानमतो।तस्यशौर्यरूपविभववर्णनवाचालेनतेनसुतरामरज्यतराजपुत्रोचिरहातुरह
दयस्यविनोदनतामिवागात्।उपजातपरिचयश्चास्मैतांबूलमदापयत्।अस्तमुपगतेचभगवतिसहस्ररश्मौवासितेषुयथासंपन्नपादपतलेषु शिवः
राजसूनुषुशाखावसक्तपर्याणेषुक्षितितललुठनपांसुलसटावधूननानुमितोत्साहेषुगृहीतकतिपयशष्पकवलेषुपीतोदकेषुस्नानाद्य १६३

एतया विगतश्रमेषु पुरोनिखातकुंतयष्टिषु संयतेषु वाजिषु वाजिसमीपविरचितपर्णप्रस्तरे चादिवसगमनखिन्नपरिकल्पितयामिके सुषुप्सति सै
निकजने कृतवहुपावकप्रभापीततमसि दिवसावसाने दिवसइव विराजमाने सेनानिवासे चंद्रापीडः परिजनेनैकदेशे संयतसंप्रसुप्तस्य पुरः प
रिकल्पितं प्रतीहारनिवेदितं शयनीयमगात्. निषण्णस्य चास्य तत्क्षणमेव पस्पर्श दुरासिकाहृदयमरतिरुरगाच्च. विसर्जयांबभूव राजलोकं अ
तिवक्रम [redacted] न पिनालपपार्श्वस्थान्. निमीलितलोचनो मुहुर्मुहुर्मनसा जगाम किंपु तया विषयमनन्यचेताः स्मरति हेमकूटस्यानिकारण
बांधवतामचिंतयन्महाश्वेतापादानां जीवितफलमभिलषाम्यपुनःपुनः कादंबरीदर्शनमपगताभिमानपेशलायानितरामस्पृहयन्मदलेखा
परिचयाय तमालिकां कुतुमाचकोपलके यूरकागमनमुत्से स्तद्धिमगृहकमनपरसस्तत्र समायन्तं पुनरुक्तै निःश्वाससबबंधचाधिकां प्रीतिं से
महादेपश्चात्स्थितां पुण्यशालिनीमनन्यलपत्रलेखां एवं चानुपजातनिद्र एव तामनयन्निशां. उषसि चोत्थाय तस्य जरद्द्रविडधार्मिकस्येच्छा
निस्तेष्वैर्धनविसरैः पूरयित्वा मनोरथमभिरमणीयेषु प्रदेशेषु निवसन्नल्पैरेवाहोभिरुज्जयिनीमाजगाम. आक [redacted] स्त्रिकागमनप्र
हृष्टसंभ्रांतानां पौराणामर्घकमलानीव नमस्कारांजलिसहस्राणि प्रतीच्छन्नतर्कित एव विवेश नगरीं. अहमहमिकया च प्रधाविता

इतिरभसतयाहर्षविक्लवात्परिजनात्कुमारदेवंचंद्रापीडोवर्त्ततइत्युपलभ्यमितासमनिर्भरानंदसंभ्रमगमनोमंदरइवक्षीरोदजलमुत्तरीयांशुकमनलमागलित
माकर्षन्हर्षजनितनेत्रजलजलबिंदुवर्षीमुक्ताफलासारइवकल्पपादपःप्रत्यासन्नवर्त्तिभिर्जरत्पांडुरमौलिभिश्चंदनविलेपनैरनुपहत
क्षौमधारिभिर्मन्त्रिभिःकंचुकिभिरुष्णीषिभिःशेखरिभिश्चबहुकैलासामिवबहुक्षीरोदामिवचक्षितिंदर्शयद्भिःप्रतिपन्नासिवेत्रछत्रचामरैरनु
गम्यमानोराजसहस्रैरीश्वरःपद्भ्यामेवप्रत्युज्जगाम।दृष्ट्वाचपितरंदूरादेवावतीर्यवाजिनश्चूडामणिमालिनामौलिनामहीमगमत्।अथप्रसारि
तेनभुजेनैह्येहीत्याहूयपित्रासुचिरंगाढमुपगूढस्तत्कालसन्निहितानांमाननीयानामालानांकृतनमस्कारःकरेगृहीत्वाविलासवतीभवनमनीय
तराज्ञा।तयापितथैवसर्वांतःपुरपरिवारयाप्रत्युद्गमादिनंदितागमनःकृतागमनमंगलाचारोदिग्विजयसंबद्धाभिरेवकथाभिःकंचि
त्कालंस्थित्वाशुकनासंद्रष्टुमाययौ।तत्राप्यमुनैवक्रमेणसुचिरंस्थित्वानिवेद्यवैशंपायनंस्कंधावारवर्त्तिनंकुशलिनमालोक्यचमनोरमामा
गत्यविलासवतीभवनएवसर्वाःस्नानादिकाःपरवशइवक्रियानिरवर्त्तयत्।अपराह्णेनिजमेवकुमारभवनमयासीत्।तत्रचरणरणक
खिद्यमानमानसःकादंबर्याविनानकेवलमात्मानंस्वभवनमवंतीनगरीवासकल्पमेवमहीमंडलंशून्यममन्यत।गंधर्वराजपुत्रीवार्त्ताश्र

वरोत्सुकश्च महोत्सवमिवेप्सितवरप्राप्तिकालमिवामृतोत्पत्तिसमयमिव पत्रलेखागमनं प्रत्यपालयत्. ततः कतिपयदिवसापगमे मेघनादः पत्रले
खामादायागच्छत्. उपानयच्चैनां कृतनमस्कारां च दूरादेव स्मितेन प्रकाशितप्रीतिश्चंद्रापीडः प्रकृतिवल्लभामपि कादंबरीसकाशात्प्रसादलब्धा
परसौभाग्यामिव वहंतीमतितरामुपगतामुत्थायातिप्रेमदर्शितादरमालिलिंग पत्रलेखां मेघनादं च प्रणतं पृष्ठे करकिसलयेन पस्पर्श. समु
पविष्टश्चाब्रवीत् पत्रलेखे कथय तत्रभवत्या महाश्वेतायाः समदलेखाया देव्याः कादंबर्याश्च कुशलं कुशली वा वा प्रियः सकलस्तमालिकाकेयूर
कादिः परिजन इति. साब्रवीत् देव यथाज्ञापयसि भ्रमसर्व्वमतिशेखरीकृतांजलिना ससखीजना सपरिजना देवी कादंबरी त्वय्येव तु कृतवतीप
त्रलेखामादाय मंदिराभ्यंतरं विसर्जितराजलोको विवेश. तत्र चोत्ताम्यताननसाधारयितुमपारयन्कुतूहलमतिप्रीत्या सादरमनुत्सारितपरिज
नः प्रविश्यागारमचिरप्रसूतायाः स्पष्टकमलिन्याः पृथुभिः कुसुमालैः पल्लवैश्च परचितातपत्रकृत्याप्रा अ न्यास्मन्मध्यमागमन्न्यतमस्य मरकतपता
कायमानस्य पत्रमंडपस्य तले चरणारविंदेन समुत्सार्य सुखसुप्तं हंसमिथुनमुपविश्यापृच्छत्. पत्रलेखे कथय कथमसि स्थिता कियंति वा दिना

का०प०:

१६५ निकीडतस्तेवादेवीप्रसादः कावागोष्ठ्यःसमनन्तवनक्रीडतश्चावाकथाःसमजायंतकोवातिशय्येनास्मान्स्मरतिकस्यवागरीयसीप्रीतिरित्येवंपृष्टश्चव्यजिज्ञपत्·देव
तावधानेनश्रूयतांयथास्थितास्मियावंतिदिनानिपादछायेणवादेवीप्रसादोययागोष्ठ्यःसमनन्तवन्याऽ...स्यकथाःसमजायंत·ततःस्वल्पागतेदेवे
केयूरकेणसहप्रतिनिवृत्तायांततएवकुसुमशय्याशयनीयसमीपेसमुपाविश्यमतिष्ठंचसुखंनवनवाननुभवंतीदेवीप्रसादान्किंबहुनाप्रायेण
ममचक्षुषिचक्षुर्वपुषिवपुःकरेकरःपक्ष्मवीजनानामक्षरेषुवाणीप्रीतौहृदयंदेव्याःसकलमेवतंदिवसमनयत्·अपरेद्युश्चमामेवावलंब्यानि
ष्क्रम्यहिमगृहकात्संचरंतीयदृच्छयानिषिद्धपरिजनावस्कन्नबालोद्यानंजगाम·तत्रचसुधाधवलांकालिंदीजलतरंगमय्येवमरकतसोपान
मालयाप्रमदवनवेदिकामध्यारुरोह·तस्यांचमणिस्तंभावष्टंभस्थितास्थित्वामुहूर्तमिवहृदयेनसहदीर्घकालमवधार्यकिमपिव्याहर्तु
मिच्छंतीनिश्चलधवलतारकेणनिष्पंदपक्ष्मणाचक्षुषामुखंमेसुचिरंविलोकयंतीकेलसंकल्पामदनाग्निंप्रवेष्टुमिच्छंतीसत्त्वादिव
स्वेदांभसःस्रोतस्विस्रोतसेवचतरलीकृतासमकंपतकंपितांगीचपतनभियेवाग्रस्तनिषादेन·अपत्रपयाविधृताभिप्रायातमुखान्निवेशितान
यनदत्तावधानमाज्ञापयेतिविज्ञपितेनिजाक्षयवैरपिवेपथुमद्भिर्निवार्यमाणेवरसस्रवणलज्जयात्मप्रतिमामपिलिखंतमणिकुट्टिमेन शिवः

१६५

तु२

चरणांगुष्ठेनापकर्णयंती नवनकलहंसान्कुट्टिमोल्लेखमुखरं नूपुरेणरणरणारविंदेन विसर्जयंती कर्णोत्पलमधुकरानपि स्त्रियद्रुदनयजन
सिक्तेनांशुकपल्लवेनोत्सारयंती तांबूलवीटिकाधाकलशुकाचामिवदंतखंडितांशिरःकंडूनेरहस्ती वनरेखतान्प्रवणं किंनवपुकुमुकुशितस्तनो
विलोकयंती वकुकामापिनरधस्कोनिस्ल किंचिदपिलज्जाकलितगद्गदागादिम्प्रयत्नतोपिचसाक्षिः शंधंजनजनतामरसानलेनेवदग्धा अजस्रप्र
वहतानयनोदकेनवोढाप्रविशद्भिर्दुःखैरिवाक्रांता तापनांडिःकुसुमचापशरैरिवशकलीकृतानिष्पतद्भिः श्वसितैरिवनिर्वासिताहृदयव
र्त्तिनिश्चिंतांशतैरिवविधृतानिःश्वासपायिभिर्मधुकरकुलैरिवनिपीतानप्रावर्त्तनवाणीकेवलंदुःखसहस्रागणमामुक्ताश्रुमौलि
कामिवकल्पयंतीगलद्भिरस्तस्तकपोलस्थलैःशुचिभिरधोमुखीनयनजलबिंदुभिर्दुर्दिनमदर्शयत् तदाचलस्याःसकाशादहशिक्षितेव
लज्जापिलज्जाशीलांविनयोपिविनयातिशयंमुग्धतापिमुग्धतांवैदग्ध्यमपिवैदग्ध्यंभयमपिभीरुतांविभ्रमोपिविभ्रमांविषादोपिवि
षादितांविलासोपिविलासं तथाकृता चदेवेकिमिदमितिविज्ञापितामयाप्रसज्य लोहितायमानोदनेलो चनेदुःखमकरोर्दरणात्मनःसतु

इत्थं नाथ एवं मृणालकोमलया बाहुलतया वेदिकाकुसुमपालिकाग्रथितकुसुममालामलंघ्य समुन्नते कर्णमूलतामरसे सुपाशमिवावलोकयंती दी
र्घमुष्णं च निःश्वसितवती तद्दुःखक्षरणमुत्प्रेक्षमाणया च पुनः कथं नाथ पुनः पुनरनुबध्यमानामया ब्रीडयाजरवमुखलिखितकेन दलानि
लिखित्वेव वक्त्रमर्पयंती विवशास्फुरिताधराभिः श्वासमधुकरानिवोपांशु संदिशंती क्षितितलावेहितनिश्चलनयनाकुंचितमनिषिद्धतरं क्र
मेण च भयोन्मुखेन निधाय दृष्टिं पुनः पुनरपायर्यमाणलोचनपुतिर्मदनानलधूमधूसरं बाष्पालतामिव क्षालयंती बाष्पजलबिंदुभिः बाष्प
जलबिंदुव्याजेन नवविलसत्स्मितस्फुरितैर्दशनांशुभिः साध्वसविलसतानप्रवर्तानिमिषेयवर्णानि वयस्यभाती कथमपि व्याहाराभिमुखमासानम
करोत् तामब्रवीच्च मां पत्रलेखे वल्लभतया तस्मिन्त्स्थाने न तातो नांबा न महाश्वेता न मदलेखा न जीवितं यच्च मे भवती दर्शनात्प्रभृति प्रियासि
मेन जाने केनापि कारणेन अपहसितसकलसखीजनं त्वयि विश्वसिति मे हृदयं कमपरमुपालभे कस्य वान्यस्य कथयामि परिभवं केन वान्येन
सहसाधारणीकरोमि दुःखं दुःखभारमिमममसह्यं निवेदयिष्यामि त्वद्वचनात्यक्ष्यामि जीवितं जीवितेनैव शपामि ते स्वहृदये नापि विदि तद्वृत्तांतेन मुना

जिह्मि मिति सुतापरहृदये कथमिव मादृशी रजनिकरकिरणावदातं कौलीनेन कलंकयिष्यति कुलं· कुलक्रमागतां च लज्जां परित्यजति
अन्यकन्यकोचितेवा चापले चेतः प्रवर्तयिष्यति साहं न संकल्पितापि पित्रा न दत्ता मात्रा नानुमोदिता गुरुभिर्न किंचित्संदिशामि न किंचिल्ले
षयामि नाकारं दर्शयामि कातरेवानाथेव बलाद् वलि ‖ तेन गुरुगर्हणीयतां नीता कुमारेण चंद्रापीडेन कथमयं महतां किमयमाचारः
किं परिचयस्येदं फलं यदेवमभिनवबिसकिसलयतंतुलघु कुमारेण मे मनः परिभूयते परभवनीयो हि कुमारीजनो मम मायेला
प्रथमं मदनानलो लज्जां दहति। ततो हृदयं मांसै विनयादि कुसुमपुरःसरः खंडयति पश्चान्मर्माणि· तदहमंत्रयेभवतीं पुनर्जन्मांतर
समागमाय न हि मे त्वत्तोन्या प्रियतरा प्राणपरित्यागप्रायश्चित्ताचरणेन प्रक्षालयाम्यात्मनः कलंकमित्यभिधायतस्याममभूत् अहं तु
यत्सत्यमविदितवृत्तांततया कृतेन भीतेव विलक्षेव विसंज्ञेव सविषादं विज्ञापितवती। देवि श्रोतुमिच्छाम्याज्ञापय किं कृतं देवेन चंद्रा
पीडेन कोवापराधः समजनि केन वा खल्वविनयेन खेदितमत्र दनायदेव्याः कुमुदकोमलं मनः· श्रुत्वा प्रथममनुक्तश्च जीवितामपि पि

का·पू·

१६७

167

श्रासन्नलतास्य सिंजीवितमिसेवमभिहिताच पुनरवदद्देवेस्यामितवहिताश्च स्वप्नेषु प्रतिदिवसमागत्यागत्य मे रहसि संदेशैर्मुनिपुत्रो धूर्तः पंज
रस्थशुकसारिकाहूतीः करोति सुप्ताः श्रवणदंतपत्रोदरेषु प्रार्थमनोरथालिमानसः संकेतस्थानानि लिखति स्वप्रेक्षालिनाश्चरा न पिनिपतित
सांजनाश्रुबिंदुपंक्तिकथितात्मावस्थानान्मन्मोहाश्रणवर्तिनीमदनलेखान्प्रेषयति निजरागेणेव बलादंजयन्नाशोकलक्तकरसेन चरणं वविनय
निम्मतनेनान्नरवेषु प्रतिबिंबितमात्मानं बहुमन्यते उपवनेषु काकिन्याः महरणात्मयपलायमानायाः पल्लवलग्नांशुकदशाप्रतिहतगमनायाः
सीस्तवसरखीभिरर्पितायाः मिथ्याप्रगल्भः पराङ्मुखपरिष्वंगमाचरति श्वसस्थले मोलिखन्यचलतां कुटिलताम्भिवान्त्तु मक्षातिः मुखं म
नः श्लिष्यति हस्मोकालिकातरंगवाते रिवशीतले सुरवमरूद्भिः घनजलशीकरलारकितावलीकचाडुकारः कपोलौ वीजयति स्वरस
लिलशिथिलितयहणगलितालकस्रग्येनापि करेणयवांकुरविकारणनि वनरवकिरणानम्बुरूहतुर्विदग्धः कर्णपूरीकरोति वक्षनर
वालबकुलसेककालकवलीकृतान्सुरागंडूषान्सकचग्रहमंगीकृतस्वेषापायं पातुं प्रार्थयते नवनाशोकताडनोद्यतान्पादप्रहारान्मुग्धे
विडंबितः शिरसा प्रतीच्छति मन्मथपरवशमानसश्चकपयकेन प्रकारेण निश्चलनाभिविप्यते मसारख्यानमपीर्ष्यासंभावयतिजाक्रोशम

शिवः

१६७

विपरीतमस्माकं लक्षयति असंभावनमपि मानं मन्यते दोषसंकीर्तनमपि स्मरत्येव मनो गच्छति अवज्ञानमपि नियंत्रणं प्रणयमुखेऽप्रसन्ने लोकापवादमपि विषयो
168 गणयतीति तामेवं वादिनीमाकर्ण्य प्रकृत्यैव सुनिर्मलमनसः करवं चंद्रापीडमुद्दिश्य मुहुरुत्सारुणाख्यानेयं मकरकेतुनाद्य दिवसस्यमेव कादंबरीयाजनसा
न्मनोनवाचिन्तवृत्तिः प्रसलायैवस्य ततः सकंडैः सादरं संवर्द्धितैः प्रलुपरूतमस्मद्गुणैः प्रगाढसाधवलिताः कुसुमायोधवनेन रलिरसस्सागरस्तवंडैः सा
तितारलर रियोयौवनविलासैर्लिखितनामशुधिनि सोनाम्भेनप्रकाशितानि जन्मौ जीवकस्मनैर्दृष्टी निरिरितदृष्टमभ्रनंकलामिर्व थः कालोऽमलयानि
लेनसमासादितोऽवसरस्य प्रदेशेन प्राप्तमनुरूपं फलं मधुमासकुसुमसमयभ्यः चापकार्मिर्गसोम्नहियामदरोयो गुरुणां तादर्शितैमुखमन्मथयुगा
वतार रेति अंहंतु चिरस्यानुबंधेन दिव्यघ्यमुत्तरमकोपंपसी रुनार्ई सिकामा पराधैर्देवं इयपिलुमेतानिरवनुकुसुमचापस्य चापलानि सठ
स्यनस्वस्थे एवमुक्तवतीं मां पुनः सकुतूहला सा कथयतु प्राणं कामा पिको पिवा कथय कान्यस्य रूपाणीति तामहं प्रतिजल्पं देवि कुतोऽस्य रूपम
तनुरेष हुताशनस्तथाप्यप्रकाश्य ज्वालावलीः संतापितां प्रकल्पय ध्रमपटलमसुपातयति प्रदर्शयन्नस्मरज्ञो निकरं पांसुलतामाविर्भावयति
नचलक्षमेतावति भुवने स्मशरस्यतां यन्नयातं यातिपस्पतिकोवा सात्र स्मयतेशौनिकुसुमकार्मुको बालेर्बलवंतमपि विध्यति अपिचानेन

का.पू.

१६८ धिष्ठितानां कामिनीनां पश्यंतीनां चिंताप्रियतमस्पर्शसुखानि संकटमंबरतलमिं मतीनां दर्पितकारागविस्फूर्जन्महिमंडलकेशरागं पतीनां वृत्तांतमनु

शासनलग्नीयसीसंख्यां मृष्यंतीनां प्रियतमं कथामवरुंधानानिलीसरस्वतीमार्पंतीनां मालसमसमागमसुखानि क्रमीयान् कालो हृदयस्यापततीय्येत

दाकर्ण्य सख्याः गांधिर्विसंभस्य वा रीत्या प्रजलेखे यथा कथमसितथा जनोयं काचित्तः कुमारः पक्षपातं पत्रेषु गुणायान्यतानि रूपाणि समाधिकानि ता

निमयि वर्त्तते हृदयमाद्य्य विविक्तासीरुनी मेवतीमेवं प्रथमां मिउपदिश्य यदत्र मे सांप्रतमेवं विधानां वृत्तांतानामनभिज्ञासि गुरुजनवक्तव्य

(ति) तांनीता सखीनं तरंगनर्तितायां जीवितानामरणं श्रेयः पश्यति हृदयमिति सेवमादिनी ऊर्मस्तामहमेवममवोचं अलमलमिदानीं देवि किमनेना

कारणमरणानुबंधेनानाराधितप्रसन्नेन कुसुमशरेणानंगवनात भवरोस्तवरेणदत्तः कावात्र गुरुजनेव क्तव्यतायां एवं खलु कन्यकां गु

रुरिव पंचशरः संकल्पयति मानेवानुमोदते पितेव ददाति सखीवोत्कंठां जनयति मात्रीवत्तरुणतायां रत्युपचारं शिक्षयति किमिव कथ

यामि तेयाः स्वयंरतवत्सः पतीन्यत्रिचे नेरुमनर्थक एवतर्हि धर्मशास्त्रोपदिष्टः स्वयंवरविधिः प्रसीद देवि संदिश मामलमनुनामरणानुबंधेन शपा

मि ते पादपंकजस्पर्शेन यास्यानयामि तं देवमिसे वमुक्ते मत्प्राप्रीति द्ववाईयाद्यमापिबंतीव मां मदिसत्यमाने रपि मकरकेतुशरजर्जरितापि से शिव: १६८

सलज्जां स्वांतेर्निपतद्भिरनुरागविभ्रमैराकुलीक्रियमाणा प्रियवचनश्रवणप्रीत्या स्वेदस्विन्नकुलिप्यरोमांचजालकेन स्थलीवोत्तरीयं
शुकं श्रेंखलकुंडलमालिकापत्रमकरकोटिलग्नं शशिकिरणमयं मरणपाशमिव मकरकेतुना निहितं कंठे हारमुन्मोचयंती प्रहर्षविकलां
तःकरणकन्यकाजनसरजालज्जामिवावलंब्य शनैरवदत् जानामि ते गरीयसीं प्रीतिं केवलमकंठेर शिरीषकुसुमसुकुमारेतः कुतः प्र
गल्भमेतावन्नारीजनस्य विशेषतो बालस्वभावभाजः कुमारीलोकस्य साहसकारिण्यस्ता याः स्वयं संदिशंति समनुपसर्पंति वा स्वयं सा सं
हसंसंदिशंती बालाजिह्रेमि किंवा संदिशाम्यति प्रियोसीति पौनरुक्त्यं तवाहं प्रियास्मीति जडप्रश्नः त्वयि गरीयाननुराग इति वेश्यालाप
स्त्वया विना न जीवामीत्यनुभवविरोधः प्रभवति मामनंग इत्यात्मदोषोपालंभो मनोभवेनाहं भवते दत्तेत्युपसर्पणोपायो बलाद्गृहीतोसि मयं
तिबंधकीधार्ष्ट्यं अवश्यमागंतव्यमिति सौभाग्यगर्वः स्वयमागच्छामीति स्त्रीचापलं अनन्यरक्तायं परिजन इति स्वभक्तिनिवेदनलाघवं कीमाद्
प्रत्याख्यानशंकया नादिशामि संप्रति बुद्धबोधनमनपेक्षितानुजीवितदुःखदारुणास्यामि त्वामिति प्रणयिलाज्ञास्य सि मे मरणेन प्रीति
मिस्यसंभाव्यमेवेति ॥ ॥इति श्री कादंबरीकथायां कालभागः समाप्तः॥ ॥शुभमस्तु॥ ॥संवत् १८४५ फाल्गुनवदी ८ भौमे लिखितं

७१

कादंबरीकाव्य

५०००